Shri Raghunath Temple MSS. Library,
JAMMU

No. १४८२

Title गदाधरी प्रत्यक्षखण्डः

Author गदाधरः

Extent १५२ Age x

Subject न्यायवैशेषिकं

गा दा धरी प्रन्थव्हारवरुः

१४८२

प. ५५२
(अपूर्णम्)

न्याय·गदाधरी वं-१६

३८००

प्र॰ग॰
१

॥श्रीगणेशायनमः॥ ॥मूले द्वितीयविप्रतिपत्तौ तज्ज्ञानपदं प्रकृतप्रामाण्याश्रयतद्व्यक्तिपरं ज्ञानसामा त
न्यनिवेशे यथाश्रुते भ्रमप्रमतापरिग्रहप्रसंगात् तज्ज्ञानरूपविषयघटितप्रामाण्यबाधापत्तिश्च यात्स्वपदेन तत्त पि
ज्ञानांशे यात्स्वत्वं विवक्षणीयम् अन्यथा ज्ञानव्यक्तिभेदेन प्रामाण्यभेदानुपगमे घटत्वादिप्रकारकेतत्तज्ज्ञानवि
षयकज्ञानाजन्यतादृशज्ञानांतरपक्षकप्रामाण्यानुमितिविषयतयासिद्धसाधनापत्तेः अत्र तत्तज्ज्ञानविष
यकज्ञानाजन्यमीश्वरज्ञानं तद्विषयत्वस्य केवलान्वयितया निषेधसाधने साध्याप्रसिद्धिः विधिसाधने च सि
द्धसाधनं चरमज्ञानेन तत्तज्ज्ञानसमानाधिकरणत्वनिवेशेऽपि तत्तज्ज्ञानसमानाधिकरणज्ञानमात्रस्यैव तत्तज्ज्ञा
नविषयकेश्वरज्ञानजन्यतया तज्ज्ञानविषयकज्ञानाजन्यतत्समानाधिकरणज्ञानाप्रसिध्या तदभावाप्रसि
द्धितादवस्थ्यम् अतस्तज्ज्ञानविषयकज्ञाने तदजन्यज्ञाने च तज्ज्ञानसामानाधिकरण्यविशेषणं परपतितज्ज्ञा रम॰
त्वेने नसमानाधिकरणौ तिव्यापकेन व्यर्थविशेषणतादोष इति विधौ द्वितीयसामानाधिकरण्यविशेषणस्यारंव १

अस्मदाद्यात्मसमवेत ४

डाभावांतराघटकत्वेपिनक्षतिः नतज्ज्ञानसमानाधिकरणमितितज्ज्ञानपदेनयास्मिन्ज्ञानेप्रामाण्यंग्रा
ह्यंतादृशस्यास्मदादिज्ञानस्योपादेयत्वादितिभावः अतइतितज्ज्ञानविषयकज्ञानाजन्यज्ञानत्वेनतज्ज्ञा
नविषयकज्ञानत्वेनचेश्वरज्ञानस्यानिवेशादितिशेषः शेषज्ञानेसामानाधिकरण्यंपनिवेशएवंज्ञानेतद्विशेष एत्व
त्र णासत्वेपिविधेयसिद्धसाधनाप्रसक्तेरुभयथैवतद्विशेषणाव्यावर्त्यतयानिषेधाप्रसिद्धिरेवाभिहितेतियद्य
पितज्ज्ञानांशेग्राह्यत्वपर्यंतस्यविवक्षणीयतयातज्ज्ञानावृत्तिपदार्थएवनिषेधप्रसिद्धिःसंभवतिईश्व
रज्ञानस्यतज्ज्ञानांशेतद्वृत्तिप्रकारकत्वेभ्रमत्वापत्तेः तथापितादृशज्ञानप्रकारत्वमात्रंसाध्यमितिविवक्षां
तरानुसरणेनोप्रसिद्धिरभिहिता तज्ज्ञानांशेग्राह्यत्वस्यसाध्यत्वेनिषेधसाधनेवाधोवाध्यः मिश्रमतमाह
तज्ज्ञानेतिजन्यपदस्यतद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोग्यर्थकतयाऽजन्यपदेनपद्यपितत्प्रागभावप्रयुक्त
प्रागभावप्रतियोगित्वंवोध्यतेतथापितावताईश्वरज्ञानव्यावृत्त्यसंभवान्नअर्थांतराप्रवेशितः एवंचेश्वरज्ञान

पुरमे १

प्र॰ग॰ स्वप्रागभावप्रतियोगिताविरहेणातज्ज्ञानविषयकज्ञानप्रागभावाप्रयुक्तप्रागभावप्रतियोगित्वविरहाच्चरम
२ ज्ञानपदेनतदुपादानसंभवोनवामध्यमज्ञानपदेनेतिएवोक्तदोषोद्धारः ईश्वरज्ञानस्यप्रामाण्यानुमितेश्चे
यं तराभावाप्रयुक्तासंतान्योन्याभावप्रतियोगित्वादभावसामान्यप्रतियोगित्वमुपेक्ष्यप्रागभावप्रतियोगित्वंनिवे
शितंप्रथमंप्राक्पदंसंपातायातंविषयतासंबंधेनजन्यमात्रहेतोरीश्वरज्ञानस्यतादृशसंबंधावच्छिन्नाभावा
प्रसिध्याऽन्यसंबंधावच्छिन्नाभावस्यप्रसिद्धावपिकार्याभावाप्रयोजकतयातज्ज्ञानविषयकज्ञानस्याभावसा
मान्यनिवेशापेक्षतिविरहात्प्रामाण्याश्रयज्ञानविषयकपरामर्शादिजन्यप्रामाण्यानुमित्यादिप्रागभावः
श्चैवपरामर्शादिप्रागभावप्रयुक्ततयैवव्यावर्त्तयितुंशक्यतेनतुतदीयाभावांतरप्रयुक्तत्वेनध्वंसप्रागभावयो
रत्यंताभावविरोधित्वेनतदधिकरणेपरामर्शादेरत्यंताभावासत्वात्कारणध्वंसस्यैकार्याभावाप्रयोजकत्वादि राम॰
तिसूचनार्थंवातत। तत्प्रयुक्तत्वंचतदधीनसत्ताकत्वंअधीनत्वंचस्वरूपसंबंधविशेषः कारणस्यप्रागभावरू २

चं२

पव्यतिरेकेस्वप्रागभावविरोधिकार्यंनोत्पद्यतेइतिकार्यप्रागभावसत्त्वंकारणप्रागभावाधीनमितितस्यतत्प्र
युक्तत्वमित्याहकारणेतिकेचित्तुतदुत्तरसत्त्वसहितंतद्व्यतिरेकोत्तरंनियमतोऽसत्त्वंतत्प्रयुक्तत्वंप्रामाणानुमि
स्य तिप्रागभावेच तज्जनकपरामर्शप्रागभावव्यक्तेरुत्तरस्मिन्परामर्शोत्पत्तिक्षणेऽस्तितादृशप्रागभावव्यतिरेक
रूपस्यपरामर्शस्यचोत्तरस्मिन्परामर्शोत्पत्तीयक्षणादौनियमतोनतिष्ठतिपरामर्शद्वितीयक्षणोत्पत्तीयक्षणोवा
ऽनुमितिरुत्पत्तेरितितत्प्रयुक्तएव।प्रथमदलप्रवेशात्संग्राह्यस्यानुव्यवसायादेःप्रागभावस्यतज्ज्ञानविषयकत्वा
त्मकज्ञानंतादृशस्वोत्तरज्ञानांतरप्रागभावनाशोत्तरंनियमेनासत्त्वेपिनतादृशप्रागभावप्रयुक्तत्वंचरमदलप्र
वेशादनुव्यवसायादिपूर्वंकिंचित्कालजातव्यवसायविषयकानुमित्यादिप्रागभावोत्तरकालेसत्तोप्यनुव्यव
सायादिप्रागभावस्यनतादृशानुमित्यादिप्रागभावप्रयुक्तत्वंतादृशानुमित्यादिप्रागभावनाशोत्तरमपितादृशा
नुव्यवसायादिप्रागभावसत्वेनतद्व्यतिरेकस्यतादृशातीतानुमित्यादिप्रागभावव्यतिरेकोत्तरकालेनियतासत्वाभावा

प्र॰ग॰ तृतीयायादृशानुव्यवसायादेरव्यवहितपूर्वकाले तद्वतः पुंसोऽन्यस्यवा कस्यचिद्व्यवसायविषयकमनुमित्या
दिरूपं योगजप्रत्यक्षरूपं वाज्ञानं जातं तत्प्रागभावस्य तत्प्रागभावप्रयुक्तत्वेपि न क्षतिः सर्वस्यैवानुव्यवसायस्यादे
२ रव्यवहितपूर्वं व्यवसायविषयकतादृशज्ञानोत्पत्तौ मानाभावेन तादृशानुव्यवसायमादायैव प्रामाण्यसाध्यस श्री
3 त्वस्य परैरुपपादनीयत्वात् अभावस्य गुरुमतेऽधिकरणरूपतया ज्ञानप्रागभावस्यात्मरूपस्य व्यतिरेककालाप्रसि
द्धेर्गुरुमते ज्ञानप्रागभावप्रयुक्तत्वाप्रसिद्धिश्चिन्तावीजमेवेत्याहुः स्वरूपसंबंधरूपाधीनत्वघटितप्रयुक्तत्वनिवे
शेपि व्यवसायजनकात्ममनोयोगप्रागभावस्यात्मनिष्ठस्य तन्निष्ठतद्विषयकज्ञानप्रागभावात्मकतयात्मस्वरू
पतया तत्प्रयुक्तगुरुमतसंग्राह्यव्यवसायप्रागभावस्य तज्ज्ञानविषयकज्ञानप्रागभावाप्रयुक्तत्वं तन्मते दुर्घटमि
ति चिंतावीजं तज्ज्ञानविषयकज्ञानप्रागभावत्वेन प्रयोजकताविवक्षणे स्वरूपसंबंधरूपाधीनत्वस्याप्रामाणि राम॰
तं कतात द्वीजं मतांतरे तज्ज्ञानविषयकतज्ज्ञानव्यक्तिप्रागभावत्वविशिष्टाधिकरणकालोत्तरं यद्धर्मविशिष्टस्य सत्वं २

ताद्दशप्रागभावत्वविशिष्टानधिकरणकालोत्तरत्वनियमतोऽसत्वं तद्धर्मभिन्नप्रागभावत्वरूपानुयोगितानिरूप
कत्वस्याजन्मांतार्थत्वेऽप्यात्मस्वरूपप्रागभावानधिकरणकालाप्रसिद्धेस्तथात्वासंभवेपि सर्वोसिन्नसिध्यादिवेशन
यत्रपरामर्शादित्वतीयक्षणएवप्रामाण्यानुमित्यादिकमुत्पन्नं तत्र परामर्शादिप्रागभावत्वविशिष्टानधिकरण त्प
तत्परामर्शाद्युत्पादक्षणोत्तरमपितदनुमित्यादिप्रागभावत्वविशिष्टसत्वेन ताद्दशानुमितिनिरूपितप्रागभावत्व
स्यनिरुक्तधर्मभिन्नत्वेन ताद्दशानुमितिप्रामाण्यस्य तपासिद्धसाधनमित्यादिकं चिंताबीजमवसेयं यथार्थघटेच्छेति
याथार्थ्यं घटत्वप्रकारकत्वंचसंस्कारादावप्यन्वेतितदेतुकाघटत्वप्रकारकप्रमानुमितिश्च समवायेनताद्दशप्र
मासाध्यिकाऽऽत्मपक्षिकाजन्यतासंबंधेनतत्साध्यिकाजन्यत्वसाध्यिकावाताद्दशेच्छादिपक्षिका ऽऽत्मनि
श्री पक्षेसमवायेनहेतुतौलेचतादात्म्येनेतिवाध्यं घटप्रमात्वं घटेघटत्वप्रकारकत्वं तद्विशिष्टायाः सर्वोतदनुमि
भूता तिजनकपरामर्शाविषयीभवन्ति स्तत्राह्यिणामीमांसकमतेसामान्यस्याप्रत्यासत्तितयाविशेषणाज्ञानस्यवि
चं३

प्र॰गदा॰ शिष्टवुद्धावहेतुत्वेनप्रमात्वेनव्यक्त्यंतरविषयकपरामर्शादपिअज्ञातव्यक्तिप्रकारकानुमितेःसंभवादितिभावः
४ मि सिद्धसाधनंअर्थांतरंमीमांसकमतेतूतादृशानुमित्याख्यतयैवविधिसिद्धेरवरितार्थतयोद्देश्यप्रत्यूक्षादिविशे
यि षैरप्याख्यत्वासिद्धिरितियावत्ननुयथाश्रुतंसिद्धसाधनंविशेषणाधीहेतुतावादिभिर्नैयायिकैःपूर्वागृहीतव्य
५ चा क्तिप्रकारकानुमित्यनुपगमेनतन्मतेनुमितिमादायोक्तसाध्यसत्वानिर्वाहात्अथज्ञानपदंपदितज्ज्ञानव्यक्तिप
रमुच्यतेतदाऽपूर्वव्यक्तिविषयकज्ञानाजन्ययोक्तानुमित्यातव्यक्तावाप्यतामादायार्थांतरप्रसक्तिःतज्ज्ञानपद प्रामाण्यस्य
स्यघटत्ववतीत्यादिप्रामाण्याश्रयपरत्वेघटत्वादिप्रकारकत्वाश्रयपरत्वेवानायंदोषःउक्तस्थलेपरामर्शेण
व्य प्रमात्वपुरस्कारेणातदाश्रयव्यक्त्यंतरावगाहनात्तादृशानुमितेस्तन्मतेपितदाश्रयविषयकज्ञानाजन्यत्वानिर्वा
हात्ननचैवमपियत्रघटत्वादिमात्रप्रकारकमेवज्ञानंघटत्ववतीत्यादिप्रामाण्यप्रकारेणापरामर्शेणावगाढंत रम॰
त्रत्यानुमितिर्नैवमपिशक्यतेवारयितुमितिमिश्रमहमतेतत्रैकाप्यतामादायैवपर्यवसानंकथंनस्यादितिवा ४

चंव्यधिकरणाप्रकारकाजन्यत्वविशेषणेनतादृशानुमितेरपिवारणासंभवात्एवंज्ञानत्वेनपरादिज्ञानविषय
कपरामर्शोघत्रघटत्ववतिघटत्वप्रकारकत्वेलाघवमितिलाघवज्ञानात्तेनरूपेणघटज्ञानानुमितिःसापिकथं
चिद्वारणीयेत्याशंकतेअथेतिलाघवमनुसरन्नाहतद्घटकेतिआदिनातद्घटितविशेष्यकत्वस्यविकल्पेनप
रिग्रहः।ज्ञानत्वनिवेशेपिप्रयोजनविरहात्तन्निवेशव्यवच्छेद्यंपमात्रघटंसामान्यपरेणावातेनयत्किंचित्त लाभा
दाश्रयविषयकज्ञानजन्यतयातादृशज्ञानजन्यत्वसामान्याभाववत्त्वविरहादुक्तानुमितिव्यावर्त्तनेनस्पष्टीकृ
तेउत्तरज्ञानेचैत्रादिनिष्ठत्वेनविशेष्येननुप्रामाण्याश्रयसमानाधिकरणत्वेनेश्वरज्ञानस्यापिप्रामाण्याश्र
यतयातस्यापिचतत्समानाधिकरणतयातद्व्यावृत्त्यनुपपत्तेःभट्टमतापरिग्रहेतितन्मतेपिप्रमात्वमपुरस्कृत्य
ज्ञानत्वेनव्यापकत्वज्ञानात्प्रमात्वेनानुमितिर्मिश्रमतखंडनावसरेनिराकृतत्वात्प्रमात्वावच्छिन्नव्यापकताज्ञान
स्यचप्रकृतप्रामाण्याश्रयविषयकत्वनियमाद्भट्टमतेसंग्राह्यापात्ततोलिंगकानुमितेरुक्तरूपानाक्रांतत्वादि

प्र०ग०
तद

तिभावः अथैतद्द्वीयप्राथमिकघटज्ञानात्तद्वैतद्दीयप्रामाण्यस्यानुपस्थित्या तेन रूपेण व्यापकताज्ञानासंभ
वाज्ज्ञाततालिंगकानुमित्या तद्दीयप्रामाण्यं न गृहीतुं शक्यत इति घटत्वादिकमादायपायद्धमेवत्रिष्ठायत्प्रका
५
रिकाज्ञाततासा तद्घटितत्प्रकारकज्ञानजन्येत्यादिसामान्यव्याप्तिग्रहात्पक्षधर्मताबलेन घटत्वादिघटितप्रामा
5
ण्यविशिष्टज्ञानानुमितिर्भवेदंगीकार्या सा च घटत्वादिप्रकारकज्ञानज्ञानमंतरेणापि संभवंतीन घटत्वादिप्र
कारकत्वघटितप्रामाण्याश्रयविषयकज्ञानजन्येति न भवेत्समतापरिग्रहः न च यत्तदर्थानुगमाद्घटत्ववतीत्या योर
तो दिप्रामाण्यप्रकारकानुमित्यौपयिकघटत्वादीतरतत्तद्धर्मघटितप्रामाण्यावच्छिन्ननिरूपितव्याप्तीनामानंत्या
त्सर्वत्र दुर्ग्रहतया प्रामाण्यप्रकारकानुमितिर्न संभवति यत्किंचिदेकधर्मघटितसाध्यसाधनव्याप्तिज्ञानादेव
प्रकृतधर्मघटितहेतौ पक्षधर्मताज्ञानात्तद्घटितसाध्यसिद्ध्युपगमे प्रकृतधर्मघटितहेतौ तद्घटितसाध्यस राम०
व्यभिचारज्ञानदशायामपि यत्तत्पदार्थांतरघटितयत्किंचित्साध्यसाधनव्याप्तिज्ञानात्प्रकृतानुमित्यापत्तिः पत्त ५

द्‌र्थेघटितसाध्यसाधनोभयंयदोपस्थितंतदानीतनानुमितौतत्तत्साध्यसाधनोभयव्याप्तीनांज्ञानस्यहेतुता
ए स्वीकारेतदानीमप्रसिद्धसाध्यस्यैवतदीयव्याप्तिज्ञाननिरपेक्षानुमितिस्वीकारेपिवचनोक्तातिप्रसंगवारणा
संभवः तत्साध्याप्रसिद्धिस्थलीयानुमितिसामग्र्यास्तत्साध्यस्यतद्धेतौव्यभिचारज्ञानदशायामपिसत्वात्तत्त
त्कालस्थापितत्रहेतुतापाऽतिप्रसंगवारणोव्याप्तिज्ञानेहेतुतावैयर्थ्यादितिवाच्यंतत्तदर्थघटितसाध्यसाध य
ज्ञान नोभयव्याप्तिविरहविशिष्टतत्तदर्थघटितसाध्यसाधनोभयोपस्थितेः प्रतिबंधकतायत्किंचिदेकार्थघटि
तसाध्यसाधनोभयव्याप्तिज्ञानस्यचहेतुतांस्वीकृत्यातिप्रसंगस्यवारणीयत्वात् तत्तदर्थघटितहेतौपक्ष
धर्मताज्ञानमेवपक्षेतत्तदर्थघटितसाध्यसिद्धौनियामकमास्थेयंसामान्यमुखीव्याप्तिर्यत्रानुमितिप्रयोजि
कातत्रव्याप्तिविशिष्टपक्षधर्मताज्ञानानपेक्षायामपिनक्षतिः विलक्षणायाः सामग्र्यास्तत्रोपपत्तादि
त्यभिप्रायिकामाशंकांनिराकरोतियत्त्वामितिप्रकृतेपिइच्छादिलिंगकप्रमानुमितिस्थलेपिपापक्षधर्म

प्र॰गदा॰ ६ वह्निशेषिकापर्धर्मप्रकारिकोसातैद्विशेष्यकतत्प्रकारकज्ञानसाध्येस्यापीकारणंघटादिज्ञानविषयकव्याप्तिज्ञानास
त्त्वधर्मेतावलेनघटादिप्रमात्वविशिष्टलाभोदुर्वारएवेत्यर्थः तथाचप्रकृतेप्रामाण्याश्रयविषयकज्ञानाजन्य घा
त्वनिवेशेपिताद्दशानुमितिग्राह्यतयासिद्धसाधनंदुर्वारमितिभावः ननुसर्वत्रएताद्दशानुमानानियमेनयाद्दश
ताद्दशा प्रामाण्यस्याश्रयविषयकज्ञानाजन्यानुमितेर्नविषयस्तदेवपक्षीकर्त्तव्यमितिनसिद्धसाधनावकाशइत्यतआह
सर्वज्ञास्वेतितद्वत्ताराभाजनेस्वाश्रयविषयकज्ञानाजन्यसामान्यव्याप्त्यधीनानुमित्यविषयप्रामाण्यप्रष्टव्याइ ग्राह्यं
आ तितथाचकालस्यानवधितयात्मनांचानंत्येनसर्वत्रैवप्रामाण्येकिंचित्पुरुषीयकिंचित्कालीयैताद्दशानुमितिविषय न
त्वसंभावनयाविशिष्यपक्षस्यैवदुष्परिचयतयाविचारासंभवइतिभावः ताद्दशज्ञानजन्यत्वेनेतिप्रकृतप्रामाण्याश्र घा
यविषयकचैत्रादिज्ञानजन्यत्वेनेत्यर्थः तद्भिन्नमजन्यांतेनविवक्षितमितितथाचविशिष्टबुद्धौविशेषणज्ञान राम॰
नां हेतुतावादिनेयायिकानांअज्ञातप्रमायाअनुमितावपिअप्रकारतयाक्तप्रमासाध्यकानुमितिस्तत्प्रमारूपविशेष ६

राज्ञानजन्यतयानैयायिकसिद्धेवेतिनतत्कात्स्वतयाकथितसिद्धसाधनावकाशइतिभावः भट्टादेश्यप्रामाण्या
द्दकृताकाप्रसिद्धविपर्ययेकानुमितेरुक्तरूपेणैवनैयायिकसिद्धंयत्तदन्यत्वमुपपादयतिनैयायिकनयइ
त्रि तिअसत्कल्पमितियद्यपिव्यवसायानंतरंद्वित्रचतुरादिक्षणाभ्यंतरजातेज्ञानंभट्टैर्ज्ञाततालिंगकानुमितित्वे ज्ञान
नस्वीकृतमपिसाक्षात्कारित्वेनैवनैयायिकसिद्धंतथापिआत्मभिन्नाविशेष्यकज्ञानग्राह्य एवतथानतुसा
ततोविशेष्यकोज्ञानजन्यत्वग्रहोविषयविशेष्यकोज्ञानविषयत्वग्रहोवा। तादृशानुमितिग्राह्यत्वमादाये
वभट्टमतेपक्षेसाध्यवत्त्वमुपपादनीयंनचज्ञाततादिविशेष्यकानुमितित्वेनभट्टाभ्युपगतस्यापिआत्मधर्मिक
ग्रह ज्ञानस्यनैयायिकैरात्मविशेष्यकज्ञानग्राह्यत्वेनस्वीकारान्नतस्यनैयायिकसिद्धभिन्नत्वमितिवाच्यं एवमं
पिव्यवसायरूपविशेषणाज्ञानजन्यत्वेनतस्यनैयायिकासिद्धत्वात्आत्मधर्मिकज्ञानग्रहस्यनैयायिकैर्ज्ञान
विशेष्यकत्वेनैवस्वीकरणीयत्वात्तएवंविशेषणाज्ञानाभावेनतन्मतेतस्यविशेषणात्वासंभवात्तादृशज्ञान

भिन्नाउ

प्र॰गदा॰ स्यैव भेदेनानुमितित्वस्य ज्ञाततात्ज्ञानोत्तरत्वस्य च स्वीकारात्तमादाय महानसीयसाध्यवत्त्वोपपत्तेः एवं चासत्त्व

७ वे ल्पप्रमित्स्य स्वतज्ज्ञानविषयकज्ञानजन्यत्वाभ्युपगमबीजानुमितित्वाभ्युपगमाविषय एवेत्यर्थः ज्ञानविशेष

णकानुव्यवसायस्य व्यवसायविषयकज्ञानजन्यतया नैयायिकसिद्धान्तमादाय न मिश्रमते साध्यवत्त्व

चेति निर्वाह इत्याशंकां परिहरति व्यवसायानन्तरोत्पन्नमेवं ज्ञानं मिश्राणां प्रामाण्यग्राहकमिति तथा च विशेष

णाधीनं तुल्यमनंगीकुर्वाणेन मुरारिमिश्रेण प्राथमिकज्ञानजन्यज्ञाने तद्विशेषणत्वेन स्वीकृतमपि नैयायिके क

अत ज्ञानविशेष्यकत्वेनैव स्वीक्रियते तत्तज्ज्ञानविषयकज्ञानजन्यत्वेन नैयायिकासिद्धान्तत्वात् तत्त्वमादाय मिश्रा

पक्षे णां साध्यवत्त्वोपपत्तिरिति भावः नैयायिके ज्ञानप्रकारकतया स्वीकृतमपि मिश्रैरनुव्यवसायं प्रकारान्तरेणासं एम॰

गृहीततः कस्यचिन्मतमाह ज्ञानत्वादीति एतच्च स्वरूपकथनं किंचिद्विशिष्टविषयकत्वमेव विवक्षितं ज्ञान ७

तं विषयकेत्यनेन न विवक्षितमपि तथा च ज्ञानामीत्याकारकोनुव्यवसायो व्यवसायरूपविशेषणज्ञानजन्यत्वे

नेनैवापिकैंसिद्धोपिनज्ञानत्वादिविशिष्टविषयकज्ञानजन्यत्वेनतन्मतासिद्धः निर्विकल्पकरूपविशेषणा
ग्रानविषयकज्ञानादेवविशेष्यविशेषणामित्यादिरीत्यातदनुव्यवसायस्यैतेरूपगमादितितत्संग्रहः क
स्विदित्यस्वरसंवीजंतुप्राथमिकज्ञानग्रहस्यापिउपास्थितविषयविशिष्टज्ञानविषयकत्वेवाधका सूचनंतत
भावात्तदंशेनिर्विकल्पकत्वासंभवः ज्ञानत्वविशिष्टविषयकत्वविवक्षणोंप्राथमिकज्ञानग्रहस्यज्ञान न
त्वांशेनिर्विकल्पकतयाज्ञानामीत्याकारकतज्ज्ञन्यानुव्यवसायसंग्रहेपिस्वतस्त्वविवादविषयपाथा
र्थ्यमात्रस्यपक्षत्वेतस्यज्ञानत्वविशिष्टविषयकज्ञानाजन्यत्वैयाघटत्ववतिघटत्वप्रकारकवानयमिति
तादृशानुमित्याग्रहातसिद्धसाधनंदुर्वारंएवमुक्तरीत्येवनिर्वाहेऽधिकविवक्षाप्यकिंचित्करीत्यादिकं दितुधा
।तज्ज्ञानपदस्यतत्तद्व्यक्तिपरत्वेसामान्यलक्षणाजन्यप्रमात्वविशिष्टाएर्वव्यक्तिज्ञानग्राह्यतयासिद्धसा
धनस्यप्रदर्शनीयतयातस्यप्रकृतप्रामाण्याश्रयपरत्वंतद्घटकघटत्वादिप्रकारकत्वांप्रयपरत्वंवेत्याहतज्ज्ञा

प्र॰ गदा॰ नार्थोस्तिवितिनक्षतिः नसिद्धसाधनंअर्थैमपितज्ज्ञानविषयकज्ञानाजन्यप्रथमानुव्यवसायेप्रामाण्यघटक
८ प्रकारिताद्युपनायकज्ञानवशात्प्रामाण्यस्यभानंसंभवात्तद्ग्राह्यतामादायसिद्धसाधनंदुर्वारमेवनचघट
४ त्वादिप्रकारितायाःप्राथमिकज्ञानेलौकिकप्रत्यक्षरूपंतदाश्रयघटितसंनिकर्षाधीनमितिनियमतस्तदा
ज्ञान श्रयविषयकमेवतथाचप्रयोज्यत्वरूपंजन्यत्वविवक्षयातदाश्रयविषयकज्ञानप्रयोज्यतदुपनीतभानमा
दायनसिद्धसाधनावसरइतिवाच्यंघटत्वादिप्रकारितायास्तदाश्रयाविषयकस्यापिप्रकारितात्वादिसामा
न्यलक्षणायाप्राथमिकप्रत्यक्षस्यसंभवात्तन्मूलकोपनीतभानग्राह्यतयासिद्धसाधनस्यदुर्वारत्वात्तन २
चज्ञाननिष्ठंप्रकारित्वादिकंहिज्ञानस्वरूपमेवतथाचतज्ज्ञानमेवतदाश्रयज्ञानमितिनतज्जन्यतदुपनीत
भानग्राह्यतयासिद्धसाधनमितिवाच्यंएवंसतियज्ज्ञानंभेद्याग्राह्यत्वंयदीयंप्रामाण्यवैवाग्राह्यत्वंतज्ज्ञान राम॰
व्यक्तेस्तज्ज्ञानार्थत्वेपिनोक्तसामान्यलक्षणाजन्यज्ञानग्राह्यप्राथमिकप्रत्यक्षस्यसंभवात्तन्मूलकोपनीत ८

साध्यते २

याप्यत्वेनसिद्धसाधनमितितज्ज्ञानार्थेस्त्वित्यादिविरोधादितिचेन्नपत्रयत्वंगर्हितंतत्रैवतस्योपनीतभानज्ञा
नमितिप्राचीननियमानुसारेणायंविप्रतिपत्तिरितिदर्शितोपनीतभानमादायसिद्धसाधनस्यानवकाशात्ता
दृशनियमानभ्युपगमेतुतज्ज्ञानविषयकज्ञानस्थलेप्रकृतप्रामाण्यघटकप्रकारिताविषयकज्ञानेनिवेश्यसा
सामान्यलक्षणाजन्योक्तप्रत्यक्षमुपनीतभानात्मकौक्तप्रत्यक्षंचादायसिद्धसाधनस्यवारणीयत्वात्याप्यत्व उ
स्वविषयतार्थकत्वेदोषस्यवक्तव्यतयातन्निर्वक्तितादृशोतितस्मिन्ज्ञानेतादृशज्ञानव्याप्यत्वंतज्ज्ञानविशेष्य
तानिरूपिततज्ज्ञानविषयकतत्तज्ज्ञानाजन्यज्ञानीयप्रकारत्वंज्ञानाजन्येस्यस्योक्तौर्थौप्रामाण्यस्यतत्तज्ज्ञाननिष्ठप्र ग्राह्यः
कारिताविशेष्यरूपस्यतज्ज्ञानव्यक्तिस्वरूपतामतेप्रामाण्यप्रपततज्ज्ञानेतत्तद्व्यक्तित्वेनैवोपादेयंप्रमात्वसामान्य
लक्षणाजन्यज्ञानमादायसिद्धसाधनानवकाशादित्याशयेनतस्मिन्ज्ञानइत्युक्तंतदंशमनुपादायतादृशज्ञानप्र
कारतामात्रनिवेशेघटत्ववतिघटत्वप्रकारकत्वत्वादिनापक्षतायांतज्ज्ञानव्यक्तिभिन्नघटत्वादिप्रकारकज्ञाननिष्ठता

ज्ञान॰

प्र॰गदा॰ दृशंप्रामाण्येतज्ज्ञानविषयकज्ञानाजन्यज्ञानांतरपक्षकानुमित्यादिग्राह्यतयासिद्धसाधनप्रसंगात्प्राचीनैःपक्ष
तावछेदकेकोपिअंशतःसिद्धसाधनस्यादोषतोपगमात्तद्दोषत्वेप्यंशतोबाधनैनैयायिकानामुद्देश्यायाघटत्व
१ द्यु वतिघटत्वप्रकारकत्वत्वावछेदेनस्वतस्त्वाभावसिद्धेरनिर्वाहात्तंपदिचप्रकारिताज्ञानस्वरूपातिरिक्तातदाप्रमात्व
शि सामान्यलक्षणाजन्यतद्विशिष्टएर्वान्यक्तेप्रत्यक्षग्राह्यतयासिद्धसाधनवारणायतज्ज्ञानयदस्यप्रमात्वाद्याश्रयप
र रत्वेनोक्तदोषावकाशइत्याशयेनतस्मिन्नवृज्ञानेइतिपरित्यजतितादृशेतिनदोषोनसिद्धसाधनंघटभिन्नत्वादिसा
मान्यजन्यप्रमाण्यप्रत्यक्षेतस्यविषयत्वेपिप्रकारत्वाभावादितिभावःघटत्वप्रकारकत्वादिसामान्यज्ञानंघटत्वप्रकार तु
कत्वाद्याश्रयज्ञानमंतरेणानसंभवतिप्रकारितात्वादिरखंडधर्मःसिद्धांतविरुद्धइतितादृशसामान्योपेक्षाप्रामाण्यत्व
रूपपक्षतावछेदकावछेदेनतादृशज्ञानविषयत्वसाधनेनेदंसिद्धसाधनंघटभिन्नत्वादिप्रकारकप्रामाण्यग्रहवि एम॰
षयतायाःप्रामाण्यत्वानवछिन्नत्वादतउक्तविवक्षायाःप्रयोजनांतंमाहनवेतिनिषेधस्यतादृशज्ञानग्राह्यत्वा १

भावरूपनैयायिकसाध्यस्याप्रसिद्धिरितिवस्तुमात्रस्यैवसामान्यलक्षणादिजन्यप्रमाविषयकज्ञानाजन्य
न ज्ञानविषयत्वैंतादृशज्ञानविषयत्वस्यकेवलान्वयित्वादितिभावः प्रकारतापर्यंतनिवेशेनिषेधाप्रसिद्धिरु
च द्धरतितस्मिन्नेवेतिद्वितीयकल्पाभिप्रायेणेदंप्रथमकल्पेंतज्ज्ञानांशेयात्धत्वस्यत्वस्यान्यत्रापिप्रसिद्धेः तुल
भत्वादितितज्ज्ञानस्यतज्ज्ञानरूपविशेषणाज्ज्ञानजन्यतयानैयायिकसिद्धएवज्ञानेप्रकारतयातद्भिन्नज्ञानेप्र
कारत्वाभावस्यतत्रसंभवादितिभावः नचप्राथमिकतज्ज्ञानप्रत्यक्षादावपिमीमांसकमतेतज्ज्ञानस्यप्रका
रतयातादृशज्ञानस्यचज्ञानविषयकज्ञानजन्यत्वेननैयायिकसिद्धद्वितीयानुव्यवसायादिभिन्नतयामीमां
सकमतेद्वितीयकल्पेनिषेधाप्रसिद्धिर्दुर्वारैवेतिवाच्यंस्वरूपसंबंधावच्छिन्नप्रकारतायाद्वितीयकल्पेसा
ध्यघटकतोपगमेनस्वरूपसंबंधेनाहंत्वेतज्ज्ञानेड्रौरावपिपरमतेनिषेधप्रसिद्धेः संपादनीयत्वात् ता
मिश्रमतेस्वरूपसंबंधेनाहंज्ञानवपितेनसंबंधेनामथ्याख्यातिप्रकारकत्वस्यसत्वेपितादृशाहंत्वेसर्वस्य

द्वि० च०

प्र·गदा· ताद्दशाप्रमेमानाभावात्कचित्तदभावसंभवाप्रसिद्धिसंभवात्तज्ज्ञानपर्यंतानुधावनंचप्रकारतावच्छेदकसं
१० बंधविशेषाप्रवेशेपिस्वमतेतत्रप्रसिद्धिःसंभवतीत्यभिप्रायात्।मतांतरमाहतज्ज्ञानघटितेतिविशेषणेतपा
६ तज्ज्ञानेंयद्युदरकेताद्दशविशिष्टेस्यार्थःताद्दशविशिष्टज्ञानस्यन्यायमतेतज्ज्ञानविषयकज्ञानजन्यत्वज्ञा
10 नेविषयत्वात्एवंचविषयतामात्रस्यसाध्यघटकत्वेपिनिर्वाहोबोध्यःकश्चिदित्यनेनास्वरसःसूचितःकेव
न लेविशेष्यताद्दशज्ञानाजन्यज्ञानविषयत्वसत्वेविशिष्टेपिविशेष्यतदभावस्यदुर्लभत्वमितितद्बीजंयंप्रथम
कल्पेविधिप्रसिद्धिर्दुर्लभमाहविधीतिघटत्वप्रकारकत्वादावितिअभावत्वप्रतियोगित्वयोरिवन्यायमतेप्र
कारित्वादेरप्यनुपस्थितस्यप्रकारत्वाद्यवसायानंतरक्षणोत्पन्नानुव्यवसायेव्यवसायविषयकज्ञानजन्य गम·
त्वेननैयायिकसिद्धभिन्नेज्ञानात्मकविशेष्यनिरूपितप्रकारतायाघटत्वप्रकारकत्वादौसत्वादितिभावःपक्षपे १०
वप्रामाण्येतिप्रिधन्नपनैयायिकसाध्यस्यबाधोदुर्वारःप्रामाण्यस्यैवघटत्वप्रकारकत्वत्वादिमात्रपुरस्कारेण

प्रका०

ज्ञानाजन्य

प्र प्रसिद्धि

तन्मतेपिज्ञानविषयकंज्ञानविषयत्वेननतत्रतद्भावस्यदुर्घटत्वात्तथापिविषयेंऽपिविषयतानवच्छेदक
रूपावच्छेदेनविषयत्वाभावमभ्युपेत्यैतदभिधानेऽन्यथाप्रकारित्वादिकमप्यनुपस्थितंनप्रकारइतिमतम
वलम्ब्यवाधःपरिहरणीयः ज्ञानांशेविषयितासंबंधेनप्रथमानुव्यवसायेप्रकारीभूतेविषयएवव्यवसाय
कालेतोपस्थितिवशात्तदनंतरंतत्स्यलक्षएवतत्रप्रकारीभूतेज्ञानत्वादौचततैज्ञानरूपघटत्वप्रकारकत्वा
द्याश्रयविषयकज्ञानाजन्यत्वानप्रकारकैर्लैकसिद्धिः आदिपदादेवचतत्परिग्रहः द्वितीयकल्पेज्ञानादृत्तावपि
वस्तुतरैसोलभ्यमिसाहघटादौवतिस्वरूपसंबंधावच्छिन्नप्रकारतायाः द्वितीयकल्पेविवक्षितत्वेऽन्यथाख्या
त्यनंगीकर्तृगुरुमतेतादृशसंबंधेनावर्त्तमानेघटादौतादृशीप्रकारतानसंभवतीत्याशयेनादिपदंतादृशसं
बंधेनवृत्तिमतामभावादीनांपरिग्राहकंविशेष्यीभूतेनैयायिकसिद्धभेदेनतादृशज्ञानजन्यतयानैयायिकसि
द्धभिन्नंज्ञानमादायापिभट्टमतमात्रसिद्धप्रसिद्धिस्थलमाहभट्टानामितिप्रकारत्वसंभवेत्वितिज्ञानत्वपसाध्यां

मपि

गदा॰प्र॰ शेषसमानकालीनत्वसंबंधेनप्रकारत्वञ्चस्यार्थः तस्यां ज्ञाततायां ज्ञानांशे ग्राह्यत्वघटितसाध्यस्यापि प्रसिद्धिरि
११ अ त्यर्थः लिंगस्य साध्यविशेषणतयानुमितौ भानं सविवादमिति ततः संभवेत्वित्यभिहितं द्वितीयकल्पे घटादिवि
या शेष्यकज्ञाततात्प्रत्यक्षप्रकारतामादायैतेषां स्वस्वमते साध्यप्रसिद्धिर्द्रष्टव्या । यद्यपि ज्ञाततालिंगकानुमितिग्रा
ह्यतामादायापि ज्ञानत्वादावपि प्रसिद्धिः संभवति तथापि तत्रोभयमतएवैतत्प्रसिद्धेस्तस्य घटत्वप्रकारकत्वादावि
त्यादिपदेनप्रागुपादानाज्ज्ञाततायां यथा तानुसरणाज्ज्ञाततात्वे ज्ञानांशे ग्राह्यत्वरूपसाध्यत्वाभावान्न तदुपेक्षितं नैया
यिकसिद्धसंवादिप्रवृत्तिजनकत्वादिलिंगकानुमित्या प्रामाण्यप्रकारेण ज्ञानावगाहने सत्ति साध्यप्रसिद्धौ
तन्मूलकज्ञाततालिंगकानुमित्या प्रामाण्यग्रहे गौरवमन्मते दर्शितसाध्यनिर्वाहादनुव्यवसायस्थलीय
पूर्वाप्रतीतज्ञानविषयकसामान्यमुखव्याप्त्यधीनज्ञाततालिंगकानुमितेर्न प्रामाण्यावगाहितान्मते सिद्ध्य राम॰
तिनवा तावतैवतेषां स्वतस्त्वसिद्धिः प्रामाण्यंपता दृशप्रामाण्यभासकसामग्र्यापर्यार्थञ्चादिलिंगकप्रामाण्यवि ११

ज्ञाना शिर्ष्यौनुमितिसामग्रीतोऽविशेषात्तेनैयायिकासिद्धज्ञाततालिंगकत्वेनविशेषस्यस्वतन्त्रसंघाटकत्वोपगमेऽपरिभा
षामात्रोपगमेनस्वतःपरतोवेतिविवादपर्यवसानात्तज्ज्ञाततालिंगत्वपदार्थांतरतदभावएवविश्रामात्तदसांग विवाद
क्ष्यात्वानुमितित्वावच्छेदेनापविशेषणांतरप्रवेशापत्तितादृशज्ञानेतिप्रकृतप्रामाण्याश्रयज्ञानेत्यर्थःसामानाधिकर
ल ण्यघटितन्निरूपितंरतत्त्वविशेषणोपयाकृतमूलेंऽप्यमेवएतद्विशेषणोनचएवोपदर्शितयथार्थसंस्कारादिलिं
गकसामान्यधीसहकृतानुमितिग्राह्यतयाऽर्थांतरस्वारसंभवस्यदर्शितत्वात्तादृशज्ञानजन्यतयानैयायिक
सिद्धभिन्नत्वरूपोक्तविशेषणोपादानमिसवधेयंदर्शितज्ञाततालिंगकानुमित्यार्थांतरवारणायतादृशज्ञानजन्यत्वे
ननैयायिकसिद्धभिन्नत्वमुपेक्ष्यतादृशज्ञानजन्यभिन्नत्वेननैयायिकसिद्धत्वकेचिन्निवेशयंतिविशेषणोक्तज्ञाततालि
गकानुमितेस्तादृशज्ञानजन्यतयानैयायिकसिद्धभिन्नत्वेपिनतज्जन्यतयानैयायिकसिद्धत्वमतस्तत्रास्वतयानसि
द्धसाधनमितिवदंतितन्मतमुपन्यस्यतिकेचित्वितिनन्वेवमनुव्यवसायस्थलीयज्ञाततालिंगकानुमितेरपिभद्द

गदा॰प्र॰ मतेऽसंग्रहःतस्यानैयायिकासिद्धत्वादित्यतआहव्यवसायेतिव्यवसायानंतरंज्ञाततोत्पत्त्यधिकरणव्यवसायद्विती
१२ यक्षणमादायक्षणमादायव्यवसायक्षणत्रयस्यक्षणचतुष्टयस्यवामध्येजायमानमित्यर्थःज्ञाततोत्पत्तिद्वितीयक्षणेज्ञाततायाःप्र
त्यक्षव्याप्तिस्मरणयोर्भट्टमतेयुगपदुत्पादसंभवात्विशिष्टपरामर्शीयंयतस्यअनुमितावनपेक्षायांतृतीयक्षण
12 एवज्ञातानुमितेःसंभवोविशिष्टपरामर्शापेक्षायांतदाविशिष्टपरामर्शोत्पत्तिचतुर्थक्षणेऽनुमितिरित्याशयेनत्रि
चतुरेत्युक्तंनैयायिकैःसाक्षात्कारित्वेनैवेतिसाक्षात्कारित्वव्यवसायानंतरक्षणोत्पन्नत्वाभ्यामेवेत्यर्थःव्यवसायानं
तरक्षणोत्पन्नतयास्वीकृतत्वेनव्यवसायविषयकज्ञानाजन्यतयास्वीकृतत्वलाभःव्यवसायानंतरक्षणोत्पन्नतास्वी
कारेऽनुमितित्वोपगमेनसंभवतीतितद्धेतुतयासाक्षात्कारित्वोपगमाभिधानंएवकारेणानुमितित्वव्यवसायतृतीय राम॰
क्षणोत्पन्नत्वादिस्वीकारव्यवच्छेदःनतन्मतापरिग्रहःभट्टमतसिद्धज्ञाततालिंगकानुमित्यपरिग्रहःतस्याज्ञाततालिंग १२
कानुमितित्वेनन्यायमतासिद्धत्वेपितज्ज्ञानविषयकज्ञानाजन्यज्ञानप्रत्यक्षत्वेनतन्मतसिद्धतयैवतत्संग्रहसंभवादितिभा

वः ताद्दशाश्रयं प्रकृतप्रामाण्याश्रयं अपूर्वं प्रामाण्यग्रहात्स्वतोऽप्रतीतत्वान्नैवमिति प्रामाण्यस्य योगजधर्मवत्त्वेन तज्ज्ञानांशे
ग्रहान्निषेधसाधने बाध इति तन्मते योगितामभावेन तद्व्यवसायस्यापने विना सिद्धसाधनाव्यवस्थितेस्तत्त्रांज्ञानं च प्रामाण्य
स्य ज्ञानं विना प्रामाण्यप्रकारकत्वासंभवान्नायं दोषः योगजधर्मादेव प्रथमं प्रामाण्यग्रहेणाविशेषणज्ञाननिर्वाहे तज्ज्ञानेपि त्र
निखिलवस्तुभाने बाधकाभावात्तादृशज्ञानजन्मतयेव प्रामाण्यप्रकारकज्ञानस्य तदाश्रयविषयकज्ञानाजन्यत्वं तु
ष्टप्रामाण्यस्य तद्वति तत्प्रकारकत्वविशिष्टज्ञानत्वरूपत्वेन तज्ज्ञानांतर्गततमेव वैशिष्ट्यघटकतज्ज्ञानभानमिति वाच्यं प्रमा
ज्ञानं विनापि प्रमापदप्रवृत्तिनिमित्तत्वादिना प्रकृतप्रामाण्यरूपविशेषणास्मरणादि सहकृतात्प्रामाण्यघटकप्रका
रित्वादिस्मरणासहकृताद्वा योगजधर्मात्तत्प्रकारकप्रत्यक्षसंभवात् न चैवं वक्ष्यमाणरीत्या योगिज्ञानवारणेपि उप
दर्शितस्मरणादिजन्यप्रामाण्योपनीतभाने ज्ञानांशे लौकिकं प्रामाण्याश्रयविषयकज्ञानाजन्यमपि संभवतीति नि
वी षेधबाधोद्धारदुरुद्धर एवेति वाच्यं उपनीतभानस्थले दर्शितनियमसत्त्वे प्रामाण्याश्रयज्ञाने प्रामाण्यभानं विना तदंशे प्रा

तं२

प्र०गदा० माणोपोपनीतभानासंभवात्तज्ज्ञानांशे ग्राह्यत्वविरहस्य बाधासंभवात् प्रमायद प्रवृत्तिनिमित्तत्वादिनोपस्थितप्रका
१२ तप्रामाण्यरूपसामान्यप्रत्यासत्तिजन्यतत्प्रकारकप्रत्यक्षमादायापि न बाधः तत्संबंधेन सामान्यप्रकारकमेव ज्ञानं
तत्संबंधेन सामान्याश्रयभासकमितिमतस्यावलंबनीयत्वात् तादृशज्ञानस्य च प्रमारूपस्य प्रमाविशेष्यकत्वात्
13 व्यधिकरणप्रकारकाजन्यत्वेनांतर्मिज्ञानं विशिष्यप्रमाविशेष्यकप्रामाण्यरूपसामान्यप्रत्यासत्तिजन्यग्रहस्य वार ज्ञान
णीयत्वात् तावतैव च तज्ज्ञानविशेष्यतानिरूपितत्वविशेषितप्रकारतामात्रस्य ग्राह्यतास्वरूपत्वकल्पेऽभ्रमरूपपक्षं
व्याप्यत्वघटकतयापि प्रमात्वरूपसाध्याश्रयत्वेनाभ्रममवगाहमानेन परामर्शेणोजनितप्रामाण्यानुमितिमादाय
निषेधस्य बाधवारणासंभवतीति ध्येयं तदाश्रयपदेन तदाश्रयत्वग्रहविषयार्थकतयाऽभ्रमजन्यज्ञानव्यावृत्तिरित्यपि प्र०म०
केचित्तन्न वक्तव्यः न तज्ज्ञानपदेन विवक्षणीयः स्वपदस्याजन्यज्ञानरूपानुयोगिपरत्वे च रमज्ज्ञानपदेनानुव्यवसायादी १२
नोन्मायमतेनोपादानसंभवः तन्मते प्रामाण्यस्य तद्ग्राह्यत्वादिति प्रामाण्यग्राहकं च ज्ञानं तन्मते स्वग्राह्यप्रामाण्या

मिश्रा[illegible]नुसारेण समाधातुमुपक्रमंते केचिदिति २

ज२

ज्ञानस्यैवस्वपदेनोपादाना ५ ज्जन्यंत २

अथ ज्ञानजन्यमेवेति स्वपदार्थाप्रसिद्धिरतः प्रतियोगिनि स्वत्वमंतर्भाव्य भेदकूटं निवेशयति तथा चेति तज्ज्ञानसमा
नाधिकरणेति तज्ज्ञानसमानाधिकरणां यत्स्वग्राह्यप्रामाण्याश्रयतज्ज्ञानविषयकज्ञानं तज्ज्ञान्यत्वेन नैयायिकसिद्ध
पद्यत्वं तदन्यं ये तज्ज्ञानसमानाधिकरणं ज्ञानं तद्ग्राह्यं नेवस्यार्थः प्रथमसमानाधिकरणांतानुपादाने यद्यपि स्वग्रा
ह्यप्रामाण्याश्रयविषयकत्वेन परमेश्वरज्ञाननिवेशेऽपि न स्वाप्रसक्तेतज्ज्ञान्यास्मदादिज्ञानाप्रसिद्धिः प्रामाण्यविषय ६
कोऽनुमित्यादेरेव स्वपदेनोपादानात्तदन्यत्वनुपाजन्यत्वान्तार्थे स्वप्रामाण्याविषयकज्ञान एव प्रसिद्धेः प्रामाण्याविषयकं
च ज्ञानं न्यायमते प्रामाण्यविषयकत्वेन मीमांसकमतसिद्धं अनुव्यवसायादिकमयीति निषेधे साध्ये घटत्ववतीत्या
दिप्रामाण्यस्य तदग्राह्यत्वसिद्धेः प्रसंगहतया तत्संख्यकविप्रतिपत्तौ न काचिदनुपपत्तिः प्रामाण्यघटितप्रामाण्यपक्ष
कस्थले विषयीभूतप्रामाण्यविषयकस्वदंप्रमेसादिज्ञानानुव्यवसायादेर्न्यायमते स्वग्राह्यप्रामाण्याश्रयघटादि
ज्ञानविषयकेश्वरज्ञानजन्यत्वात्तदन्यज्ञानाग्राह्यत्वस्यैव तन्मते साध्यत्वात् अनुव्यवसायादेः प्रामाण्यग्राहकत्वा

नैयायिकानामुद्देश्यसिद्धिरिति घटत्ववतीत्यादिप्रामाण्यप ३

ग॰दा॰प्र॰ सिध्याद्युद्देश्यासिद्धिः उक्तप्रथमसमानाधिकरणांतोपादानेपितादृशानुव्यवसायादेः स्वग्राह्यविषयीभूतप्रामाण्याश्र
१४ यघटादिज्ञानविषयकेणैतद्धर्मिकप्रामाण्यप्रकारकोक्तव्यवसायरूपतज्ज्ञानसमानाधिकरणज्ञानेनजनितत्वादसंग्र
हेणासमानेवंतादृशप्रामाण्यस्यपक्षवहिर्भावेनसमाधिरपिसमानएवतथापिघटादिज्ञानानुव्यवसायस्यन्यायमते
14 पिघटत्वादिप्रकारकत्वेनतत्प्रामाण्यावगाहितया स्वग्राह्यप्रामाण्याश्रयव्यवसायविषयकपरमेश्वरज्ञानजन्यत
याप्रामाण्येनुग्राह्यतापर्यंतस्यचाविवक्षितत्वात्तत्कथितंपघस्तंतदन्यत्वंदुर्घटं एवंपुरुषांतरीयप्रमाविषयकान्यपु इति
स्व रुषीयप्रामाण्यज्ञानानुव्यवसायस्यैग्राह्यांतर्विषयीभूतप्रामाण्यतदाश्रयपुरुषांतरीयज्ञानविषयकेव्यवसायेतज्ज्ञानसा
मानाधिकरणापासत्वात्प्रथमसमानाधिकरणपदोपादानेतादृशानुव्यवसायस्याजन्यांतेनोपादानसंभवः तदनुपादानेतादृ
शानुव्यवसायस्यस्वग्राह्यप्रामाण्याश्रयविषयकेणान्यपुरुषीयज्ञानेनभगवज्ज्ञानेनचजनितत्वान्नतदुपादानसंभवइ राम॰
तिप्रथमसमानाधिकरणपदोपादानं।एवंप्रामाण्यधर्मत्वादिप्रकारकतद्धर्मिविशेष्यकत्वानीयप्रामाण्यस्ययत्रपक्षतात १४

त्रतादृशज्ञानानुव्यवसायस्याप्रामाण्यधर्मत्वादिप्रकारकत्वावगाहित्वेनोन्मायमतेपि अप्रामाण्यग्राहकतया स्वग्राह्यप्रा
श्रय माण्यविषयकेश्वरज्ञानजन्यतया प्रथमस्समानाधिकरणांतानुपादानेन संग्रहः स्यादिति तत्संग्रहायापि तदुपाद
नं द्वितीयसमानाधिकरणांतस्याप्रवृत्तिः एवं वेदत्वमिश्रमते जन्यभिन्नत्वानिवेशेपि न क्षतिः तन्मते स्वप्रतियोगिग्राह्यप्रा
माण्याश्रयविषयकज्ञानप्रागभावप्रयुक्तं यद्यत्वं तद्वत्प्रागभावप्रतियोगिज्ञानविषयत्वस्यैव विवक्षणीयत्वात् उ
प्रत्यक्ष·· क्तविवक्षया योगिज्ञानव्यावृत्तिं स्पष्टयति योगिप्रत्यक्षं चेति योगजधर्माधीनं प्रत्यक्षमित्यर्थः ज्ञानभिन्नत्वेनात्ममन तत्
नजन्यमिति यद्यपि तादृशमननस्य निदिध्यासनद्वारा सार्वज्ञ्यसंपादकधर्मविशेषहेतुतया योगजधर्मजन्यप्रत्यक्षे
प्रयोजकत्वमेव न तु जनकत्वं तथापि जन्यपदस्य प्रयोज्यपरत्वान्नासंगतिः साध्येपि जन्यत्वे सत्येन नाऽप्रयोज्यताया एव
विवक्षणीयत्वात् अत एव मिश्रैः प्राक् निदिध्यासनमुपेक्ष्य मननमेव तन्मूलमुक्तम् अनुपात्ते निदिध्यासनस्यापि जनकता
याऽप्रामाणिकत्वात् प्रयोज्यत्वघटितसाध्यस्यावश्यं विवक्षितत्वेन निदिध्यासनमूलमुक्तौ मननप्रयोज्यत्वस्यापि तदौ र

तत्समानविषयक१ ३१

गदा॰प्र॰ रांसंभवतीत्याशयात्तस्यात्मनोनित्यत्वादिबोधकवाक्याज्जन्यत्वादिसामान्यधर्मावच्छिन्नभिन्नत्वेपेवात्मनःश्रवणमस्ति श्रवणमु
१५ नतुज्ञानत्वादिरूपविशेषधर्मावच्छिन्नभिन्नतयातादृशधर्मावच्छिन्नबोधकागमाभ्युपेतरित्याशयेनैतद्दूयस्मिंतस्यश्रवणा
ज्ञानभानानियमात्ज्ञानविषयकज्ञानापेक्षायामेवविषयीभूतज्ञानस्यग्राह्यपत्तिंचित्प्रामाण्याग्रहतयासिद्धसाध
15 नवारणासंभवात्ज्ञानत्वावच्छिन्नभिन्नत्वेनात्ममननंचावश्यकंविज्ञानवादिसमुत्थापितज्ञानाभेदवासनानिवर्त्तकतेद्दृसा
क्षात्कारनिर्वाहकतत्रावैचरध्यानधारामूलमतज्ज्ञानाभेदवासनाबीजत्वात्ज्ञानत्वावच्छिन्नभिन्नत्वेनात्मनोनुमितौभेद
प्रतियोगितयासकलज्ञानभानेबाधकाभावःसामान्यलक्षणाप्रत्यासत्त्यानुमितिजनकसाध्यप्रसिद्धौसकलतज्ज्ञा
नात्वविशेषाभावकूटस्यसामान्याभावत्वमतेसामान्याभावभानेसकलप्रतियोगिभानमावश्यकमेवसामान्यधर्मेविशेषि
तं तस्वस्वप्रतियोगिप्रकारकत्वावर्त्तदभावानांभानात्अन्यथात्वमत्वायतेरवंचप्रकृतप्रामाण्याश्रयमात्रनिवेशपियोगिप्रस गम॰
क्षवारणासंभवइत्याशयेनाहवस्तुतइतिअत्रेवसमाधानस्यनिर्भरःअनागतेतिअनागतत्वंग्राहकज्ञानाधिकर १५

श्र

णाकालापेक्षयाविचारकालापेक्षयैववाच्यत्वं अन्यथाजन्यमात्रस्यैव किंचित्कालापेक्षयाऽनागतत्वेन प्रामाण्या-
ग्राहकत्वेनाभिमतानामनुव्यवसायादीनामनागतव्यवसायादिविषयकत्वेन निर्दिष्टमात्रविषयकज्ञानस्यैवानागताविष- स्य
यकतया बाधापत्तेः ननु एवं योगिज्ञानस्येव परमेश्वरज्ञानस्याप्यनागतविषयकत्वेन वारणात् अतिमज्ञानेन तज्ज्ञानसामाना-
धिकरण्यविशेषणमनुपयुक्तमिसाशंक्य तस्यापि त्यजति नो पाठं एंचेति ननु अनागताविषयकत्वेनेति मज्ञानविशेषणे
अनागतत्वप्रागभावसमानकालीनत्वादिप्रकारकज्ञानप्रामाण्यबाधः तादृशप्रामाण्यग्रहस्य तद्घटकानागतविष-
यकत्वनियमादिसत आह अनागतेति अनागतविषयकज्ञानमात्रस्य प्रामाण्यं पक्षाद्बहिर्भावनीयमित्यर्थः घटत्वव- निष्ठ
तीत्यादिप्रामाण्यस्यानागतघटादिघटितत्वेपि अतीतादिघटमात्रविषयकानुव्यवसायादिनापि ग्रहात् साध्यसत्वेन न
पक्षबहिर्भावः यदि च विशेष्यव्यक्तिभेदेन घटत्ववतीत्यादिकं प्रामाण्यमपि भिद्यते एवं तद्घटितत्वात् तथा चानागतघटा-
दिव्यक्तिघटितस्य तस्यानागताविषयकज्ञानग्राह्यतेति बाधो दुष्परिहर एवेति मन्यते तदा तत्कालीनविचारतदं-

गदा०प्र० तरोत्पत्स्यमानघटादिव्यक्तिघटितंघटत्ववतीत्यादिकंपक्षाद्बहिर्भावनीयमेवग्राहकज्ञानापेक्ष्यात्वनागतत्वनिवे
शेत्वनागतघटादिघटितंतादृशप्रामाण्यमपितादृशघटादिपूर्वकालेतत्कालीनतज्ज्ञानानुव्यवसायादिनाग्राह्यत्वे
१६ यात्वनागतघटादिव्यक्त्यंतरमनवगाहमानेनगृह्यतइतितत्रसाध्यसत्वेनतस्यपक्षांतर्भावोपिसंभवतियादृशघटादिव्य
16 क्तिःपूर्वकालीनेनैवानुव्यवसायादिनायद्व्यक्तिघटितप्रामाण्यंविषयीकृततादृशव्यक्तिःप्रामाणिकत्वेतद्व्यक्तिघटितमेव
तत्पक्षाद्बहिर्भावनीयमितितिबोध्यंनन्वेवंघटभिन्नत्वादिसामान्यजज्ञानस्यानागतविषयकत्वविशेषणेनैववारणेप्र न
वोक्तप्रकारतानिवेशव्यर्थइत्यसंगतिरित्यतआहएवंचेत्यादीतितेनानागतविषयकत्वविशेषणेननवार्यतेइति
तथाचतादृशज्ञानविषयतावारकत्वेनैवप्रकारताविवक्षणस्यावश्यकतेतिभावःतज्ज्ञानभिन्नेतिप्रकृतप्रामाण्यपात्रयभि जु
न्नेत्यर्थःप्रतियोगिकोटौज्ञानत्वप्रवेशवैयर्थ्यात्अनुयोगिनिज्ञानत्वविशेषणमप्रसिद्धिवारकंसविषयमात्रस्येवज्ञा राम०
नादिभिन्नविषयत्वात्ततश्रुतिमज्ज्ञानेत्र्यनेनापिविशेषणेनविष्णुविषयकस्ययोगिज्ञानस्येवभगवज्ज्ञानस्यापिवारणा १६

ऽतत्रसामानाधिकरण्यविशेषणामेतत्कल्पेप्यनुपादेयंएवंचप्रकारतापर्यंतस्यैवात्यतानूपत्वविरहेपिननिषेधा
प्रसिद्धिरित्याह इत्थंचेतिज्ञानांतरेतज्ज्ञानभिन्नत्वसुलभइतितज्ज्ञानभिन्नज्ञानस्यतज्ज्ञानभिन्नज्ञानाविषयकज्ञानविषय
त्वासंभवादितिभावः एतत्कल्पे एवंकल्पेचज्ञानत्वादिप्रकारकज्ञानानुव्यवसायस्यसामान्यलक्षणायायावज्ज्ञान
विषयकत्वेबाधकाभावान्नापमतेप्रकृतप्रामाण्याश्रयभिन्नज्ञानाविषयकत्वेनानागतविषयकत्वेनचैतादृशज्ञानी
यप्रामाण्यपरतस्त्वसाधनेसिद्धसाधनात्रस्यपक्षबहिर्भावावश्यकत्वेसामान्यतोज्ञानविषयकज्ञानाजन्यत्वनिवेश
एवभवतितादृशज्ञानजन्यतयानैयायिकसिद्धभिन्नत्वस्यावश्यकतयाभ्रमतयपरिग्रहस्यापिसंभवादित्यस्वरसः त
याश्रयगर्भमितितथाचप्रामाण्याश्रयज्ञानस्यप्रामाण्यघटकतयातद्विषयकज्ञानजन्यतयैवयोगजधर्मजन्यप्रामा
ण्यप्रत्यक्षवारणंसंभवतीतिभावः आश्रयघटितत्वेपियोगिनांतज्ज्ञानेकथमाश्रयज्ञानापेक्षेत्याशंकांयामाह नचे क्षा
तिनैयायिकानामित्यनेनस्वतस्त्ववादिनांमीमांसकानांविशिष्टबुद्धौविशेषणज्ञानहेतुत्वानंगीकारात्प्रामाण्यघ

गदा॰प्र॰ १७ प्रकारक

विषयक१

टकतदाश्रयैज्ञानस्यपूर्वमसत्त्वेपिप्रथमानुव्यवसायादिनातन्मतेप्रामाण्यग्रहसंभवान्नबाधइतिदर्शितंननुयोगिज्ञा
नेविशेषणधियोहेतुत्वेलौकिकसंनिकर्षवत्योगजधर्मस्यापिनिर्विकल्पकजनकत्वोपगमःस्यादित्यत्रेष्टापत्तिमा
हयोगजधर्मस्येतिसार्वज्ञ्यसंपादकमितिस्वरूपतोघटत्वादिप्रकारकस्यसघटोनवेत्यादिसंशयनिवर्त्तकस्यसघ
टइत्याद्याकारकनिखिलधर्मज्ञानस्यसंपादकमित्यर्थःस्वरूपतोघटत्वादिप्रकारकबुद्धौस्वरूपतस्तद्ग्रहस्यहिज्ञान
स्यहेतुतयासामान्यलक्षणयासार्वज्ञ्यस्यवारणायावश्यवक्तव्यतयानिर्विकल्पकंविनातादृशज्ञानासंभवादितिभा
वःनचविशिष्टबुद्धिंप्रतिविशेषणधियोहेतुत्वेपिप्रामाण्यघटकविशेषणानांज्ञानसत्त्वेज्ञानस्याज्ञातस्यापिसंस
र्गतयाभानेबाधकाभावःसंसर्गस्याप्रकारत्वादितिकथंयोगिज्ञानंवारणीयमितिवाच्यंविशिष्टविशेषणकज्ञाने
विशिष्टस्यैवविशेषणस्यधियोहेतुतयाविशिष्टप्रामाण्यप्रकारकज्ञानेविशिष्टप्रामाण्यज्ञानहेतुतायाआवश्य रम॰ १७
कत्वेनविशिष्टप्रामाण्यज्ञानस्यैतद्घटकाश्रयविषयकत्वनियमेनविशिष्टप्रामाण्यप्रकारकबुद्धेस्तदाश्रयैज्ञाना

च१

विषयक

नन्वप्रत्वासंभवात्तद्धतितत्प्रकारकत्वसामानाधिकरण्यविशिष्टमेववाज्ञानत्वंयक्षस्तज्ज्ञानेचसामानाधिकर
ण्यघटकस्याश्रयस्यप्रकारतानियमात्तज्ज्ञानापेक्षानिष्प्रत्यूहैवननुसर्वज्ञानेगुणाइत्यादिज्ञानीयसर्वविशे ज्ञान
ज्ञान ष्यताघटितप्रामाण्यंसर्वविषयकव्यवसायाधीनेनैवानुव्यवसायेनमिश्रमतेगृह्यतेतथाचतन्मतेत
त्रबाधःतादृशव्यवसायस्यतादृशप्रामाण्याश्रयविषयकत्वनियमादित्यतआहयदिचेतिविनाश्रयत्र
स्वा हेतुंद्वयेहमितिआश्रयस्यैवनियमतंत्रौश्रयेग्रहणरूपत्वादितिभावः अत्रचज्ञानमित्याद्याकारकज्ञानस्यैव
सर्वज्ञानमित्याकारकस्यापिसर्वज्ञानविषयकत्वानियमः नचपर्याप्तिसंबंधेनसर्वत्वप्रकारकस्यसर्वत्वप
सर्वा र्याप्त्यधिकरणविषयकत्वेनैवप्रमात्वमेवननिर्व[illegible]तीतितादृशप्रमायाःसर्वज्ञानविषयकत्वनियमइतिवाच्यं
यस्य समुदायपर्याप्त्यनुयोगित्वेतदंततःपातिनएकैकस्यादेरपितदावश्यकत्वात्तन्मात्रविषयकसर्वत्वज्ञानस्यापि
प्रमात्वस्यदुर्निवारत्वात्। एकोयंघटावित्यादिबुद्धेरप्रमात्वस्यकथंचिदुपपादनीयत्वात्।तथाचसर्वत्वप्र

गदा॰प्र॰ कारकज्ञानविषयकस्यापि सर्वं ज्ञानमिति प्रमात्मकज्ञानस्य संभवात्तदनुव्यवसायस्य दर्शितप्रामाण्याश्र
यज्ञानविषयकज्ञानाजन्यत्वं संभवतीत्यालोच्य यदि चेत्युक्तं अत्रापि तदिति तत्प्रकारकत्वमात्रं प्रवृत्त्युपयु
१८ क्तं न तु तद्विशिष्टज्ञानत्वपर्यन्तं। इत्थं च विशिष्टे स्वतस्त्वसाधने तद्वति तत्प्रकारकत्वे स्वतस्त्वसिद्धावपि विशि
18 ष्टस्य परतस्त्वसाधने न तद्वति तत्प्रकारकत्वे परतस्त्वसिद्धिरिति तन्मात्रस्य पक्षत्वमुचितं न विशिष्टस्येस स्वा
सः उक्तिभङ्ग्या उक्तमिति नैयायिकसिद्धप्रामाण्यग्राहकानुमित्यादेः आपशस्तदाश्रयविषयकज्ञानजन्यत्वा
दिति भावः एवं च योगिज्ञानादेः प्रामाण्यग्राहकतया नैयायिकसिद्धतया तद्भिन्नत्वाभावेन सिद्धसाधनोद्धारः
अथैवमुक्तायास्तज्ज्ञाने निषेधप्रसिद्धेरनवकाशः नैयायिकमते यादृशज्ञाने न प्रामाण्यं नावगाह्यते ताद राम॰
शेऽपि प्रत्यक्षादौ प्रामाण्याश्रयज्ञानस्योपस्थितस्य प्रकारत्वादित्याशंक्यान्यत्र निषेधप्रसिद्धिं दर्शयति १८
निषेधेति प्रामाण्यत्वेति प्रामाण्यत्वस्य प्रमेतरावृत्तित्वादिघटितस्य प्रामाण्यविषयकज्ञानेनैवावगाहनात्तत्॥

न्यायमतसिद्धप्रामाण्यविषयताकान्यज्ञानविषयत्वाभावस्य सुलभत्वादिति भावः नैयायिकसिद्धप्रामाण्यग्राह
कभिन्नप्रथमानुव्यवसायादिना मीमांसकमते प्रामाण्यत्वविशिष्टप्रामाण्यावगाहनेन प्रामाण्यत्वेन मतद्वये साध्य
प्रसिद्धिरिति न शंकनीयं तद्विशेष्यकत्वावच्छिन्नत्वतन्निरूपितत्वसहितप्रकारितात्वरूपाखंडधर्मरूपप्रामाण्यत्वस्यै
व मीमांसकमतेऽनुव्यवसायादिनाग्रहात् ननु प्रमेतराऽवृत्तित्वादिघटितस्य तस्यैव च प्रकृते विवक्षितत्वात्स्वाष्ठ
तार्थे स्थलांतरं दर्शयति प्रामाण्याभावत्वेति अत्र च विशिष्टप्रामाण्यविषयकान्यज्ञाने प्रामाण्यत्वप्रामाण्याभावत्वादि
घटकविशेष्यस्य विषयतया विशिष्टेपि विशेष्ये तदभावस्य न प्रसिद्धिसंभव इत्यस्वरसः न स्वैकेद्दिति तथा च मतद्वय
साधारणविधिकोटिप्रयासो व्यर्थ इति भावः नन्वेवं यावत्सदाभावात्प्रामाण्याश्रयप्रामाण्यानुमित्यादियावत्तया
सिद्धसाधनं यावत्त्वनिवेशे प्रामाण्यभानविरोधिदोषादिसमवहितस्वाश्रयेणाग्रहाद्बाध इत्यत आह रीति तु नैवेति
एवं च देवकारत्वलाभादेव सामग्र्यां यावत्त्वलाभः प्रामाण्यग्रहप्रतिबंधकासमवहितत्वविवक्षया च बाधः परिहरणी

यद्दत्यर्थः मिश्रमते भट्टमते विप्रतिपत्तेरप्रदर्शनेन मूलस्य न्यूनतास्यादितीतिशब्दस्यैव तत्प्रदर्शकतामाह इतीत्यनेन
प्रकारेणेति विशिष्य मिश्रादिमते विप्रतिपत्तिं स्वयं दर्शयति मिश्रेति स्वाश्रयानुव्यवसायेनेति यात्त्वनवत्यग्रिमेणान्व
यः स्वाश्रयविषयकलौकिकप्रत्यक्षविषयो न वेत्यर्थः उपनीतभानादिविषयत्वेन सिद्धसाधनवारणाय लौकिक
प्रत्यक्षीयत्वं तन्निवेशः प्रमाविषयो घट इत्याद्युपनीतभानस्यापि घटांशे लौकिकत्वात्स्वाश्रयो यादाने तथा सति स्वा
श्रयांशे लौकिकत्वविवक्षया तद्वारणं वोध्यं न चैवमपि स्वाश्रयांशे लौकिकप्रामाण्योपनीतभानमादाय सिद्धसाधनं दु
र्वारमेवेति वाच्यं एतदस्वरसेनैव द्वितीयकल्पानुसरणात् अथवा स्वाश्रयानुव्यवसायपश्चात्यत्वं ज्ञानविषयत्वाप्रयोज्य
मानसप्रकारताश्रयत्वं प्रामाण्यांशे उपनीतमानीयतदीयविषयता उपनायकज्ञानविषयताप्रयोज्यैवेति नोक्तसिद्धसाध
ने अभिधेयत्वादिसामान्यलक्षणाजन्यप्रत्यक्षविषयत्वेन सिद्धसाधनवारणाय प्रकारतानिवेशः अभिधेयत्वादिना
वस्त्वन्तरविषयकपरामर्शादिजन्यतद्रूपावच्छिन्नानुमित्यादिप्रकारतया तन्मते अर्थान्तरवारणाय मानसप्रवेशः अनु

पस्थितंप्रामाण्यंघटत्वप्रकारितात्वादिनापिन्यायमतेनानुव्यवसायेप्रकारःअतोननिषेधसाधनेवाधःयोगजज्ञानीय
प्रकारतायिविशेषणाज्ञानविषयताप्रयोज्यैवेतिनतयासिद्धसाधनंतादृशप्रकारताऽभावत्वप्रतियोगित्वादौन्यायमतेऽप्र
सिध्यतितस्यातुपस्थितस्यैवप्रकारतायाःसिद्धांतसिद्धत्वात्तादृशप्रकारताविरहश्चघटादावेवसुलभःप्रामाण्यज्ञाना
जन्यप्रत्यक्षप्रकारत्वविवक्षातुनसाधुःपरमतेतदभावाप्रसिद्धेःनचप्रामाण्यंस्वपदेनोपादेयंतथाचगुरुत्वादिप्रामा
ण्यादिज्ञानाजन्यप्रत्यक्षप्रकारत्वाभावस्यगुरुत्वादौप्रसिद्ध्यासामंजस्यमितिवाच्यंएकस्वपदार्थघटितविधिकोटे
रपरतद्घटिताभावेनसहाविरोधात्नवाविरुद्धकोटिकोयिसंशयःसंभवतिनैवस्वविषयकज्ञानाजन्यप्रत्यक्षप्रका
रत्वाभाववघघत्स्वतद्भेदकूटरूपंस्वतत्त्वपरैःसधनीयंतादृशस्वत्वरूपंतादृशभेदकूटाभावरूपंवापरतस्त्ववास्म
भिस्तत्रचनानुपपत्तिरितिवाच्यंतादृशस्वपदेनप्रामाण्यमुपादायतद्भेदसाधनेवाधात्परमतेप्रामाण्यस्यस्वपदेनोपा
दानेनासंभवाच्चअप्रामाण्यादिमात्रोपादानेचसिद्धसाधनात् यत्तुस्वाश्रयघटितसन्निकर्षमयोऽपविषयताश्रयत्वं

गदा॰प्र॰ स्वाश्रयानुव्यवसायग्राह्यत्वं तद्सत्त्वान्नायमतेपि घटत्वप्रकारितात्वादिना प्रामाण्यस्य लौकिकसन्निकर्षाधीनभानवि
२० षयतया निषेधसाधने वाधादित्यलं यत्नत्वेन यावद्भिवातिरिति प्रामाण्यभानप्रतिबंधकसमवधानानंतरक्षणानुत्पन्न
20 स्वाश्रयलौकिकप्रत्यक्षैर्लंयत्नत्वेन यावद्भिवतिरिति प्रामाण्यभानप्रतिबंधकसमवधानानंतरक्षणानुत्पन्नस्वाश्रयलौ
किकप्रत्यक्षैर्यावद्भिर्ग्रहीतं न वेत्यर्थः उपदर्शितरीत्यासिद्धसाधनस्य वारणा। यथा यावत्पदं प्रामाण्याविषयकज्ञानोप
नीतभानायास्त्वततया वाधवारणाय लौकिकत्वनिवेशनं शेषं पूर्ववदिति प्रामाण्यभानप्रतिबंधकसमवधानानंतक्षणानु
त्पन्नत्वंनिवेश्य प्रामाण्यमात्मकानुव्यवसायग्राह्यत्वेन वाधो वारणीय इत्यर्थः प्रामाण्याविषयकत्वेनेति प्रामाण्य
विषयकत्वेन भट्टमतसिद्धयावज्ज्ञातस्यत्वस्य साध्यत्वे ज्ञाततालिंगकानुमितेर्नैयायिकासिद्धतया तन्मतसिद्धप्रामाण्य
ग्राहकमेव तन्मते यावदंतर्गततया च यावज्ज्ञातस्यत्वाभावसाधने वाध इत्यभावद्वयगर्भे तातदुपादाने भट्टमतासिद्धा राम॰
नुव्यवसायस्य यावदंतर्गततया नाभावसाधने वाधः यद्यपि प्रामाण्यविषयकानुमितित्वेन भट्टमतसिद्धोन्यायमते २०

अनुव्यवसायोयीतिनिषेधद्वयानुपादानेपिसामंजस्यंतथापिव्यवसायसन्निहितज्ञानग्रहेप्रामाण्यविषयक
त्वानुमितित्वभ्रमत्वरूपतानभ्युपगम्यापितुउभयसिद्धकालीनतरीरणानुमितोव्यवसायसन्निहितत्वभ्रमत्वरूपते
वेसस्यापिसंभवस्तथासतिचानुव्यवसायस्योक्तरूपेणापिभ्युपगन्तत्वासंभवइत्याशयेननिषेधद्वयनिवेशनंज्ञा
नत्वेतिज्ञानत्वघटितप्रामाण्यमेवप्रामाण्याविषयकेतिप्रामाण्यपदेनविवक्षितमित्याशयेनयाथार्थ्यमात्रविवक्षा
नुसारेणप्रामाण्यघटकघटत्वादिरमादिपदंवक्तमात्रस्यैवप्रामाण्यघटकतयातद्दितिविशेषणानचैवमपिमय
त्वादिमतीत्यादिप्रामाण्यंयत्रप्रकृतेतत्रतद्घटकाप्रसिद्धिरितिवाच्यंतादृशप्रामाण्यघटकविशेष्यमेयव्यक्तीनांभे
देनतस्यापिभिन्नतयाप्रत्येकंतद्घटकस्यतत्रतत्प्रामाण्यविषयकत्वावच्छिन्नविषयत्वाभावस्यचप्रसिद्धेःमनुयोगिज्ञाना
दिरेवघटत्ववतीत्यादिप्रामाण्यस्यतद्विषयकज्ञानान्तरेपिसत्वात्तयावत्स्वाश्रयप्रयात्स्वत्वमितिसिद्धसाधनामस
स्यापत्तिरित्यादिमूलासंगतिःनचसर्वविषयकयोगिज्ञानादिमात्रविषयतदंकुरत्वादिनप्रकारघटितप्रामाण्यसि

 द्धसाधनवासायरतयानत्संगतिरितिवाच्यंप्रामाण्यत्वस्यसर्वप्रामाण्यसाधारण्यस्यैकस्याभावाद्धटत्ववतिघट
 त्वप्रकारकत्वत्वादेरेवपक्षतावच्छेदकत्वाद्योगजधर्माघजन्यत्वविशेषणस्याव्यावर्तकत्वादित्याशंक्यतानव्यक्तिने
देनप्रामाण्यभेदइतिमतमालंब्यतत्संगमयतिनन्वित्यादिनाप्रतिज्ञानंभिन्नत्वादितिविशेष्यिताप्रकारिताया:
 स्वरूपसंबंधात्मकत्वेनतज्ज्ञानस्वरूपत्वादितिभावः ईश्वरज्ञानवृत्तिप्रामाण्यतद्व्यात्वेश्यतःसिद्धसाधनंयोगजधर्मा
घजन्यत्वस्यज्ञानविशेषणात्त्वापितुर्वास्मतोजन्यत्वरूपविशेषणांतरमपिदूरयतिजन्येतिचेति॰ पक्षसंकोचंविना
साध्यघटकस्वाश्रयउक्तविशेषणप्रवेशेयोगिज्ञानादिव्यक्तिप्रामाण्यस्यतादृशविशेषणाक्रांतस्वाश्रयाप्रसिद्ध्यासा
ध्याप्रसिद्धिरितिमूलस्यविशेषणायदस्यपक्षप्रविष्टज्ञानविशेषणपरत्वंस्पष्टयतिपक्षविशेषणमितिप्रामाण्य
मात्रेतिग्रंथस्यपरकीयसिद्धसाधनप्रसक्तिदूषणपरत्वंनसम्यक्सामानाधिकरण्यमात्रेणसाध्यसाधनोद्देश्यत
पापितत्प्रसक्तेःतत्पक्षावलंबनेनैवविशेषणादानसंगतेश्चस्वयमपिपक्षतावच्छेदकैकदेश्यंशतःसिद्धसाधनंदो

षइतिप्राचीनमतानुसारेणपक्षविशेषणस्यानेकत्रोपात्तत्वादित्यतःपक्षविशेषणमनुपादायस्वीयपूर्वपक्ष
समाधानपरतयातंसंगमयतिस्वयमितिद्वेषणंसिद्धसाधनत्रयंज्ञानव्यक्तिभेदभिन्नघटत्ववतीत्यादीनामन
नुगमेनपृथक्पृथक्पक्षत्वेपक्षतावछेदकैक्याभावादवछेदकावछेदनसाध्यसिद्धेरुद्देश्यतयायिनसि
द्धसाधनपरीहारःसंभवतीत्याशंकांनिरस्यतितद्धदितिअनुगतेनेतिविशेष्यितादेर्ज्ञानादिस्वरूपत्वेपिअ
नुगतप्रतीतिनिर्वाहायविशेष्यितात्वादीनामनुगतानामतिरिक्तानामवश्योपगंतव्यत्वादितिभावःपक्ष
त्वात्पक्षघटकत्वात्पक्षतावछेदकेक्येपितत्सामानाधिकरण्येनसाध्यसिद्धेरेकदेशेसिद्धिर्विरोधिन्येवेत्य
तआहपक्षतावछेदकावछेदेनेतिनांशतःसिद्धसाधनंदोषनिषेधसाधनतत्रांशतोवाधान्नदनुपपत्ति
रित्यतआहनिषेधेतितांशतोवाधोद्दूषणमितिशेषःकिंचिज्ज्ञानप्रामाण्यस्यपरतस्त्वसिद्धौयादृशकारण
विरहात्तत्रस्वतस्त्वंतादृशकारणविरहादन्यत्रापियोगजधर्मोघजन्यज्ञानेप्रामाण्यस्यस्वतोग्रहणासंभ

गदा॰प्र वइति सामानाधिकरण्यमात्रेण स्वतोग्राह्यत्वाभावसाधनेपि नैयायिकाभिमतसिद्धिरिति भावः मिश्राणां
२२ समानाकारकत्वानाज्ञानप्रामाण्येप्यपि अंशतः सिद्धसाधनप्रसंगसंगमनप्रकारमुपन्यस्यति केचित्त्वि
त्ति सर्वेषां विशिष्योपादानासंभवादिति घटत्वपटत्वादिघटितानंतप्रामाण्यानां घटत्ववति घटत्वप्रकारक
22 त्वादिना सर्वज्ञानासंभवेन सर्वत्रैकदा स्वतस्त्वादिसाधनासंभवादित्यर्थः ननु प्रमापदप्रवृत्तिनिमित्तत्वे
न पक्षत्वेऽवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यतया स्वयमंशतः सिद्धसाधनपरिहरणस्यासंगतिः विशेष्या
वत्त्वप्रकारकत्वादिरूपप्रामाण्ये स्वतोग्राह्यत्वस्यांशतो वाधादित्याशंक्य तस्य प्रमापदप्रवृत्तिनिमित्तत्वं निरा
करोति न तत्प्रवृत्तिनिमित्तं चेति मन्मत एवेति तद्वति तत्प्रकारकत्वं तद्वति तद्विशिष्यज्ञानत्वं वा प्रामाण्यमित्याद्यग्रिम
चिंतामणिग्रंथ एवेत्यर्थः योगिज्ञानेन ज्ञानमिदं सर्वविषयकमित्याकारकयोगिज्ञानादिनेत्यर्थः ग्रहणात् राम॰
प्रामाण्यघटकसर्वांतर्गतत्वेन प्रकारतया विषयीकरणात् ग्राह्यतातायाः प्रकारतानूपत्वे सर्वत्ववति सर्वत्वप्र २२

कारकत्वरूपप्रामाण्यस्य सर्वमित्याकारकस्याश्रययावज्ज्ञानाप्रकारतया न सिद्धसाधनप्रसक्तिरिति सर्ववि
षयकत्ववतीत्यादिप्रामाण्यानुसरणं अत्र च साध्ये स्वपदेन विशिष्य घटत्ववतीत्यादिकमेवोपादेयं न तु प्र
मापदप्रवृत्तिनिमित्तत्वेन तदाश्रययावज्ज्ञानीयत्वस्य क्वचिदपि प्रामाण्येऽसत्त्वात्तथा चैकदा सकलप्रामाण्य
साध्यसाधनासंभवः एतन्मतेऽपि विशिष्य घटत्ववतीत्यादौ घटत्ववतीत्यादिप्रामाण्याश्रययावज्ज्ञानीयत्वास
त्त्वेनांशतो बाधश्च दुष्परिहरः यत्किंचित्स्वाश्रयायाथार्थ्यं यद्घटत्वं तद्भेदकूटस्य सर्वसाधारणानुगतस्य साध्य
त्वे च तादृशस्वपदेनाप्रामाण्यादिमात्रोपादाने सिद्धसाधनं प्रामाण्यस्याप्युपादाने बाध इत्यादिकमस्वरस
वीजं न च स्वयमपि घटत्ववतीत्यादिप्रामाण्यस्य ज्ञानव्यक्तिभेदेन भेदमुपगम्य योगजधर्माप्रजन्यत्वविशेषणो
नपरेषां सिद्धसाधनवारणाय घटत्ववतीत्यादिप्रामाण्यस्यानुगतत्वमुपगम्य च पक्षतावच्छेदकैक्यं निर्वाह
णमणिकाराणां तद्वारणस्य च संगमितत्वादुक्तानुपपत्तिरिति चेत्स्वसाध्ये घटत्ववतीत्यादेरनुगतरूपेणातिवेश

गदा० तदाश्रययावज्ज्ञात्यत्वस्यप्रसेकंसर्वत्रप्रामाण्यव्यक्तौबाधात्तद्व्यक्तित्वेननिवेशोपित्रंशतोबाधस्यदुष्परिहर
२३ त्वादितिवाच्यंस्ववृत्तित्वग्राह्यत्वोभयसंबंधेनज्ञानवत्वस्यसाध्यतयाबाधानवकाशात्तज्ज्ञानव्यक्तिभेदेनाभेद
मभ्युपगच्छतांमिश्राणांमतेउक्तसाध्योपगमेपिलिंचित्त्वाश्रयग्राह्यत्वतयासिद्धसाधनस्यदुर्वारत्वात्ननुविशि
23 ष्टज्ञानत्ववाप्रामाण्यस्वस्यनतेनेवनवानुव्यवसायेनेत्यादिग्रन्थमसंगतंविशिष्टज्ञानत्वस्यसप्रकारकत्वा
नत्वत्रयस्यवैशिष्ट्यविषयकज्ञानत्वत्रयस्यवाज्ञानग्राहकसामग्र्याग्राह्यत्वेबाधकाभावात्पुरोवर्त्तिनिघटत्वप्र
कारकत्वादेर्मीयमतेप्यनुव्यवसायेनग्रहणादित्याशंकांनिरसितुंविशिष्टज्ञानत्वंव्याचष्टेविशिष्टज्ञानत्वमि
तितत्रतद्विशिष्टज्ञानत्वमित्यर्थः अगृहीतासंसर्गेतितत्रधर्मिणिअगृहीतोऽगृह्यमाणोऽसंसर्गोयस्यधर्मस्य
तद्धर्मिविषयकत्वेसतितद्धर्मविषयकज्ञानत्वमित्यर्थः नायंघटइतियथार्थज्ञानस्यपटादिरूपधर्मिणोघटत्वा एम०
दिविशिष्टबुद्धित्ववारणायासंसर्गाग्रहनिवेशः धर्मधर्मिभ्यांप्रत्येकमन्वितस्यविषयतात्द्वयस्यपृथक्ज्ञानयो २३

रप्यन्वयःसंभवतितथासतिज्ञानद्वयमपिधर्मधर्मिगोचरज्ञानेनैवलभ्यतेअतएकपदस्यधर्मधर्मिविषयकत्वयोःसा
मानाधिकरण्यलाभसंपादकस्यएकस्मिन्ज्ञानेउभयान्वयपर्यंतासर्थस्यलाभायप्राक्पदेनानुपस्थितिपदस्य
समासेघटानधिकरणमित्यादौघटाधिकरणभेदादिवत्सर्वकालीनोपस्थितेर्विरहःप्रसक्तुंशक्यतेसचनविव
क्षितःकिंतूपस्थितिनिरूपकारणाभावएवकालीनत्वमेवतादृश्येवकारणाभावस्योत्तरकालेकार्याभावनिर्वाह
कत्वादतोऽसमासंस्फुटयतिप्राक्पूर्वमितिविशेषणस्यप्रागनुपस्थितौतत्तद्विशिष्टस्यज्ञातुमशक्यत्वादितिमूल
कृतोभिधानंविशेषणाज्ञानेहेतुतानंगीकर्तॄमीमांसकमतेनप्रामाण्यस्यस्वतोग्रहदूषणासमर्थमित्युपस्थितिपदंस्मा
यमतेयथाश्रुतार्थकतयायंरमतेतत्सामर्थ्योपरतयाव्याकुरुतेअनुपस्थितावितितस्यप्रथमंदुर्निरूपत्वादितिमू
लेतस्यदस्यप्रमाणस्यज्ञाततानिष्ठत्वेज्ञातसत्त्वेज्ञाततात्वस्यवत्तथाप्यवेज्ञातस्याविप्रथमंप्रसक्षेरणसुग्रहतयादुर्नि
रूपत्वादित्यसंगतंप्रमाहितत्वपरत्वेप्रमात्वघटिततयातस्यप्रथमंदुर्निरूपत्वाभिधानोपपत्तावपितस्यप्रथमंसुग्रह

ग.दी.प्र. त्वाप्रसक्त्यात्तस्य तु यद्वत्त्वऽइत्यर्थकस्याग्रिमस्यान्यथेत्यस्यासंगतिरतो विशेषं वितर्क्यार्थमयं संगमयति प्रमाहितत्वमे
वेत्यादिना विशेषः प्रमात्वविशिष्टानुमापकतावच्छेदकोऽप्रमाहितज्ञाततताव्यावृत्तो धर्मः प्रमात्वविशिष्टानुमापकता
२५ वच्छेदकवैजात्यरूपविशेषस्य तु यद्वत्त्वस्यान्यथेत्येतदर्थस्याप्रमाहितज्ञाततयाऽप्रमात्वस्य स्वतोग्रहानापादकत
25 याऽन्यथेत्यस्यासंगतिमाशंक्य प्रमाजन्यतावच्छेदकजातिविशेषस्वीकारस्य तुल्यगुणत्वाऽप्रमाजन्यतावच्छेदकजा
तिप्रसंजकतयाऽप्रामाण्यस्य स्वतोग्रहप्रसंजकत्वं वर्णयति प्रमयेति एवं चाप्रमाजन्यतावच्छेदकमपि ज्ञाततानिष्ठं वै
जात्यमनुपलंभबाधितमिति मूलाशयः घटत्वादिवैशिष्ट्यस्य तत्समवायानुपलेतदवगाहित्वघटितं प्रामाण्यं न गुरु
मद्वयोरनुमितिरिति स्वयं वक्ष्यमाणत्वात्तथा वैशिष्ट्यमात्रघटितवैशिष्ट्यमिति धर्मधर्मिभावो धर्मत्वं धर्मित्वं च तद्वत्तयोरपि वि राम.
शिष्टबुद्धिविषयत्वात्तानुमतमिति न समवायपक्षे वक्ष्यमाणदोषावसर इति भावः तस्य समवायस्य अनभ्युपगमा २५
दित्यत आह नान्वयः तैर्द्विपकत्वस्यानभ्युपगमादिति तथा च तदवगाहित्वप्रत्यक्षप्रमायामसंभवीति भावः धर्मधर्मि

भावस्यन्यायमतेपिसंबंधप्रतियोगित्वानुयोगित्वरूपोविशिष्टबुद्धिविषयइत्यवधेयंविषयनिरूप्यंहीत्यादि
नाविषयग्रहाधीनतयाज्ञानसाक्षात्कारेविषयभानव्यवस्थापितेतावताज्ञाततालिंगकानुमितौनंविषयभा
नव्यवस्थितिः नवास्वप्रकाशरूपज्ञानप्रत्यक्षेतस्यविषयग्रहात्मकत्वाज्जन्यत्वेनतादृशयुक्तिविषयत्वाभावा
त्स्वतोमिश्रमतपरतयातद्व्याचष्टे अनुव्यवसायेतिविषयनिरूप्यमित्यत्रनिरूपणास्यज्ञानवित्तौस्वत्रवित्ते
स्यज्ञानसामान्यरूपत्वेविषयग्रहाधीनज्ञानविषयोज्ञानमित्यतोज्ञानज्ञानत्वव्यापकविषयताकोविषयइ
तिविषयेत्यादिमूलार्थः तथाचपघन्निरूप्यपोपज्ज्ञानजनकज्ञानविषयः सतज्ज्ञानत्वव्यापकविषयताक
इत्येवव्याप्तिर्मूलाभिप्रेतासाचनोपपद्यतेवन्ह्याद्यनुमितिजनकज्ञानविषयकधूमादेर्वन्ह्याद्यनुमितौशाब्द
बोधजनकज्ञानविषयाकांक्षादेश्चशाब्दबोधेभानापरिपमात्तद्दोपपावज्ञानजनकत्वनिवेशेवासिद्धिर्ज्ञानाद्यनु
मित्यादेविषयज्ञानस्याहेतुत्वादतोव्याचष्टेनिरूपणामितितथाचयद्विषयकप्रत्यक्षजनकज्ञानविषयोयः सत

गदा॰प्र॰ द्विषयत्वे लौकिकप्रत्यक्षत्वव्यापकविषयताकत्वस्यैकव्याप्तिलाभान्न दोषः घटाभावादिप्रत्यक्षजनकज्ञानविषयतत्प्र
त्यक्षविषयघटादिरत्र दृष्टान्तः यावद्विषयनिरूप्यत्वासिद्धाविति ससंबंधिकपदार्थप्रत्यक्षं प्रतिसंबंधितावच्छेदकवि
२५ शिष्टज्ञानत्वेन न सामान्यतो हेतुता पटादिज्ञानाद्घटाभावादिग्रहापत्तेः नापि तत्तत्संबंधिकप्रत्यक्षे तत्तद्विषयकज्ञा
नत्वेन पटाभावत्वादिना घटाभावावगाहिभ्रमे व्यभिचारात्तस्मादपि तु तत्तद्धर्मविशिष्टविशेषितसंबंधिकप्रत्यक्षे त
25 त्तद्धर्मविशिष्टज्ञानत्वेन तथा च घटत्वादिविशिष्टविषयकज्ञानानुव्यवसायस्य घटत्वादिविशिष्टवैशिष्ट्यावगाहि
त्वसिद्धावेव तादृशप्रत्यक्षजनकतावच्छेदकविषयताकत्वरूपतादृशज्ञाननिरूपकत्वं तादृशज्ञानसाक्षात्कारत्वव्या
पकविषयिताकत्वसाधकलिंगं वैशिष्ट्यसेद्धुमर्हति तत्रैव च विवादेन वैशिष्ट्यरूपविषये तदसिद्धाविति सर्वथैव प्रत्यास
त्तिसत्त्वेऽपि कारणांतरविरहेणातद्वत्तो विषयस्याभानसंभवात् प्रकृते ज्ञानप्रत्यासत्तिसत्त्व एव सकलतद्भासकका राम॰
रणसंभवाद्वैशिष्ट्यभानं दुर्वारमिति तन्मूलभावमाविष्करोति सामग्रीति न च तत्संसर्गकस्यापि ज्ञानस्य तदुपनायक २५

त्वेतत्संसर्गकज्ञानात्तत्संसर्गकमिवतत्प्रकारकंतद्विशेष्यकंचज्ञानंस्यादितिवाच्यंइष्टत्वात्तस्यवैशिष्ट्यस्यैतावतापिसामग्री
वलेनापिसमूहालंबनेतिघटत्ववैशिष्ट्यंपुरोवर्त्तिविषयकंचज्ञानमित्यादिबोधेत्यर्थः सिद्धमितिघटत्वादिविशिष्टघटादि
विषयतापर्यंतस्योपनायकज्ञानजन्यतानवच्छेदकत्वादितिभावः घटत्वादिनापिकिंचिद्घटादिमात्रविषयकज्ञानेघटत्वादे
स्तद्विषयत्वरूपतत्संबंधितायाअतिरिक्तत्वेनतत्संबंधितावच्छेदकत्वंनसंभवतीत्याशंक्यज्ञानविषयतावच्छेदकत्वंप्रकार
तारूपमतिप्रसक्तादावपिसंभवतीत्याहसंबंधितेतिव्यवसायानूपवर्त्तमानज्ञानमादायापिज्ञाप्यमानेसंबंधिनीत्यादिनियमनि
र्वाहाअप्रकृतसिद्धिरित्यतोव्याचष्टेज्ञाप्यमानइतिविषयीक्रियमाणइतिस्वेनससंबंधिकविशेषणतयेत्यादिः तेनव्यवसाय
विषयीकरणानंतरंघटेघटत्वप्रकारकंचज्ञानमितिसमूहालंबनसिद्ध्याचनचरितार्थताअनुमित्यादावुक्तनियमाभावा
न्निरूपणंसाक्षात्कारइतिलौकिकप्रत्यक्षमित्यर्थः ईदृशनियमस्याप्रयोजकतानिराकरणपरेअन्यथेत्यादिमूलेपुरोवर्त्ति
नेरजतत्ववज्ञानामितितदाकारःस्यादितिनसंगच्छतेतादृशप्रत्यक्षेसंबंधितावच्छेदकरजतत्वादिनासंबंधिनोभानादत्रतत्ख्या

गदा॰प्र॰ चेष्टेत्यन्यथेति पुरोवर्त्तिरजतविषयतास्यादिति पुरोवर्त्तित्वरजतत्ववैशिष्ट्यधर्मिज्ञानानां विशकलितानां ज्ञानप्रत्यक्षा
२६ दौ भानस्यादित्यर्थः ततु रजतत्वविशिष्टपुरोवर्त्तिविषयतेति न रजतत्वेन पुरोवर्त्तिनं जानामीत्याकारकता प्रयोजकवि
शिष्टविषयतेत्यर्थः तदाकारे ज्ञाने धर्मिणि तत्तीयार्थरजतत्वादिवैशिष्ट्यस्यावश्यंभानादित्यभिमानः ननु ज्ञानादिप्रत्य
26 क्षस्य विषयांशे निर्विकल्पकत्ववारणाय धर्मितावच्छेदकीभूतेदंत्वादिप्रकारेणैव विशेष्यभानमुपेयं न तु रजतत्वादि
प्रकारेणापि रजतत्वेनेदं जानामीति बुद्धौ ज्ञानांशे भासमानप्रकारितायाः एव तत्तीयार्थत्वादिति रजतत्ववत्त्वस्यादिग्रामा
णपभानासिद्धिः न चेदंत्वादिरूपधर्मितावच्छेदकवैशिष्ट्यस्येव रजतत्वादिरूपप्रकारवैशिष्ट्यस्यापि विशेष्यितावि
शेषणतापन्नविषयांशे सामग्रीबलाज्ज्ञाने बाधकाभावः रजतत्वादेर्यत्र धर्मितावच्छेदकता तत्र तथा तज्ज्ञानस्यावश्यक
तया तत्स्थलीयविशेषणज्ञानादिघटितसामग्र्याः प्रकृतेप्यविशिष्टत्वादिति वाच्यं तत्र तद्धर्मितावच्छेदककव्यवसायस्या राम॰
विहेतुतया तदभावादेव तत्स्थलीयसामग्र्यभावात् न च तादृशव्यवसायस्य तथात्वेन हेतुत्वमप्रामाणिकं तद्धर्मोव २६

छिन्नविशेष्यताकस्यैवातादृशस्यापितद्धर्मप्रकारकज्ञानस्यतद्धर्मावच्छिन्नविशेष्यताकत्वेनप्रत्यक्षवारणा
यविशेष्यतासंवंधेनतत्प्रकारकप्रत्यक्षेतादात्म्यसंवंधेनतादृशव्यवसायस्यविशिष्यहेतुतायाअवश्यकत्व
त्ततदवच्छिन्नविशेष्यताकत्वभानस्थलएवचनद्विशेष्यताकत्वभानोपगमेनतज्ज्ञानेविनादृशव्यवसायापेक्ष
णात्घटइत्यादिव्यवसायस्यघटत्वप्रकारकत्वेनैवभानमुपेयतेनतुधर्मिविशेष्यताकत्वेनापीतिनतस्यविशे
षणानवच्छिन्नधर्मिविषयताप्रसंगइत्युपदर्शितप्रामाण्यभानयुक्तेरकिंचित्करत्वमास्वयंविशेष्यताविशेषण
तयाइदंत्वादिनापिभासमानेधर्मिणिरजतत्वादिवैशिष्ट्यस्यापिभानेयुक्तत्वंपतरमाहवस्तुतस्त्वितियेनरूपेणोपस्थि
पनयइतियेनरूपेणायस्योपनायकज्ञानेभानमित्यर्थःउपनायकज्ञानेयदंशेयःप्रकारइतिपावत्तेनतरूपेणो
वतस्योपनीतभानमितितत्स्योपनीतभानंतत्प्रकारकमेवेत्यर्थःतद्रूपंतदुपनीतभानेतदंशेप्रकारइतिपावत्त
थाचायंघटइत्यादिज्ञानानुव्यवसायेविशेष्यताप्रतियोगितयाउपनयमर्यादयाभासमानेधर्मिणिघटत्वा

ग॰दा॰प्र॰ देः प्रकारत्वमावश्यकमितिभावः उक्तनियमे युक्तिमाह अत एवेति न च तत्रोपस्थितजातित्वभानेबाधकाभावाज्जा
२७ तिमानिरूपे वभानं प्रकृते च व्यवसायविशेषरूपकारणाभावरूपबाधकमुक्तमेवेति वाच्यं जातित्वभानेपि जातिमानो
२७ रितिद्विविधविषयताशालिबोधोत्पत्त्यास्वरूपतो गोत्वानुपस्थितिदशायां तादृशबोधानुत्पादएवकल्पितनियमो
पष्टंभाभिधानात् न च तदा तादृशबोधोत्पत्तावपि कथितनियमाभंगेनोपष्टंभासंगतिरेवफलीभूतज्ञानोपनीत
वस्तुविषयतायाउपनायकज्ञानविषयतावच्छेदकयावद्धर्मावच्छिन्नत्वनियमस्य च जातित्वेन स्वरूपतश्च गोत्वोप
स्थितिजन्य दर्शिताकारगोत्वोपनीतभानीयानवच्छिन्नविषयतायां जातित्वावच्छिन्नत्वासत्त्वेनासंभवादिति वाच्यं
पद्धर्मप्रकारकपदीयविषयताशालिज्ञानाप्रयोज्या याउपनीततद्विषयता सा तद्धर्मप्रकारिकेति नियमस्योप गम॰
गंतव्यत्वात् ईदृशश्च नियमस्तद्धर्मानवच्छिन्नतद्विषयताकोपनीतभाने तद्धर्मानवच्छिन्नतद्विषयताकज्ञानत्वे २७
नहेतुतयोपपादनीयः न च स्वरूपतस्तत्प्रकारकबुद्धौ स्वरूपतस्तद्विशेषणावगाहिज्ञानस्य हेतुतयैवोक्त

तिप्रसंगवारणासंभवेउपनीतभानस्थलीयोक्तनियमनिर्वाहककारणताकल्पनमप्ययुक्तमितिवाच्यंमीमांसकैर्वि
शिष्टबुद्धौविशेषणज्ञानहेतुतानुपगमात्नचतथाप्युक्तकार्यकारणभावमपेक्ष्यलाघवेनोपनीतभानस्थलए
वस्वरूपतस्तद्विषयकोपनीतभानेस्वरूपतस्तद्विषयकज्ञानस्यहेतुत्वकल्पनमुचितंतावताचनप्रकृतनिर्वाहइ
तिवाच्यंएतदभिप्रायेणैवसिद्धांतेस्वतःप्रामाण्यग्रहस्यखंडनीयत्वात्इदानीमायाततोदर्शितनियमावलं
बेनस्वतस्तद्ग्रहव्यवस्थापनात्अत्रतएवदत्तांग्रंथस्यगुरुमतपरत्वाभावादेवातएवेत्यादिकमपीतितेनग्रंथेन
भ्रमानुव्यवसायस्यशुक्त्यादौधर्मिणिरजतत्वादिवैशिष्ट्यावगाहितायाअपिसंभवेनरजतत्वादिनामासमानध
र्मिविशेष्यकत्वावच्छेदेनतत्प्रकारकत्वावगाहितायाउपपादितत्वात्मिश्रमतएवचतत्संभवादितिभावःनिरू
प्यंहीत्यस्यग्रंथस्यमतत्रयसाधारण्येपविषयग्रहाधीनसाक्षात्कारकत्वरूपवर्णितविषयनिरूप्यार्थकतानसं
भवतिगुरुमतेज्ञानप्रत्यक्षस्यव्यवसायरूपविषयग्रहरूपतयातदनन्यत्वात्भट्टमतेज्ञानस्यातींद्रियत्वेनतत्सा

गदा॰प्र॰ स्वात्कारायसिद्धेरितिविषयाविषयकज्ञानाविषयत्वमेवविषयनिरूप्यत्वंमिश्रैर्व्याख्यातंतातत्रज्ञानपदस्यज्ञान
२८ सामान्यार्थकत्वानसंभवति।ज्ञानस्यस्वविषयाविषयकशाब्दादिज्ञानविषयत्वादितिज्ञानपदंज्ञानवर्त्तमान
ताधीनप्रकृतज्ञानविषयताकज्ञानपरंवाच्यं।भट्टमतेविषयोपरक्तज्ञानविषयताज्ञाततालिंगकानुमितोज्ञानव
28 र्त्तमानताधीनैवेतिमुत्पादितंएवंचस्वविषयाविषयकताद्दशज्ञानाप्रसिद्ध्यातद्विषयत्वरूपस्वविषयकताद्द
शज्ञानत्वव्यापकविषयविषयताकत्वसाधकहेतुत्वप्रसिद्धिः।स्वविषयाविषयकज्ञानावृत्तिज्ञानवर्तमानता
धीनैवेतिमुत्पादितंएवंचस्वविषयाविषयकताद्दशज्ञानाप्रसिद्ध्यातद्विषयत्वरूपस्वविषयकताद्दशज्ञान
त्वव्यापकविषयविषयताकत्वसाधकहेतुत्वप्रसिद्धिः।स्वविषयाविषयकज्ञानावृत्तिज्ञानवर्तमानताधीनस्वविष राम॰
यताकत्वस्यहेतुत्वेपिताद्दशस्वविषयताव्यापकस्वविषयविषयताकत्वसाध्यप्रसिद्ध्यैवकृतहृस्यतयोक्तहे २८
तुनातदनुमानमयुक्तं।भट्टमतेविषयोपहितज्ञानस्यज्ञाततालिंगकानुमितिविषयत्वसिद्धावेवज्ञानविषयतायो

त्तानवर्त्तमानत्ताधीनत्तासिध्यात्तदधीनविषयताघटितहेतोर्ज्ञानेप्रसिद्धिस्तत्साधकंत्वोक्तानुमानमेवेत्यन्योन्याश्र
यश्चेतितात्पर्यमत्रमन्यथाख्यातिवेष्टप्राकृतिकमितिसामग्रीविशेषस्वभावाद्विषयावगाहीत्यर्थः अन्यथाऽनु
व्यवसायादिनिरूपतयाविषयमविषयीकृत्यासंभवदितिविषयावगाहनंविनाऽसंभवज्ज्ञानविषयताकमित्यर्थः
विषयाविषयकत्वाभावमितियावत्प्रकृतज्ञानेचविषयानुपहितज्ञानभानप्रयोजकसामग्र्यजंन्यत्वेसतिविष
याविषयकत्वंज्ञानविषयकत्वाभावायादकंएवंचविषयविषयेकत्वसाधकतर्कप्रदर्शकंमूलमितिभावः असं
भवदित्यंतंविषयनिरूप्यंहिज्ञानमित्यस्यव्याख्या अनुव्यवसायत्वेनाभिमतेज्ञानेनैयायिकानामपिविशिष्टातिरिक्त
विषयभानस्यनिर्विवादत्तयोपत्तिपुरःसरमपिज्ञानविन्नोविषयवेदनकथनंनप्राधान्येनतत्परमपितुतद्धर्मधर्मिवि
षयकत्वस्यदृष्टांतीकरणायतयातत्राविवादत्वाभायेवतदभिधानमितिस्वचपितुमताज्ञानविन्नेवेद्योविषयइत्ये
तेत्रोपवर्णितभेदस्तत्येवदृष्टांततेतिमूलोक्तधर्मधर्मिणोविषयांतरत्वेनाभिधानंभासकसामग्र्यविशेषेणोवदृष्ट

गदा०प्र० ततोयमयघटइतितद्विशेष्यत्वरूपंहेतुंदूषयतिअविशेषादितिसामान्यतोभासकसामग्र्याःसत्वेतुल्येनाविधानेनतद्वि
२९ शेष्याकांक्षायांव्यवसायेस्यादित्यर्थंयोजयतिअविशेषमितिव्यवसायस्यज्ञानप्रत्यासत्तिविधयाविषयभा
29 सकतायांगुरुमतेहमत्तेतोयमयघटइतितन्मतेतादृशग्रंथमन्यथाव्याख्यास्यमानोमिश्रमतेतादृशयथाश्रुतार्थप
रतामाहमिश्रमतइतिव्यवसायस्वरूपजनकपितव्यवसायस्वरूपज्ञानार्थयाप्रत्यासत्तिःयोविषयभासक
चक्षुरादिलौकिकसन्निकर्षःतुल्यत्वात्साधारणत्वात्तद्वविरणोतिघटेतिगुरुमतेसमवायस्यातीन्द्रियतया
वैशिष्ट्यपदंनतत्स्वरूपंनातिरिक्तवैशिष्ट्यपरंभट्टैनैवतदंगीकारादितितत्स्वधर्मत्वधर्मित्वार्थकतामाहधर्मेतित्व
पपदस्यस्वरूपार्थकत्वेवैयर्थ्यादर्थान्तरासंभवएवतदौचित्यमित्याशयेनाहव्यवसायविरूपकेवेतिअथवा
विषयतासंबंधेनप्रमासाधकज्ञाततालिंगकवक्ष्यमाणानुमानेज्ञानभाननियामकज्ञाततासंबंधोव्यापकत्वंनासौ राम०
विषयेऽपितुव्याप्यकतावच्छेदकत्वरूपसंबंधएवेतिज्ञाततापक्षकप्रमाजनकत्वसाध्यकानुमानेज्ञानस्यापिव्या २९

पकतावच्छेदकतयातदभिप्रायेणाव्यवसायस्वरूपइतिविषयपक्षकानुमानाभिप्रायेणाव्यवसायनिरूपकइतिज
न्यतासंबंधस्यहिअनियामकतयाव्यापकत्वाघटकत्वेनजन्यतायाएवसाध्यत्वमितिसंबंधेयंसंबंधोज्ञाततात्वस्यतस्या
वालिंगस्यसत्त्वाग्रेविशेषतोऽनुसाद्यिष्यतेव्यवसायरूपप्रत्यासत्तेरित्यस्यविषयतारूपव्यवसायसंबंधस्यवर्त्तमा
नज्ञानग्रहेविषयभानानियामकस्यतुल्यत्वादितिमिश्रव्याख्यानंशुद्धेनज्ञानत्वेनघटत्वप्रकारकज्ञानत्वेनवाव्याप
कताज्ञानाद्धटविषयकत्वोपरक्तज्ञानानुमितिमभ्युपगच्छतांतेषामेवपुंसतेव्यापकतावच्छेदककोटिप्रविषयस्य
विषयतावच्छेदकतयाभानेवर्त्तमानव्यवसायविषयतायाएवनियामकत्वस्यतत्रतद्विषयकव्यवसायोपलक्षित
कालविशेषस्यज्ञाततालिंगकपरामर्शेणतत्तद्विषयोपस्थितज्ञानानुमितिजननेसहकारित्वमित्याशयेनतैरंगीका
रात् अनेनतुज्ञाततालिंगकपरामर्शेतथास्वभावस्यप्रथमविप्रतिपन्नोदूषितत्वादन्यथाताटशग्रंथोव्याख्यायते
अतएववैशिष्ट्यपर्यंतस्यविषयस्यव्यापकतावच्छेदककोटिप्रविष्टत्वरूपोज्ञाततात्वस्यज्ञाततायावासंबंधःघट

गदा॰प्र॰ त्वविशिष्टवद्धर्मिघटितप्रामाण्यप्रकारेणाज्ञानस्यासाध्यता। यामेवोपपादयति तथा सति च व्यभिचारवारणाय ज्ञानता
३० याघटत्ववृत्तित्वमपि हेतौ निवेशनीयमित्याशयेन तन्मूलोपायमाह तथा हीत्यादिना तज्ज्ञानितज्ञाततताप्रत्यक्षेपीति ता
30 दृशप्रत्यक्षजनिताया ज्ञाततताया घटघटितत्वेन्द्रियसन्निकर्षजनितप्रत्यक्षेपीत्यर्थः तदानीमपि सत्वादिति अन्यथा सन्नि
कर्षाभावेन ज्ञाततताया एव प्रत्यक्षायोगादिति भावः अत एव भ्रमविषयपरावर्त्तीति घटत्वग्रहसंभवेनाभ्रमज्ञानघटत्व
प्रकारकज्ञाततायामपि घटत्ववृत्तित्वग्रहसंभवात्तत्साध्ये अपि प्रमाण्याप्यतावच्छेदकत्वरूपसाध्यग्रहादेवेत्यर्थः भ्रमस्यैवेति भ्र
चित्भ्रमस्य साकारकग्रहविषयत्व इत्यर्थः तादृशज्ञाने प्रमात्वघटकघटत्वरूपविषये भासतेऽपि तु घटत्वेनाघट एवेति
वक्तृप्रामाण्यानवगाहनात् प्रामाण्यप्रामाण्यं गृह्यत इति नोक्तप्रत्यक्षदशायां प्रत्यक्षाव्यवहित एव काले कचित्त्व
लात् वर्त्तमानज्ञानग्राहकपरामर्शस्योक्तस्वभावानुपगमेऽसंवादीच्छादिलिंगकानुमितिसामग्र्यविलक्षणसामग्रीमा गम॰
त्रादेव प्रामाण्यमाने प्रामाण्यविषयकानुमितिसामग्रीसमग्रीत्वसामग्रीतोऽप्रामाण्यस्यापि सुग्रहत्वया तस्य न स्वत ३०

स्त्वमपि तु प्रामाण्यस्यैवेति विशेषः कथमिति पक्षधराक्षेपमाक्षिपुमप्रामाण्यग्राहकलिंगदुर्ग्रहतामुपपादयति ध
र्मिणा इति भ्रमविशेष्यस्यापि घटस्यापीत्यर्थः तदभाववत्त्वे घटत्वाभाववत्त्वे तेनैव दोषेणैव न स्वतस्त्वग्रहः इति तद्ग्रहस्याऽस्वतस्त्व
प्रवाद इत्यर्थः क्वचिद्दोषनाशवशाद्धर्मिणस्तदभावग्रहणात् अप्रामाण्यलिंगस्य ग्रहसंभवेऽपि अप्रामाण्यग्रहे अप्रामाण्यप्र
योजकसामग्रीविघटकदोषनाशापेक्षया परतस्त्वं प्रामाण्यग्रहे च न स्वप्रयोजकप्रतिकूलापेक्षेति विशेषः यद्यपि न्याय
मतसिद्धसंवादीच्छादिलिंगकानुमितिसमशीलत्वेन ज्ञाततालिंगकानुमितिरिति तया ग्रहणं चेत् स्वतोग्राह्यत्वं तदन्या
यमतसिद्धतादृशानुमित्याग्रहणानन्तर्यात्वमिति विशेषेणोपपद्यते इति मिश्राणामाक्षेपो दुरुद्धरः तथापि भट्टमते व्यव
साये न द्वितीयक्षणोत्पन्नज्ञाततापाजनिततार्तीयक्षणे घटत्वप्रकारकत्वेन तत्प्रत्यक्षे जायमाने घटत्ववति तज्ज्ञानस्यावश्य
कतया प्रमाव्याप्यतावच्छेदकप्रकारेण हेतुग्रहध्रौव्यं न तथा न्यायमते संवादीच्छाया द्वितीयक्षणोत्पत्त्यापि घटत्वप्रकार
कत्वेन प्रत्यक्षे घटविशेष्यकत्वरूपहेतुतावच्छेदककोटिप्रविष्टसंवादित्वस्य दुर्ग्रहत्वात् ज्ञानप्रत्यक्षस्येच्छादिप्रत्यक्ष

गदा॰अ॰ स्यापितुल्यप्रत्ययात् तन्मतेविषयांशेतद्धानवगाहित्वात् एतावतैवविशेषणाममतभेदेनस्वतस्त्वपरतस्त्वरूपविशेषोदीधि
३१ तिकाराभिप्रेतः ज्ञाततापकारेणाभासमानेघटेघटत्ववत्त्वभानेपिज्ञाततायाघटवृत्तित्वंनभातमितिकुतोहर्म्मितहेतुग्रहेनेयस
31 मितिशंकांपरिहरति अयमितिसमानेति आधारत्वाधेयत्वयोरित्यादिः भासकसामग्र्यानियतस्याविनाभानसमनियत्यमनुप
पन्नमित्यतः प्रत्यक्षस्थलेतदुभयभासकसामग्रीसमनियत्यमाहसामग्रीतिइत्यनुमित्याएतादृशप्रयोगोपदर्शितपक्ष
साध्यहेतुकानुमित्याएतेनानुमितेःपंचम्यंतार्थानुल्लेखत्वेपिनासंगतिः घटेघटत्वप्रकारकज्ञानत्वंगृह्यते इत्यग्रिमेणान्वयः
अनुमितौप्रयोजिकांव्याप्तिंदर्शयति यायद्वृत्तिरितिघत्वतत्वानधनुगममाशंक्याहविशेषतइति अस्यैवविवरणंतादृश्येणे
तिघटवृत्तिघटत्वप्रकारकज्ञाततात्वघटविशेष्यकघटत्वप्रकारकज्ञानसाध्यतात्वन्नूपेणेत्यर्थः अत्रचदृष्टांतोघटविशेष्यक
घटत्वप्रकारकज्ञानांतरजन्याज्ञाततापाथमिकघटत्वादिप्रकारकप्रमासाध्यत्वसाध्यकानुमितौचजन्मांतरानुभूतव्याप्तिस्म राम॰
रणमेवगतिः एवंचाप्रत्वेचैत्रत्वादिप्रकारघटितप्रामाण्यविषयकानुमित्यनुपपत्तिरतन्मतेदोषएवातीतानागतविषयक ३१

ज्ञानेन ज्ञाततायाएवाजननात् असन्निकृष्टविषयकानुमित्यादिना ज्ञातताजननेपि तस्याः प्रत्यक्षासंभवाज्ज्ञानांतरेणाप्य
भावाल्लिंगज्ञानासंभवेन ज्ञानग्रहानुपपत्तिवत् सामान्यस्य यत्तत्त्वघटितसामान्यधर्मोपरक्तस्य विशेषस्य तादृशसामान्य
धर्मानुपरक्तस्य अस्य च प्रविष्टत्वमित्यनेनाभिसंबंधः अवैशिष्ट्यं तुल्यसत्वज्ञातता लिंगकज्ञानसाध्यकानुमितिपक्षे
पि व्यवसायत्वेयत्वस्य व्यवसायनिरूपकार्थकतया व्याख्यामवलंब्य व्यवसायेत्यादिकं योजयति एवमिति । तन्मते यिक
थित दिशा सामान्यव्याप्तिर्विशेषव्याप्तिर्वानुमितिप्रयोजिका स्वयमूह्या घटत्वादिविषयकान्योन्याभावरूपमभावत्वं लौकिक
प्रत्यक्षायोग्यत्वेनानुपनीतं न भासितुमीष्टे अत तस्याऽज्ञातप्रामाण्यमाने दृष्टांतताविरोध इत्याशंक्याह अभावत्वमिति भा
वव्यावृत्तेति प्रतियोगिनिरूपितमित्यर्थः भावसाधारणोपि यि प्रकृतसंगतेर्यथाश्रुतासंगतेः प्रतियोगिनिरूपितत्वं तु संबंध
तानिर्वाहकमिति स्वरूपसंबंधविशेष इत्यत्रानुपदं वक्ष्यमाणोत दभिधानोपयोगः घटो नास्तीति बुद्धौ प्रतियोगिनः सं
बंधोऽभावांशे संबंधतयैव भासते न तु प्रकारतया तस्य प्रकारत्वोपयोगेपि तद्वनुगमाय तद्देशेऽखंडधर्मांतरस्य प्रकारतायां

गदा॰प्र॰ आवश्यकत्वेनाभावानुगमकत्वं तु धर्मे स्वीकृत्य तत्स्यैवाभावांऽशे प्रकारत्वोपगमउचितइत्याशयेनाह अखंडोपाधिर्वे
३२ तिअन्यथेतदितिउभयथैवाज्ञातस्य प्रकारतासंभवादिति भावः न्यायमतेपिविशेषणाधियस्तन्निष्ठविशेषणाभेदेनकारणा
ताभेदादभावत्वादिविशिष्टबुद्धौ तज्ज्ञानस्य कारणताः कल्पनादनुपस्थितस्यातस्य प्रकारत्वोपपत्तिरिष्टेत्यायांतित
32 पुनुषमाज्ञस्य परमतेआंततयाऽभेदरूपस्तु उभयसंकर इष्ट एवेत्यतो व्याचष्टे आंतमित्यादि भ्रमइति आंतपदस्य भा
वक्तांतत्वादिति भावः भ्रमविषयकमिति क्तधातोर्विषयितार्थकत्वादिति भावः भ्रमरूपव्य वसायतदनुव्यवसायया
रभेदरूपसंकरस्यापादकं तु घटमिति सादृश्यमेव संकरपदेन विवक्षणीयं तथा च ज्ञानत्वादिना सादृश्यस्य स्पष्टत्वादाया
घसादृश्यघटकधर्मे पूरयति संकरो भ्रमत्वेनेति तथा च भ्रमत्वापत्त्यावेव पर्यवसानान्नैवं व्याचष्टे भ्रमज्ञानस्येति भ्रमानु
व्यवसायस्येत्यर्थः अनुव्यवसायेयावसायविषयविषयकत्वनूपमूलोक्तापादकस्य ज्ञानं नातेरभ्रमत्वानायादकत्वात् प राम॰
तेन संकरापादनस्यानुव्यवसाये प्रवर्तकत्वायादननूपतया व्याख्यायजनकज्ञानेविद्यमानेबाधावतारस्य प्रवृत्तिप्रति ३२

बंधकत्वमयुक्तमितितद्वतोरतस्यैवप्रतिबंधकत्वादितिसिद्धांतोयदिअनुशयेनोपनायकत्वांतराभावाद्वेतिफक्किकाभव
तायेऽत्रमस्यबाधनूपप्रतिबंधवशेनानुव्यवसायेवैशिष्ट्यायनायकत्वासंभवात्तत्प्रहसायादनमित्येतत्सरतयामिश्रा
णांतव्याख्यानंकुसृष्टिरेवेतिस्ट्चितंस्वव्याख्यातमत्रमतोपसन्नुसारेणावाधानवतारजतादिफक्किकात्रयंव्याचष्टेव्या
घेतिविषयेतद्वत्वावगाहित्वंप्रमविषयेशुक्त्यादौरजतत्वावगाहित्वंनतद्ग्रहः निर्द्धर्मितावच्छेदकमपितद्वत्त्वभानं
तस्यैवबाधग्रहस्यैवबाध्यसमानविषयतामात्रेणातादृशभानेपिप्रतिबंधकत्वेवाच्यअन्यथासमानप्रकारकत्वेनैवप्र
तिबंधकत्वेऽव्याप्तिः निर्धर्मितावच्छेदकतद्वत्वभानेनमत्रमतेऽव्याप्तिः इदमधिकंमूलस्यन्यूनताभंगायाभिहितंउ
त्तरकालंबाधनाशोत्तरंज्ञानोपस्थितावपिमत्रमनूपव्यवसायोपस्थित्यातपदुपनीतभानेपिन्नतथायग्रहणंनतद्विषमे
शुक्त्यादौरजतत्वादिमत्वग्रहणंव्यवसायासत्वेविषयाभावेनव्यवसायस्यैवभानासंभवात्तद्विषयरजतत्वादिभाना
घसत्त्वेनुपनीतभानसंपादकव्यवसायोपस्थितेरधिकायाअभिधानेननुशब्दांगंधवद्योग्यत्वात्तत्रहेपीतिमूलमसंगतं

ग॰दी॰प्र॰ ३३ 33

शब्दंगंधादौतद्ग्रहपूर्वंसन्निकर्षसत्वात्प्रकृतेचव्यवसायपूर्वंतद्वन्निधर्मेतद्ग्रहादिंद्रियसन्निकर्षासत्वान्नदसत्वेचयोग्य
तायाश्चकिंचित्करत्वादित्याशंकांनिरस्यतिस्वप्रकाशनयइतिस्वस्वधर्मस्वविषयग्राहित्वादितितथाचयथातन्मतेविष
यग्रहएवपूर्वकालेतत्वसन्निकर्षोपेक्षानतुस्वस्यस्वधर्मस्यवाग्रहेस्वोत्पादकसामग्र्याएवतद्ग्राहकत्वसामर्थ्यावलादेवग्र
हसिद्धावेवग्राह्यत्वस्ययोग्यतासिद्धेस्तद्बलाच्चविवादविषयग्रहनिर्वाहइत्यतोग्रहेयीतिमूलेग्रहोपगमपरतयावर्णि
तं॰ गुरुमतेअधिकरणप्रकारकत्वानुपपत्त्यमतत्वस्यज्ञानधर्मत्वाभावात्सामर्थ्येवाऽप्रामाण्यमपिगृह्णीयादितिमूलमसंग
तमतोव्याचष्टेअप्रामाण्यमितिअनवस्थयाप्रामाण्यंपनप्राप्यतैतेवत्यत्रोक्तापत्तिशंकांनिरस्यतितथाचेतिप्रामाण्यस्वतोग्राह्य
त्वेपरतोऽग्राह्यत्वेसतिग्राह्यत्वरूपपरिशेषस्यहेतुत्वंनसंभवतिमीमांसकैरप्यनुमित्यादिग्राह्यत्वरूपस्यपरतोग्राह्य
त्वस्याप्रामाण्येऽभ्युपगमात्सिद्धेरतःपरिशेषंव्याचष्टेपरिशेषइतिअन्यथोपपत्तिविरहःस्वतोग्रहंविनाग्रहानुपपत्तिः राम॰
साचतर्कतत्त्वापरमतेप्रमाणांतरंसंदिग्धलिंगस्यसंशायकतयालिंगत्वेनसंशायकमितिमूलासंगतिरतोव्याचष्टेलिं ३३

गमितिप्रकृते लिंगासंशयादेव प्रामाण्यसंशयो भविष्यतीत्याशंकां निरस्यति सचेति लिंगनिश्चयश्चेत्यर्थः भवता मस्येवे
तिप्रत्यक्षप्रमाणास्यतन्निश्चायकत्वादन्यथाज्ञानानुमितेरयोगादितिभावः प्रामाण्यसंशयस्य प्रामाण्यसंशयाप्रतिबं
धकतया प्रामाण्यज्ञानसामान्यस्य तत्संशयप्रतिबंधकत्वे दृष्टांतत्वासंभवात् ज्ञानवदित्यत्र ज्ञानपदं निश्चयपरत
याव्याचष्टे प्रामाण्यस्य ज्ञानं निश्चय इति तन्निश्चायकत्वादित्यग्रिमतत्पदेन प्रामाण्यपरामर्शपत इत्याविष्कर्तुं
प्रामाण्यस्येति विग्रहं दर्शयति तेन तु प्रामाण्यज्ञानं निश्चय इति लिखने ज्ञानांतसमुदायस्य विषयाविशेषितनिश्चयार्थ
कत्वासंभवादसंगतिः प्रामाण्यज्ञानं प्रामाण्यनिश्चय इति व्याख्याने क्षत्यधिकं ज्ञानं निश्चय इति व्याख्याने ज्ञानस्ये
तिज्ञानपदव्याख्यानं वेदमिति शंका संभव इति प्रामाण्यस्य ज्ञानमिति व्याख्यातमिति तत्र तथा सति ज्ञानत्वन्निश्चयव
दिति व्याख्यायेक्षायानिवीडतायातात् स्खलेत त्सामग्र्यपि ज्ञानमानसस्य सामग्र्यपि प्रामाण्यस्य संशयप्रतिबंधिकास्या
त्स्यात्तस्यास्तन्मतेतन्निश्चायकत्वात् प्रामाण्यनिश्चयसामग्रीत्वादित्यर्थः यन्निश्चयोयत्संशयप्रतिबंधकस्तन्निश्चयसा

गदा॰प्र॰ मग्र्या अपि तत्संशयप्रतिबंधकत्वनियमादितिभावः अन्यथेति मल्लस्य तन्निश्चयसामग्र्यास्तत्संशयाप्रतिबंधकत्वे
३५ इत्यर्थकतायामसंगतिः विशेषपदस्य व्यावर्त्तकसामान्यपरत्वेन व्याख्येयतया एककोटिव्याप्यदर्शनाद्युत्तरत्रिकाले सं
शयायत्तेरपि कोटिनिश्चयसामग्र्याः संशयाप्रतिबंधकत्वापादकत्वलाभप्रसंगात् तत्र त्वतस्य बाधितत्वादतोपन्नि
34 श्चय इत्यादिविवरीतभावार्थविपरीतार्थकतया अन्यथेति व्याचष्टे अन्यथेति आनुमानिकादिविरोधिनिश्चयदशा
यामपि संशयस्यानिष्टतया दर्शनपदस्य न साक्षात्कारपरता संशयकाले च संशयायस्य योगान्नत्तान सामान्यपरता
पि संभवतीति तन्निश्चयसामान्यपरतया व्याचष्टे विशेषेति व्यावर्त्तकधर्मदर्शनानंतरक्षणात्तत्प्रतिबंधकतयैव संश
यायस्य योगात्कालपदमुत्पत्तिविशिष्टकालपरतया व्याचष्टे उत्पत्तीति विशेषपदस्य भित्र अव्याख्यातमेककोटि
व्याप्यपरत्वं न सम्यक् व्याप्यदर्शनोत्तरत्रिकाले संशयानुत्पादानुरोधेन कोटिनिश्चयसामग्र्याः प्रतिबंधकत्वस्य प्र एम॰
कृतस्यासिद्धेस्तत्र सर्वकोटिनिश्चयसामग्र्या अभावात्प्रतिबंधकाभावस्य कार्यसहभावेन हेतुतायाः सामग्रीप्रतिबंध ३५

कत्तावादिनानभ्युपगमान्नथ्यासत्तिव्याप्यदर्शनप्रतिवंधकतयैवतदुत्पत्तिकालेसंशयवारणासंभवात्साम
ग्रीप्रतिवंधकतायानितरामसिद्धेश्चयत्तुविशेषदर्शनस्यसामग्रीत्वेनैवप्रतिवंधकत्वानतुतत्वेनालोकसम
वधानादिघटितसामग्र्याअसंग्रहात्निर्णयसामग्रीत्वस्यचनिर्णयाव्यवहितप्राक्क्षणावेशिष्टान्नयस्य
सर्वत्राननुगतत्वात्निर्णयसामग्र्यभावस्यकार्यसहभावेनहेतुत्वेकोटिस्मरणासत्वेचक्षुः संयोगादिसम
वधानद्वितीयक्षणाद्वप्रथमक्षणेपिसंशयोनस्यादितितुनदोषःतदानींसंशयानुत्पत्तेरिष्टत्वात्यदिच
कदाचिच्चक्षुःसंयोगाद्युत्पत्तिकालेसंशयोत्पत्तिरनुभूयतेतदाचक्षुर्मनोयोगाद्यभावेनतदनंतरक्षणेनि
र्णयएवनोत्पद्यतेअपितुक्षणेकम्पवधानेनेतिकल्पनात्निर्णयत्वस्यसंशयान्यत्वनिर्गेत्वतयासंश
यानुसाराधीनतादृशप्रतिवंधकसमवधानेनसंशयानुत्पादप्रयोजकंभवितुमर्हतीतिपरस्पराश्रयादिति
दूषणंतुअग्रेत्यादिनाभणिष्यतेवशंकिष्यतेकोटिभासकसन्निकर्षादिसत्वेपिव्याप्यदर्शनस्यानुमितुत्या

गदा॰प्र॰ दकतयानिश्चयसामग्रीत्वंवक्ततोविशेषदर्शनकालेउपनायकज्ञानघटिताप्रत्यक्षात्मककोटिनिश्चयसा
३५ मग्रीनियतैव।एतेनव्याप्तिविशिष्टवत्तानिश्चयस्यानुमितिसमग्रीत्वेपिज्ञानद्वयादिरूपेपुरुषत्वव्याप्यकरादि
35 मांश्चायमितिज्ञानंनन्यायमतेपुरुषत्वनिश्चयसामग्रीतितस्यप्रतिबंधकत्वंस्यात्तेनावश्यंकल्पनीयंतत्प्रतिबं
धकतावच्छेदकंनिश्चितव्याप्तिकधर्मवत्ताज्ञानत्वंव्याप्तिविशिष्टवत्ताज्ञानसाधारणमेवेतिविशेषदर्शनस्यन
सामग्रीत्वेनप्रतिबंधकतानचज्ञानद्वयादितंनसंशयविरोधीतितुक्तंअवच्छेदकधर्मदर्शनस्यज्ञानद्वयादिरू
पस्यव्याप्तिसंसर्गकज्ञानघटितस्यप्रतिबंधकतायामविवादेनव्याप्तिप्रकारकज्ञानघटितज्ञानद्वयादेस्तथात्वे
विवादायोगात्अथभवतुज्ञानद्वयादिरूपंविशेषदर्शनंदर्शितविशिष्टधीसाधारणरूपेणस्वतःप्रतिबंधकं
तथाप्यालोकसमवधानदूरत्वाद्यभावघटितसामग्र्यानिर्णयसामग्रीत्वेनप्रतिबंधकतयाःक्रमसंस्थानइत्याकां राम॰
तविशिष्टज्ञानमपिसामग्रीविधयापिप्रतिबंधकमेवेतिवदत्स्वेवंतथापिविशेषदर्शनस्यस्वतःप्रतिबंधकतये ३५

वतदुत्पत्तिकालेसंशयवारणासंभवात्सामग्रीप्रतिबंधकतापांतदुपष्टंभकत्वानुपपत्तेरितियरास्तएवंघटादिप्रत्यक्षे
च्छाविशिष्टतत्वत्यक्षसामग्रीसत्वेघटादिव्याप्यवत्ताज्ञानस्यसत्वेंधकारेघटादिसंशयापत्तिरनुमितिसामग्र्यसत्वा
दित्यपियरास्तमितितत्रश्चालोकादिसमवधानादिघटितसामग्र्युत्तरकालेसंशयस्यकोटिनिश्चयाभावस्यकार्यस
हभावेनहेतुतयैववारणासंभवात्तदुत्पत्तिकालेचसंशयस्येष्टत्वात्विशेषदर्शनोत्पत्तिकालेसंशयवारणायंत
स्यतत्वेनैवप्रतिबंधकतायाल्लाघवेनौचित्यात्व्याप्यतावच्छेदकधर्मसंबंधादिभिन्ननानाविधव्याप्तिविषयकज्ञा
नानिश्चयसामग्रीत्वेनानुगमप्यलाघवादेकप्रतिबंधकत्वमितिचेत्तेषांकेनरूपेणहेतुतानतावदननुगततत्त
द्रूपैर्व्यभिचारात्ननसंशयविरोधित्वेनानुगतेनतथासतिनिश्चयोत्पादकत्वेनसंशयविरोधित्वेअन्योन्याश्रयात्अ
व्यवहितपूर्वत्वादेरननुगतस्यदुर्वचत्वाच्चविशेषदर्शनकालेएकतरकोटिनिश्चयकालइतिप्राचीनव्याख्यानम
पिनसाधुदुरक्षरत्वात्व्यावर्तकमात्रस्यैवविशेषपदार्थत्वात्व्याप्यदर्शनाद्युत्पत्तिकालेपिसंशयस्यतत्सामग्री

गदा॰प्र॰ ३६ 36

प्रतिबंधकतयैव वारणीयत्वात् तत्सामग्र्याश्च प्रतिबंधकत्वेन तदुत्पत्तिकालेपि संशयस्य तत्सामग्रीप्रतिबंधकतयैव
वारणीयत्वात् तत्सामग्र्याश्च प्रतिबंधकत्वे तदुत्पत्तिकाले संशयायत्नेस्य दर्शनेन न्यूनता च स्यात् अतो व्यावर्त्तकसामा
न्यपरतामेवाह विशेषस्येति तदभाववदादौ त्वादिना तदभावव्याप्यतदभावावच्छेदकधर्मपरिग्रहः विशेषदर्शनाभाव
स्य व्यावर्त्तकधर्मदर्शनाभावस्य प्रामंजस्ये कोटिनिश्चयस्य व्याप्यदर्शनादेश्चोत्पत्तिदशायां संशयवारणासंभवे स्व
यंकारणतावच्छेदकोपलक्षितकारणसत्ताया एव लाघवेन कार्योत्पत्तिप्रयोजकतया ज्ञायमानलिंगस्यानुमितिकार
णतानिराकरणप्रस्तावे वक्ष्यमाणतया संप्रदायसिद्धत्वादित्युक्ततावता कार्यकालवृत्तित्वेन हेतुतायां काक्षतिरित्याकां
क्षायामाह न्न चेति प्राक्काले कार्याव्यवहितप्राक्क्षणे तत्संबंधः कार्यकालवृत्तित्वरूपकारणतावच्छेदकविशिष्टस राम॰
त्वसंभवः तथा च कदापि कार्यं नोत्पद्यतेति भावः अत्र च सर्वत्र नकारणतावच्छेदकविशिष्टस्य प्राक्सत्त्वं कार्योत्पत्तौ ३६
तंत्रे विषयप्रतियोग्याद्यवच्छिन्नहेतुताकज्ञाननाशादीनां कारणतावच्छेदकविषयाद्यसत्त्वदशायामपि कार्यकारि

त्वात् किंतु इंद्रियसंयुक्तसमवायाप्रामाण्यज्ञानाभावविशिष्टपरामर्शादिनाप्रत्यक्षानुमित्यादिरूपकार्यजनन
एवाश्रयचक्षुःसंयोगादिविगमेपिरूपचाक्षुषादिप्रसंगस्यान्यथादुर्वारत्वात् एवंचकार्यकालवृत्तित्ववि
शिष्टकारणस्यप्राक्सत्तायाअनपेक्षणान्नोक्तदोषः नचकार्यकालवृत्तित्वस्योपलक्षणतापिनसंभवति
तथासतिमण्यादिरूपप्रतिबंधकसमवधानोत्पत्तिकालेदाहाद्यापत्तेर्विनासामग्रीप्रतिबंधकतांदुर्वारत्वात्
कार्यकालवृत्तित्वोपलक्षितमण्याद्यभावस्यस्वसत्त्वकालेएवसत्त्वेनमणिसमवधानाद्युत्पत्तिप्राक्काले
पिसत्त्वादितिवाच्यं मण्याद्यभावरूपकारणस्यप्राक्कालइवकार्यकालेपिसत्तायास्तदानींकार्योत्पत्तिप्रयोज
कत्वात्क्षणात्पूर्वक्षणोभयावच्छिन्नमण्याद्यभावाधिकरणांतःक्षणेदाहादिरूपकार्यवदित्येवसामग्रीत्वा
भ्युपगमात् एवंसतिकार्यकालवृत्तित्वस्यकारणतावच्छेदकनिवेशनमनुपयुक्तमितिचेन्नतत्कारणतावच्छे
दकमपितु एवंवृत्तित्ववत्तत्रतत्रकारणताशरीरघटकमेवयदायत्रकार्यमुत्पद्यतेतत्रतदातत्प्राक्कालेचकार

गदा.अ.
३७
37

णामितिविलक्षणव्यापकतायाः तत्र कारणताघटकत्वात् यथा क्वचित्कार्यासमवहितएवक्षणे कारणसत्वे
पिकार्योत्पत्तौव्यापकताघटितकारणताक्षतेस्तादृशक्षणसत्वंकार्योत्पत्त्यानवपेक्षितंतथामणपादिसमवधान
कालेदाहाद्युत्पत्त्यापपिनिरुक्तव्यापकताघटितकारणताभंङ्गेतेतिकार्यकालसत्त्वापिमणपभावादेर्दाहाद्यु
त्पत्त्यानवपेक्षितेतिअस्तुवाउपलक्षणीभूतस्वानंतरक्षणेनावच्छिन्नायाअधिकरणतातन्निरूपकत्वसंबंधेनक्ष
णावेशिष्टंमणपभावादिकारणतायामवछेदकंमणिसमवधानोत्पत्तिप्राकूक्षणस्यैनेतादृशसंबंधेनैवशि
ष्टंमणपभावेतदधिकरणतायास्तदनंतरक्षणानवच्छिन्नत्वात्देशांतरनिष्टतदधिकरणतातस्यणानंतरक्ष
णावच्छिन्नेतिचेत्‌एवमपिदशांतरनिष्टाधिकरणतानिरूपकत्वविशिष्टस्यैवतेनसंबंधेनक्षणविशिष्टस्या
व्यधिकरणतेदेशएवनतुयदधिकरणेकार्यमायाघतइतिनमणिसमवधानदेशेकार्यायत्रिरिसालोच्योक्त
माशवादितिनिश्चयजनकविशेषदर्शनोत्पत्तिकालेसंशयायपत्तिःप्रतिबंधकसामग्र्यभावस्यकार्यसहभावे

रम.
३७

नप्रतिबंधकतयैववारयितुंशक्यतेविशेषदर्शनस्यस्वातंत्र्येणाप्रतिबंधकत्वादितिमिश्रामन्त्वाशयंव्याचक्षतेनतदुपरि
चप्रतिबंधकमात्रस्यैवसामग्र्यायदिप्रतिबंधकांतरामणिसामग्रीसमवधानकालेदाहानुपपत्तिस्तादृशप्रतिबंध
काभावस्यकार्यकालेऽसत्वादितिएवंपक्षोज्ञानत्रूपप्रतिबंधकसामग्र्याएवप्रतिबंधकत्वानियमःनतुप्रतिबंधकां
तरसामग्र्याअन्यतोमणिसामग्र्यभावोदाहेहेतुरेवनापितुमण्यभावएवकार्यसहभावेनतथातावतैवमणिसमवधा
नोत्पत्त्रिकालेदाहवारणादितिमिश्रैःसमाहितंतत्समाधानमाक्षिपंतुमणिसामग्र्यभावस्यदाहहेतुत्वंकुत्रचित्का
र्येकस्यचित्कार्येसहभावेनहेतुत्वंवाभ्युपेत्यापिसमाधानमंतेपूर्वपक्षमुपन्यस्यतियत्वितिप्रतिबंधकमात्रेति
मात्रपदंकृत्स्नार्थकंएवंवतानिमात्रेणेतिमात्रपदेनसहभावव्यवच्छेदःकार्यसहभावेनहेतुतायाविचारसह
त्वेमण्यभावस्यतथाहेतुतयैवमण्युत्पत्त्रिकालेदाहवारणासंभवाततत्सामग्र्यभावस्यहेतुतायाअप्रामाणिकत्वा
तसंभवादित्युक्तंएवंचोत्पन्नभ्रमत्वज्ञानादिरूपोत्तेजकनाशोत्पत्त्यधिकरणेविशेषदर्शनद्वितीयक्षणेसंशयोत्पा

गदा०प्र०
३९
३८

नेतथा चोत्तेजकाभावविशिष्टप्रतिबंधकाभावस्य कार्यकालेऽसत्त्वात्स्वव्वर्त्तितामात्रेण हेतुतावाच्येति सामग्रीप्रतिबंधकत्व
मावश्यकमेवेति ध्येयं अथेत्यादिकां शंकां प्रकृते संगमयति निश्चयसामग्र्यभावमिति प्रकृत इत्यादिः पदार्थमव्याख्या
यैवनिश्चयसामग्र्यभावसत्त्वस्फुरीकर्त्तुं पर्यवसितार्थमाह विशेषदर्शनाद्यभावेति एककोटिव्याप्यदर्शनकाले कोटि
द्वयस्मरणेऽपि निश्चयोत्पत्तेस्तदभावस्य कोट्यंतरोपस्थितौ वैशिष्ट्यनिवेशः तत्सामग्रीति तत्पदेन कोटिनिश्चयपरामर्श
स्फुटीकरणाय निश्चयस्येत्यसमासलिखनेन तत्सामग्रीन्तु प्रधानप्रयोजककारणसमुदायः अथ निश्चयं प्रतिवि
शेषदर्शनाभावसहकृतकोट्यंतरोपस्थितेः प्रतिबंधकत्वे निश्चयसामग्र्याः संशयप्रतिबंधकत्वकल्पनं निर्युक्तिकं निश्च
यसामग्रीदशायां तत्सामग्रीघटकसत्तायाः संशयजनकविशेषादर्शनसहितकोट्यंतरोपस्थितेर्विरहादेव संशयाय
त्ययोगादिति चेन्मैवं निश्चयसामग्रीसंशयप्रतिबंधिका तदपि मीमांसकानामनुमननमेव तथा सति प्रामाण्यसंशय राम०
स्यनितरां निर्वाहात एकदा संशयनिश्चययोरनुत्पादात् फलनियतकारणस्तोमसत्त्वापाद्यः निश्चयसामग्र्यास्तादृशसं ३९

शयसामग्रीकालेऽसमवधानात्परस्परमपेक्ष्यतादृशसामग्र्याः समबलदुर्बलभावो कथं न संगच्छत इति प्रकृतनिश्च
यसामग्रीपदार्थं व्याचष्टे निश्चयसामग्री त इति इन्द्रियसन्निकर्षादीति तादृशसामग्री च संशयकालेऽक्षतैवेति भावः
तस्मादौर्बल्यं च संशयसामग्रीदशायां निश्चयानुत्पादकत्वमेव न तु ज्ञानानुत्पादकत्वं तथापि तदानीं संशयं प्रत्युत को
टिज्ञानजननादित्यवधेयं वक्ष्यमाणयुक्त्या अग्रे प्रकारान्तरेण संशयसामग्र्या निश्चयात्मकफलविरोधितां प्रति नि
श्चयसामग्र्या अधिकबलवत्त्वासंभवे न तत्रापि सामग्रीपदं प्रागुक्तासाधारणविपरीतकोटिभासकसमुदायपर
तया व्याचष्टे संशयसामग्रीति तथाविधेति विशेषदर्शनाद्यभावविशिष्टस्यैर्थः व्याख्याबीजमाहात्म्यादीति साधारणात
त्कोटिभानप्रयोजकं ज्ञानं कोट्युपस्थित्यादेरेव कोटिनिश्चयप्रतिबंधकशरीरप्रवेशलाभः मानाभावादिति यादृशका
रणासत्त्वेऽतरकारणसत्त्वेपि सामग्रीप्रतिबध्यज्ञानं जायते तादृशकारणस्यैव फलोपधायकत्वे प्रतिबंधककारणसमु
दायप्रवेशस्य प्रामाणिकत्वादिति भावः संशयसामग्र्या निश्चयप्रतिबंधकत्वस्योक्तत्वात्तदुपरि द्वितुप्ररोपयत्यादि

गदा०प्र०
३९
39

स्त्वं संगमयितुं तादृशप्रतिबंधकताबीजस्य संशयत्वनिश्चयत्वयोः कार्यतावच्छेदकत्वस्य खंडनपरतां तस्याहसं
शयत्वेति भवेदेवमिति निश्चयत्वावच्छिन्नं प्रति संशयसामग्र्याः प्रतिबंधकत्वमाशंक्यस्यादित्यर्थः अन्यथा निश्च
यत्वावच्छिन्नस्य संशयदशायामापादकाभावेन तत्प्रतिबंधकल्पनवैयर्थ्यादिति भावः निश्चयत्वस्य किंचित्कारणा
कार्यतावच्छेदकत्वेपि न तद्बलात्संशयकाले तदवच्छिन्नापत्तिर्विचारसहा तद्घटकतदभावाप्रकारकत्वेन तदभावप्र
कारत्वप्रयोजकसामग्र्यभावस्य तदवच्छिन्ने हेतुभूतस्यापि प्रतियोगिप्रयोजकाभावविधयापेक्षणादतः कदाचिदि
त्युक्तं यद्यपि संशयत्वस्य कार्यतानवच्छेदकत्वेपि निश्चयत्वस्य कार्यतावच्छेदकत्वे तदवच्छिन्नं प्रति विशेषादर्शनस
हितकोट्यंतरोपस्थितिरूपायाः संशयसामग्र्याः प्रतिबंधकत्वमावश्यकं शक्यकल्पनं च भवतीति निश्चयत्वमात्रस्य त
थात्वखंडनमनुचितं न तु संशयत्वस्य तथापि दृष्टांतविधया निश्चयत्वस्य प्रयोजकसमाजाधीनतया कार्यतानवच्छे राम०
दकत्वे संशयत्वमपि कार्यतानवच्छेदकमास्तामिति प्रतिबंदिनिरासाय वा तस्य तथात्वखंडनादित्यध्येयं यद्यपि प्रक ३९

तं निश्चयत्वस्य कार्यतावच्छेदकत्वनिराकरणं म्ले(?)ले नास्त्येवेत्यसंगतिः तथापि स्वपंतत्परपिप्यातीत्य दोषः
यद्येकधर्मिकविरुद्धोभयप्रकारकज्ञानत्वेन रूपसंशयत्वं सामग्रीसमाजनिर्वाह्यमपि जन्यतावच्छेदकं भवेत्
तदा तत्रैकधर्मिकत्वं कोट्योर्विरुद्धत्वं तद्विषयतायां प्रकारतात्वरूपविशेषं च परित्यज्योभयविषयकज्ञानत्वमपि
तथा भवेत् एवमेकत्रेत्यत्र तद्विपरीतमुभयत्रेति निवेश्योभयप्रकारके त्यत्र तद्विपरीतिमेकप्रकारकत्वं नि
वेश्य विरोधं परित्यज्योभयत्रैकप्रकारकज्ञानत्वं एवं विरोधस्थाने तद्विपरीतमविरोधं निःक्षिप्य एकत्राविरोधो
भयप्रकारकज्ञानत्वं च जन्यतावच्छेदकं भवेत् इति प्रतिवंदिसूचनाय तादृशधर्मत्रयस्य दृष्टांततयोपन्यासः प्र
सेके तितत्तद्भावादिप्रकारकत्वप्रयोजकतत्तत्कोटिविशिष्टबुद्धिसामग्र्याः संवलनाधीनत्वादित्यर्थः ननु सा
मग्रीसमाजादुभयप्रकारप्रकारकज्ञानामेदनिर्वाहेपि परस्परविरोधावगाहित्वघटितसंशयत्वानिर्वाहः प्रत्ये
ककोटिभासकसामग्र्यास्तत्प्रयोजकत्वान्नयोस्तत्प्रयोजकत्वे कोटिद्वयसमुच्चयस्यापि तथात्वापत्तेरित्यतश्रा

गदा॰त्र॰ हक्कविदितितत्सामग्र्यधीनत्वाद्विरोधभासकसामग्र्यधीनत्वात्साचविरोधोपस्थितितदसंसर्गाग्रहरूपातदनु
५० पस्थितिकालीनसंशयेवासंसर्गाग्रह एवसंसर्गविषयाविरोधभासकः संसर्गभानेसन्निकर्षस्याप्यहेतुतयाज्ञा
नसन्निकर्षविषयायिविरोधोपस्थित्यनपेक्षणात् विरोधानुपस्थितिदशायांकोटिद्वयसमुच्चयएवज्ञायत इति
50 तुनयुक्तंअव्याप्यवृत्तित्वज्ञानंविनाभावाभावसमुच्चयस्यानुभवविरुद्धत्वात्विरोधस्यैकोव्योः संबंधः नन्वेवमेक
कोट्यंशेऽपरकोटेः प्रकारतापत्तिः अभावकोट्यंशे प्रतियोगितयाभावकोटेः प्रकारतायाः सर्वसम्मतत्वात् तत्संसर्ग
एवविरोधस्याप्यंतर्भावात्विरोधविशिष्टसंयोगादेरेववत्अधिकरणकोटिसंबंधः विभिन्नावच्छेदेनैकाधिक
रणावृत्तित्वरूपाव्याप्यवृत्तित्वज्ञानस्यविरोधभानप्रतिबंधकत्वात् इदानींकोट्योः समुच्चयः केचित्तुविरोधानु
पस्थितिकालेविरोधाविषयकएवसंशयः विरोधस्यसांसर्गिकविषयतायाः अप्रामाणिकत्वात् संशयत्वंच राम॰
विरोधविषयकत्वाघटितमेवातोविरोधाभानेपिनसंशयत्वानुपपत्तिः नचसंशयत्वशरीरेविरोधविषयकत्वांप्रवे ५०

गेसमुच्चयस्यसंशयत्वप्रसंगः संशयत्वस्यविषयताविशेषरूपत्वात् नचसमुच्चयविषयतायाअपित्रविशेषपदार्थो
त्ववं चः भावाभावोभयप्रकारकत्वंचसमुच्चयविषयतासाधारणमितिवाच्यं समुच्चयेप्रकारभेदेनविषयताभे
दात् विरुद्धोभयप्रकारकैकविषयताप्रतियोगिज्ञानत्वरूपसंशयत्वस्यातिप्रसक्तत्वात् तादृशविषयताशालि
ज्ञानं प्रत्यव्याप्यवृत्तित्वज्ञानंविरोध्यविषयकमपिमणिमंत्रादिवत्स्वरूपयोग्यमेवप्रतिबंधकं संशयत्वस्यविरोधविष
यतानियतत्वेपिविरोधाप्रकारकेतत्संसर्गकज्ञानेअव्याप्यवृत्तित्वधियः पृथक्प्रतिबंधकतायाआवश्यकत्वा
ततत्प्रकारकज्ञानत्वस्यैवतद्विपरीतज्ञानप्रतिबध्यतावच्छेदकत्वात् तत्संसर्गकधियस्तद्रूपानाक्रांतत्वादित्या
हुः तत्तुदीधितिकृतोऽसंमतंतेनसंशयत्वस्यकार्यतावच्छेदकत्वखंडनात् विषयताविशेषस्यसमुच्चयव्या
वृत्तस्यसामग्रीसमाजानियम्यतयाअव्याप्यवृत्तित्वज्ञानाभावजन्यतावच्छेदकतायाआवश्यकत्वात् नचवि
रोधविषयतायाः संशयघटकत्वस्यदीधितिकारसम्मतत्वेक्वचिदित्यसंगतमितिवाच्यंएकावच्छेदकावच्छे

गदा॰प्र॰ नभावाभावोभयवत्त्वावगाहिसंशयेविरोधावगाहित्वाद्यात्र्यनियमात्तत्त्विखनोपपत्तेः अव्याप्यवृत्तित्वधीदशाया
५१ मपिमूलावच्छिन्नोवृक्षःकपिसंयोगीनवेतिसंशयस्यानुभविकतयातस्यविरोधविषयकत्वासंभवात्तत्रनचतत्र
एकावच्छेदकावच्छेदेनैकत्रावर्त्तमानत्वरूपविरोधभानेबाधकाभावःतादृशविरोधावगाहिनोपिविभिन्नावच्छेदेन
संयोगतदभावादिमत्त्वावगाहिनोज्ञानस्यसमुच्चयतयासामान्यतएकाधिकरणावृत्तित्वरूपविरोधानवगाहिनि
भावाभावोभयप्रकारकज्ञानेएकावच्छिन्नत्वावगाहित्वायाःसंशयत्वप्रयोजकत्वावश्यकत्वात्तत्रावच्छेदकघटि
तविरोधभानस्यानुपयुक्तत्वात्संसर्गविधयातद्विषयतायाःकल्पकाभावेनतत्प्रयोजकसामग्र्यास्त्वरूपकल्पना
त्, मूलस्यसामग्रीतस्तदुपस्थितिदशायामेवप्रकारत्वयातज्ज्ञानंवस्तुतएकावच्छेदकावच्छिन्नत्वावगाह्यपिज्ञाने एम॰
विरोधस्यगुरुशरीरस्यसंसर्गतयाभानमप्रामाणिकंतादृशसंशयेत्र्यनवच्छिन्नाधारतायाएवसंसर्गतयाभानोपग ५२
मेनसमुच्चयात्तद्वैलक्षण्येणोपपत्तेःसंयोगतदभावाद्योरेकत्रद्रव्यादौवर्त्तमानत्वग्रहेपिगुणादौतत्संशयस्यानुभवि

कतयातत्रानवच्छिन्नाधारतायाः संसर्गतयैवसमुच्चयेवैलक्षण्योपपत्तेर्नेचतत्राप्यनवच्छिन्नाधारताघटितविरो
धमानमुपेयतेतज्ज्ञानेबाधकाभावादितिवाच्यंअनवच्छिन्नाधारताघटितविरोधग्रहदशायामपिद्वयोर्विभिन्नावच्छेद
नसंयोगतदभावयोःसमुच्चयोसत्त्वात्तस्यसंशयत्ववारणायतादृशविरोधभानस्याप्यनवच्छिन्नाधारतासहितस्यैव
संशयत्वप्रयोजकतायावाच्यतयाविभिन्नावच्छेदेनैकाधिकरणवृत्तित्वरूपाव्याप्यवृत्तित्वग्रहदशायांभावाभावस
मुच्चयोसत्त्वात्तत्रानवच्छिन्नाधारताभानासंभवेनतज्ज्ञानादेवसंशयत्वनिर्वाहेणाचसंसर्गतयाविरोधमानस्याप्रामा
णिकत्वात् एवंचविरोधभानेभावाभावकोटिकसंशयेकाचित्कसामग्रीवशात्काचित्कमेवनतुनियतंनियतंतुभा
वद्वयकोटिकसंशयस्याप्रामाणिकत्वेतत्राविरोधस्यानवच्छिन्नत्वस्यवाभानेनसंशयस्यनसमुच्चयेवैलक्षण्यं
तदधिकरणवृत्त्यसमन्वत्वादिरूपविरोधस्यानवच्छिन्नत्वस्यवाभानेनसंशयस्यनसमुच्चयेवैलक्षण्यंतदधिकरणवृत्त्यसमन्
त्वादिरूपविरोधस्यानवच्छिन्नत्वस्यवाव्याप्यवृत्तित्वभ्रमदशायांसमुच्चयेपितज्ज्ञानात्तस्मात्संशयत्वमव्याप्यवृत्तिमान

ग दा॰ प्र॰ सत्वव्याप्यजातिरवच्छेदकं च तस्य तत्तद्धर्मिविषयकत्वावच्छिन्नतत्तत्कोटिप्रकारकत्वमिति किंचित्त्वधिकं हेत्वाभा
५२ सेवक्ष्यामः निश्चयत्वस्य जन्यतावच्छेदकत्वं निराकरोति एवमिति उभयविषयकत्वेति एकधर्मिकत्वविरुद्धत्वयोः
प्रतियोगिकोटावनिवेशात्संशयस्य ज्ञानत्वरूपनिश्चयत्वादस्य विशेषः एतद्दृष्टान्तकथनं च पूर्ववत्प्रतिबंदिरू
42 चनाय ज्ञानत्वघटिताघटितेति ज्ञानत्वेन घटितमघटितं वा यत्संशयत्वं तच्छून्येत्यर्थः घटितत्वोपादानं पदार्थानु
सारेण निश्चयत्वघटकसंशयत्वशरीरे ज्ञानत्वनिवेशोनर्थकः ज्ञानत्वघटिततच्छून्यज्ञानत्वस्य तदघटिततच्छून्य
ज्ञानत्वसमनियतत्वादित्याशयेनाघटितेति एतच्चोपलक्षणं तद्धर्मिकतन्निश्चयत्वशरीरे तद्धर्मिणि तन्निष्ठतुकोभयप्र
कारकत्वनिविष्टस्य तत्तद्धर्मिणि तत्प्रकारकत्वरूपसंशयत्वघटकदलस्य प्रवेशोपि व्यर्थ इति तद्धर्मिणि तद्विरुद्धप्रकार राम॰
कत्वमस्यत्वमेवोपादेयं तद्धर्मिणि तत्प्रकारकत्वं चाधिकं निवेश्यं प्रकृतेन वह्निमान्पर्वतश्च वन्हिमानित्यादिबुद्धेर्वैस्या ५२
दिनिश्चयत्वनिर्वाहाय प्रतियोगिकोटौ तद्धर्मिणीति तद्धर्मितावच्छेदकविशिष्ट इत्यर्थकं अतः पाषाणमयो न वन्हि

मान्पर्वतश्चवन्हिमानित्यादिनिश्चयसंग्रहः समानविषयकत्वमात्रेणबाधादिहेतुः प्रतिबंधकत्वमतेतुघाषाणाम
पत्वादिनापर्वतेतदभावनिश्चयस्यापिपर्वतत्वादिनातत्रवन्ह्यादिज्ञानविरोधित्वादुक्तज्ञानेननिश्चयोपितुसंशयएवे
तिसमानप्रकारकत्वेनविरोधितावादिनवीनमतएवधर्मितावच्छेदकांतर्भावः तन्मतेचनधर्मिणोंतर्भावः समानधर्मिताव
च्छेदकविभिन्नधर्मिकत्वेप्युभयोरपिसंशयत्वात् एवंतन्मतेधर्मितावच्छेदकसामानाधिकरण्यमात्रेणविभिन्नधर्मिणि एकधर्मि
णिकोटिद्वयावगाहिज्ञानमपिनिश्चयः तथाविधकोटिनिश्चययोः परस्परमविरोधित्वात् अतोवच्छेदकावच्छेदेनविरो
धिप्रकारकत्वस्यत्वमेवनिवेश्यं धर्मितावच्छेदकसामानाधिकरण्यमात्रेणाविरोधिनमवच्छेदकावच्छेदेनचनतदुभयमव
गाहमानस्यतन्निश्चयत्ववारणायतद्धर्मितावच्छेदकविशिष्टतद्विरुद्धप्रकारकत्वविशिष्टस्यतद्धर्मावच्छेदेनतत्प्रकारकत्व
वारणायतद्धर्मितावच्छेदकविशिष्टतद्विरुद्धप्रकारकत्वविशिष्टस्यतद्धर्मावच्छेदेनतत्प्रकारकत्वस्याप्यभावः एष्यद्भिःवे
शनीयः ग्रंथकृतः संशयत्वघटकज्ञानत्वमात्रपरित्यागोप्यतएवसंगच्छते ईदृशाभावप्रतियोगिकोटौ कोटिद्वयप्रका

गदा०प्र० रकत्वनिवेशात्यन्नु धर्मितावच्छेदेनविरोध्यवगाहित्वंतदवच्छेदेनतद्वत्तावगाहिसंशयवृत्तितत्सामानाधिकरण्येनत
४३ द्विरोध्यवगाहित्वंवस्ववृत्तितद्वत्तावगाहित्वावच्छिन्नप्रतिवध्यतानिरूपितप्रतिवंधकतावच्छेदकत्वेनानुगमय्यैकाभा
वरवत्तन्निश्चयत्वशरीरेनिवेश्यतेसंशयनिष्ठंविरोध्यवगाहित्वमपिसंशयप्रतिवंधकतावच्छेदकघटकमेवसंशयनि
43 श्चयसाधारणतद्विषयितापारैक्यात्संशयत्वाभावविशिष्टतादृशविषयितायाःप्रतिवंधप्रयोजकत्वाच्चसंशयेनसं
शयप्रतिवंधइतितदसतदस्वत्वघटितत्वेनाननुगतत्वात्संशयप्रतिवंधकतावच्छेदकनिश्चयत्वस्यात्माश्रयेणातद्रूपत्वा
संभवाच्चसमानविषयकतामात्रेणाविरोधितामतेचएकधर्मिविषयकधर्मितावच्छेदकसामानाधिकरण्यमात्रेणाकोटि
द्वयावगाहित्वपिज्ञानंसंशयएवतन्मतेअवच्छेदकत्वावगाहनस्यविपरीतज्ञानप्रतिवंधकतायामतन्त्रत्वादित्यवधे
पंधर्मिविशेष्यकतद्भावस्यावश्यकत्वात्प्रकारभेदेनवतद्भेदेनापिनिश्चयत्वभेदइष्टएवसमानधर्मिकस्यैवनिश्चयस्य राम०
प्रहसादिजनकतयाविपरीतज्ञानादिविरोधितयाचधर्मिभेदेननिश्चयकारणत्वादिभेदस्यावश्यकत्वात्तदवच्छेदकनि ४३

श्चयत्वस्य धर्मिविशेषनियंत्रिततायाअग्रहणात्तत्तत्रतत्रसमानविशेष्यतायाः प्रत्यासत्तित्वमतेचधर्मिविशेषमनं
तर्भाव्यतत्प्रकारत्वविरोधिप्रकारकत्वमस्त्यत्वमेवकारणतावच्छेदकंवाच्यंसप्रकारकत्वस्यचधर्मिविशेषणकतया
ह्रदोनवह्निमान्पर्वतोवह्निमानित्यादिनिश्चयस्यपर्वतांशेशावच्छेदेनवह्न्यभावादिप्रकारकत्वाभावविशिष्टस
पर्वतादौविशेष्यतासंबंधेनसत्वान्नानुपपत्तिः ह्रदोवह्निमान्नवापर्वतोवह्निमानित्यादिनिश्चयस्यपर्वतत्वावच्छे
देनविरोधिप्रकारकत्वाभाववत्वेपिह्रदादौतद्विशिष्टस्यविशेष्यतासंबंधेनासत्वान्नतत्रविशेष्यतादृशकार्यजनन
प्रतिबंधप्रसंगः धर्मितावच्छेदकप्रत्यासत्तिमतेचतद्धर्माज्ञानत्वेनैवकारणत्वादिकंप्रत्यासत्तिश्चस्वनिष्ठविरोधिप्र
कारकत्वाभाववत्वावच्छेदकतावच्छेदकत्वविशिष्टधर्मितावच्छेदकत्वंपाषाणमयोवह्निमान्नवापर्वतोवह्निमानित्या
दिनिश्चयेपाषाणमयत्वावच्छिन्नपर्वतांशावच्छेदेनवह्न्यभावादिप्रकारकत्वसंत्वेपिपर्वतत्वावच्छिन्नपर्वतांशाव
च्छेदेनतत्प्रकारकत्वाभावोक्षतएवेत्यलमधिकेनसमुच्चयसाधारणपथवकोध्योर्विरोधावगाहितावघटितसंशयत्व

गदा॰त्र॰ अन्यत्वं प्रकृत्यादिजनकतावच्छेदके निवेशनीयं ननु विपरीतनिश्चयस्य प्रतिबंधकतायां तत्संर्यत्तनिवेशः तन्न रूभा
५५ वसमुच्चयस्य तद्व्यन्नाज्ञानाप्रतिबंधकत्वात् अन्यथा समुच्चयस्याप्यनुपपत्तेः नचैवं समुच्चयोत्तरं संशयापत्तिः समु
च्चयजनकस्याव्याप्यवृत्तित्वग्रहस्य भावाभावसामानाधिकरण्यावगाहित्वे न समुच्चयस्य च विरोधभानप्रतिबंधक
44 त्वात् कथंचिद्विरोधभानसंभवे समुच्चयवत्संशयस्यापीष्टत्वात् समुच्चयस्य समुच्चयसाधारणकोटिभानाविरो
धित्वे ध्रुवे विरोधभानविरोधिताया एव संशयविरोधिताबीजत्वात् नच वस्तुगत्या पद्विरोधितत्प्रकारकत्वमन्यत्वेन
निश्चयत्वघटकं अयं स्थाणुः पुरुषश्चेति समुच्चयस्य पुरुषत्वाभावग्रहविरोधितानुपपत्तेरिति गरुधमाणावि
रोधनिरूपकतावच्छेदकावच्छिन्नाप्रकारकत्वमेव तथा च पुरुषत्ववांस्तदभाववांश्चेति समुच्चयस्यापि पुरुषत्वाभा
वग्रहविरोधित्वं दुर्वारमेवेति वाच्यं पुरुषत्वाभावत्वाद्यवच्छिन्नाप्रकारकत्वस्यैव पुरुषत्वादिनिश्चयत्वघटकत्वो राम॰
पगमात् स्थाणुर्वा पुरुषो वेति संशयोपि स्थाणुत्वपुरुषत्वाभावमादाय कोटिचतुष्कावगाही अतस्तस्य पुरुष ५५

त्वाभावादियहाविरोधितायद्विचस्याग्गुत्वप्रयुक्तत्वाघोरभावानुयस्थितावपिपरस्परसामानाधिकरण्यग्रहेभा
वद्वयमात्रकोटिकःसंशयोनुभवसिद्धःसामग्रीवलसिद्धश्चनचतद्विरोधिधर्मवत्वग्रहस्याभावकोटिकसंशयभि
न्नस्यतद्बुद्धीप्रतिबंधकतयातदभावस्यकार्यकालेऽसत्वान्नसामग्रीतिवाच्यंपरस्परविरोधेनकोटिद्वयाभानेकोटि
द्वयमानविरोधिनोऽभावस्यकार्यकालेऽसत्वेतयोभयभानस्यैवदुर्वारत्वात्प्रागपह्निरोधिकोटिद्वयभानेविरोधिधर्म
वत्वाग्रहाभावस्यकार्यसहभावेनहेतुत्वानसंभवतीतिचेदस्तुएवंवत्निताम्मात्रेणावतहेतुताविरोधिनोरेकभानेतुल्य
वलायाश्चपरभानसामग्र्याःप्रतिबंधकत्वंचासिद्धंनचशंखत्वपीतत्वयोर्विरोधग्रहदशायांदोषविशेषवशात्पीतत्वाव
गाहितःशंखोयंपीतइतिभ्रमस्यसंशयत्वाभावात्भावद्वयकोटिकत्वंनसंशयत्वप्रयोजकमितिवाच्यंसाक्षात्करोमी
तिप्रतीतिसाक्षिकविलक्षणविषयताम्यकोटिद्वयविषयतायाएवसंशयत्वनिर्वाहकतयोक्तारोपेचपीतत्वांशेता
दृशविषयतानियमेनातादृशविषयताविरहादसंशयत्वादित्युच्यतेतदातादृशसंशयस्यतत्रकोटिविरहयहाप्रति

गदा०प्र० बंधकत्वोपपत्तये तत्तत्कोटिनिश्चयनिष्ठतद्विरहग्रहप्रतिबंधकतावच्छेदकनिश्चयत्वशरीरे गृह्यमाणाविरोधधर्मो
४५ प्रकारकत्वभावाभावसमुच्चयस्य तत्समुच्चयाविरोधित्वोपपत्तये च गृह्यमाणाविरोधित्वविशेषिततदभावाप्रकारकत्वं
चागत्या प्रवेशनीयमिति दिक् केकन्नेपेति तादृशनिश्चयत्वादीनां स्वघटकीभूताभावप्रतियोगिविरोधिप्रकारकत्वादि
45 प्रयोजकसामग्रीविरहसहिततत्प्रकारकधीसामग्रीनियम्यत्वादित्यर्थः नीलानीलघटत्वादिकमिति संशयत्वस्यका
र्यतानवच्छेदकत्वे नीलसामग्रीघटसामग्रीसमाजनिर्वाह्यं नीलघटत्वादिकं निश्चयत्वस्य तथात्वे च नीलसामग्रीवि
रहसहकृतघटसामग्रीनिर्वाह्यमनीलघटत्वं प्रसिद्धतरो दृष्टांत इत्यर्थः उभयारोपे सत्यारोप्यपदस्यात्रमार्थक
त्वासंभवादन्यथा व्याचष्टे आरोप्य इति अत्रमार्थकत्वासंभवबीजमाह सर्वत्रेति शिंशपादावाम्रत्वपनसत्वाद्युभयकोटिक
संशयस्यैककोटिकत्वांशे एवारोप्यत्वात् सर्वत्रेत्युक्तं संशय इति शेषः लाक्षणिकेनारोप्यपदेन विशिष्टज्ञानाभिधानप्रयो राम०
जनं दर्शयति आरोप्यपदे इति तुल्यबलत्वबोधनायेति बलवत्त्वालौकिकसन्निकर्षदूरत्वादिदोषाभावादिघटितायाः ४५

ककोटिभासकसामग्र्या परकोटिभानविरोधित्वं स्थापयितुं तुल्यबलताबोधनस्यावश्यकत्वादिति भावः आरोप
स्वविशेष्यघटितसन्निकर्षस्य स्वविशेषकतया प्राप्यशाउपनीतभानत्वेन कोटिद्वयोपनीतभानत्वाभावात्सामग्र्या
स्तुल्यबलतयातत्वाभावः एककोटिभानसामग्र्या अपरकोटिभानविरोधित्वे सामग्रीसमाजात्संशयोऽसंभव
तीतितस्याऽऽरतथात्वमाहमत्त्वेनत्वेकेतिसामग्री प्रतिबंधः सामग्रीविघटनं बलवत्या एककोटिभानसामग्र्या
अपरकोटिभानं प्रतिबध्यत एवेत्यतः फलयतिदीधितौ तुल्यबलयेति अप्रतिबंधकत्वे अप्रतिबंधकरूपस्याऽवि
रोधस्य हेतुताभिधानासंगतेरविरोधपदार्थं व्याचष्टे प्रतिबंधोऽयमित्यिकेतिनतु भवतु सामग्रीसमाजात्संशयस्ता
वताप्रकृते किमायातं तथाविप्रामाण्याप्रामाण्योभयविशिष्टज्ञानसामग्र्यानिश्चयप्रतिबंधात्प्रामाण्यसंशयो
त्रिराबाध एवे साकांक्षयामत्त्वेनवामयाऽरोयतिनचेत्सुनेतरमेवंसतीतिपूरणीयं वाच्यं वक्तुं शक्यं अत्र केचित्तानि
चत्तयं आशयं प्रकाशयति प्रत्येकारोयेति संशयोत्पत्तौ कोटिद्वयभासकसामग्रीसंवलनापेक्षायामपि संशयत्व

गदा॰प्र॰ स्वकार्यतावच्छेदकत्वेऽन्यसामग्री प्रत्येकारोपसामग्रीतो विलक्षणेव निश्चयत्वस्य तथात्वे च तादृशसामग्र्यास्त
४६ दवच्छिन्नप्रतिबंधकत्वं पुरस्तत एवेति शंकानिरासाय संशयनिश्चयत्वयोः कार्यतावच्छेदकत्वमेव एवं सति नास्ति उक्त
युक्तेरिमूलस्य भावं व्याचष्टे दीधितौ अन्यदिति संशयत्वादेः कार्यतानवच्छेदकत्वेपि अधिकबलत्वमपरस्मात्स्यैकको
46 टिज्ञानसामग्रीतोऽपरकोटिज्ञानं प्रतिबध्नीयादिति न प्रकृते प्रामाण्यनिश्चयो भविष्यतीत्याशंकां निराकर्तुमधिकबल
त्वपुरस्कारेणुक्तिं दर्शयति तुल्यबलेति सामग्रीद्वयसमाजात्संशय इत्यत्र शंकते तन्नूलेन चेति समाधत्ते समन्हालं
बनवदिति ज्ञानस्थले सामग्रीभेदो न कार्यभेदप्रयोजकोपि तु सामग्र्योरसंवलनमेव तत्संवलनं तु कार्याभेद एव
प्रयोजकमिति समन्हालंबनांतरवत् अभिन्नकोटिद्वयविशिष्टज्ञानानूपसंशयनिर्वाहादित्यर्थः संशयत्वनिश्च
यत्वयोः कार्यतानवच्छेदकत्वे संशयत्वावच्छिन्नं प्रत्यपि निश्चयसामग्र्यभावस्य हेतुत्वासंभवात्कोटिद्वयभानसा राम॰
मग्रीसत्त्वे निश्चयोपधायकसामग्र्या एव दुर्घटत्वाच्च प्रामाण्यसंशयस्य प्रकृतेनानुपपत्तिरितिशंकानिराकर ४६

णापरतयातस्मादित्यादिमूलंव्याचष्टे अथैवमितिप्रकृतेअप्रामाण्यभानेप्रामाण्यनिश्चयस्यैवासंभवान्निश्चयसा
मग्र्यासत्त्वात्तत्संशयइत्यसंगतमतःप्रामाण्यनिश्चयसामग्रीपदमधिकबलप्रामाण्यग्रहसामग्रीपरतयाव्या
स्यतेअतोधिकबलसामग्रीप्रतिबंधकत्वंप्रकृतप्रामाण्यग्राहकसामग्र्याअधिकबलत्वंचप्रथमंव्यवस्थापयतितु
ल्यबलाभ्यामित्यादिनाव्यवसायेसंदिह्यतइत्यतेनतत्राधिकबलतायाःप्रतिबंधोपयिकतयाएककोटिमानसामग्र्याअ
परकोटिमानप्रतिबंधकत्वेपिनसंशयानुपपत्तिस्तुल्यबलसामग्रीभ्यामेवसंशयजननादित्येवएवंदर्शयतितुल्यब
लाभ्यांहीतिसामग्रीभ्यामितिकर्तृत्वंज्ञानकरणमर्यादयेतिज्ञानकरणमेकदाएकंज्ञानंजनयतीतिनियमस्यार्थःधी
तत्वाभावादेरित्यत्रनज्ञानस्यसंभवइत्यनुषज्यतेतेननञुकोटित्वावच्छेदकविशिष्टांशेसाक्षात्त्वग्रहप्रयोजकविषय
ताशालिज्ञानसामग्रीविपरीतकोटिमानसामग्र्याबलवत्सास्त्वांबहिर्विषयघटितप्रामाण्यग्रहसामग्रीचनतथावहि
र्विषयांशेमानसस्यतादृशविषयताविरहात्अतएवोपनीतसौरभादिविशिष्टद्रव्यादिलौकिकचाक्षुषसामग्रीका

गदा॰ प्र॰ ५७ 57

त्वेपि सुरभि द्रव्यवान्नवेत्यादिश्चाक्षुषसंशय इत्यत आह अधिकवलाचेति विषयनिरूप्यत्वमर्थो दोषरहिता ज्ञापक
सामग्री विषयनिरूप्यहीत्यादियुक्त्योपनीतविषयोपरागगोवयोगपविषयिता विशिष्टज्ञानादिलौकिकप्रत्यक्षसाम
ग्रीतत्प्रकारकत्वादेः रजतत्वादिमद्विशेष्यकत्वावच्छिन्नत्वाविशेषितरजतत्वादिप्रकारकत्वादेः आदिना ग्रहणवर्त्ति विशेष्य
कत्वपरिग्रहः इदमायाततः अनुभवानुरोधेन तत्प्रकारकत्वादिग्रह सामग्र्यास्तदभावग्रहप्रतिबंधकत्वेपि प्रामाण्यग्रह
सामग्र्यास्तदभावग्रहप्रतिबंधकत्वानुपगमसंभवात् अनुगतरूपेणाप्रतिबध्यप्रतिबंधकभावासंभवात् अत एव धर्मिज्ञा
नस्य संशयहेतुत्वव्यवस्थापनेन प्रामाण्यनिश्चयप्रतिबंधान्न प्रामाण्यसंशय इत्येतेन मूलकृता निर्भरः कृतः मिश्रा
स्तु प्रामाण्यनिश्चयसामग्रीप्रतिबंधेन प्रामाण्यसंशयानुपपत्तेरुक्तरूपस्यासंगतेरारोपे संशयधारणानूपावच्छि गम॰
न्नधर्मिज्ञानस्य हेतुतया धर्मिज्ञानविशेषादर्शनघटितकोटिद्वयनिश्चयसामग्रीसमाजात्संशयः प्रकृते च ज्ञानरूपध ५७
र्मिज्ञानसत्वे प्रामाण्यनिश्चयरूपविशेषादर्शनसत्वान्न संशय उपपद्यत इत्यर्थपरतया विदुरारोपेत्यादिमूलं व्याख्यातं

वंतत्तन्मतेएककोटिमानसामग्र्याअपरकोटिमानंप्रतिप्रतिबंधकतायाःसंशयानुपपत्त्याअकल्पनेपिउभ
यकोटिमानसामग्र्याएककोटिनिश्चयप्रतिबंधकतयाकोटिद्वयनिश्चयसामग्रीसमाजेतिनसंगच्छतइतिशे
कापरतयानचेत्यादिमूलंव्याख्येयंउभयारोपसामग्रीनातिरिक्ताकिंतुसामग्रीद्वयंतत्रतत्कोटिमानसामग्रीन
तत्कोटिनिश्चयप्रतिबंधिकाविरोध्यग्राहकत्वात्विरोधिकोटिग्राहकसामग्र्यास्तत्कोटिनिश्चयप्रतिबंधकत्वेपि
आरोपसामग्रीपदेनविरोध्यग्राहकसामग्र्यभावातिरिक्तनिश्चयासाधारणकारणसमुदायस्यविवक्षितत्वान्नदो
षइत्यर्थकतयाप्रत्येकारोपेत्यादिमूलंव्याख्येयंतस्मादित्यादिग्रंथस्यधर्मिज्ञानस्यसंशयहेतुत्वात्ज्ञानग्रहपू
र्वंतदभावेनप्रामाण्यनिश्चयस्येवसामग्रीसत्त्वात्तज्ज्ञानग्रहस्तत्संशयरूपोनवातदुत्तरमपिसंशयःधर्मिज्ञानस
त्त्वेपिविशेषादर्शनविरहेणतत्सामग्रीविरहादितिव्याख्येयःसंशयत्वस्यकार्यतावच्छेदकत्वनिराकरणपरत
याएवंमूलग्रंथंव्याख्यातवतोदीधितिकारस्यमतेधर्मिज्ञानंचेत्यादिसंशयंप्रतिधर्मिज्ञानस्यहेतुताभिधानंन

गदा॰प्र॰ संगच्छते तथा सति संशयत्वस्य जन्यतावच्छेदकतया आवश्यकत्वात्सामान्यलक्षणाप्रत्यासत्तिजन्यज्ञानधर्मि
५८ विशेष्यकज्ञाने व्यभिचारेण विशेष्यकबुद्धित्वमात्रस्य धर्मिज्ञानजन्यतावच्छेदकत्वासंभवात्संशयत्वस्यैवाप्रमा
त्वस्यापार्थसमाजग्रस्तत्वया तस्यापि तन्मते धर्मिधीजन्यतानवच्छेदकतया तदवच्छिन्नहेतुतापरतयापि न मूल
58 संगतिर्वक्तव्या तः साधारणादिधर्मवद्धर्मिज्ञानहेतुतयैव संशये धर्मिनियमस्य दर्शनीयतया संशयत्वस्य जन्यता
वच्छेदकत्वमावश्यकं तत्र तदभावसहचरितधर्मवत्ताज्ञानत्वेनैव तस्य हेतुतया वाच्यतयैकैककोटिविशिष्टबु
द्धित्वस्य तज्जन्यतावच्छेदकतया व्यभिचारेणासंभवात् तत्कोटिसहचरितधर्मवत्ताज्ञानत्वतदभावसहचरितध
र्मवत्ताज्ञानत्वाभ्यां पृथक्कारणत्वेपि आरोप्यसहचरितधर्मवत्ताज्ञानापेक्षायामपि अवाधितकोटिविशिष्टबुद्धौ राम॰
तत्सहचरितधर्मवत्ताज्ञानानपेक्षणात् तज्जन्यतावच्छेदककोटौ संशयत्वनिवेशनावश्यकत्वात् इत्यार्थसमाजग्र ५८
स्तधर्मस्यापि जन्यतावच्छेदकत्वाभ्युपगमपरतया मूलं दीधितिकृद्व्याचष्टे अभ्युपेत्येति साधारणधर्मवत्ताज्ञानस्य

जन्यतावच्छेदकगर्भे संशयत्वनिवेशेप्यसाधारणधर्मवत्ताज्ञानादिजन्यसंशयेव्यभिचाराद्दव्यवद्भिन्नोत्तरत्व
स्यतज्जन्यतावच्छेदकतायाश्चावश्यकत्वात्संशयत्वनिवेशोनिर्युक्तिकइतिध्येयंधर्मिज्ञानहेतुतयाधर्मितावच्छे
दकभानानियमाद्धर्मिज्ञानपदंधर्मितावच्छेदकविशिष्टधर्मिज्ञानपरतयाव्याचष्टेधर्मितावच्छेदकेतितद्धर्मिताव
च्छेदकपुरस्कारेणधर्मिविषयकेसंशयेइंद्रियसन्निकर्षादिमतातद्धर्मोश्रयसकलधर्मिणांभातोपगमेधर्मिता
वच्छेदकप्रकारकज्ञानस्यैनैवहेतुतावाच्यानतुधर्मिविषयत्वमप्यंतर्भावनीयमित्यवधेयं।ननुधर्मितावच्छेदकवि
शिष्टधर्मिज्ञानसामान्यहेतुतयासंशयेतद्भाननियमइतिनोपपद्यतेधर्मीद्रियसन्निकर्षादेरेवधर्मिभाननियमो
पपत्तेः नचानेकधर्मिष्विंद्रियसन्निकर्षादिसत्वेपिकुत्रचिदेवधर्मिणिसंशयःकुत्रचिन्नेतिनियमोनधर्मींद्रियसंनि
कर्षादितोनिर्वहतीतिधर्मिज्ञानमेवतन्निर्वाहकमितिवाच्यं।संशयेधर्मिज्ञानहेतुत्वेपिवहुषुधर्मिष्विंद्रियसन्निक
र्षादिसत्वेकस्यचिदेवधर्मिणोज्ञानंकस्यचिन्नेत्यत्रनियामकाभावेनसर्वेषामेवसन्निकर्षादिशालिधर्मिणांज्ञान

गदा०प्र० स्यावर्जनीयतयासंशयेधर्मिभाननियमनिर्वाहात्तयद्विशेषाननुगततत्तत्सन्निकर्षादिव्यक्तिघटितसामग्रीसंशयजनक
५९ ज्ञानेधर्मिभाननियामिकोपेयतेतदासंशयस्यतत्तद्धर्मिविषयकतायामेवसाप्रयोजिकास्तुकिंमततराधर्मिज्ञानांतरक
ल्पनयायदितत्तद्धर्मिविषयकप्रत्यक्षत्वावच्छिन्नोत्पत्त्यावननुगततत्तत्संनिकर्षव्यक्तिघटितसामग्रीणांप्रयोजकत्वे
प्यैक्येपितत्तद्धर्मिविषयकसंशयत्वावच्छिन्नोत्पत्तावप्यनुगतसामग्र्याःप्रयोजकत्वसंभवस्तदातत्कल्पनमेवोचितमि
तिमन्यतेतदातत्तद्धर्मिभानप्रयोजकसामग्रीत्वेनैवतत्तद्धर्मिकसंशयत्वावच्छिन्नंततत्तद्धर्मिकसंशयत्वावच्छिन्नप्रयोज
कास्तुतत्तद्धर्मिभानप्रयोजकसामग्रीत्वापेक्षयातत्तद्धर्मिज्ञानत्वंधिधितिचेत् भवत्वेवंतथापितेनैवरूपेणधर्मिज्ञानहेतु
त्वेतत्तद्धर्मिज्ञानसत्वेतत्तद्धर्मिभासकचक्षुःसंयोगादिविसंगमेपितत्तद्धर्मिकसंशयापत्तिः नचतदाचाक्षुषादिसंशयस्य
विशेष्यभासकलौकिकसन्निकर्षाभावेनानुत्पादेपिमानसस्तादृशसंशयइष्यतइतिवाच्यंतदानीमस्यविषयकचाक्षु राम०
षादिसामग्रीसत्वेमानसोत्पादासंभवात् अतएवनिश्चयेपिनविशेष्यज्ञानंहेतुरपितुतत्सामग्र्येवेतिकोप्युत्कटत्वंच ५९

नस्यादितियुक्तंपतन्मवतारयितुंमिश्रैः पूर्वोक्तयुक्तावुपवर्णितानुशयवीजमूलतामनुपपत्तिस्वयं पूर्वयुक्तावेव
निर्भरस्यवक्तव्यतयोद्दर्तुंसाधारणादिधर्मवद्धर्मिज्ञानस्यपकारणस्यसंशयेधर्मिभाननियामकत्वमित्येतत्त्व
दर्शनपरतयाऽन्यथेत्यादिमूलंव्याचष्टेऽन्यथेतिधर्मिणःसंशयोभवेदित्यंतं संशयेधर्मिनियमोनस्यादि
त्यस्यव्याख्यासाधारणादिधर्मवत्वेनधर्मिणोज्ञानमपिइंद्रियसन्निकर्षरूपधर्मिभासकसामग्रीसहकारेणैव
संशयजनकमन्यथातिप्रसंगात्रथाचतादृशसामग्र्येवान्यथासिद्धिरित्याशंकामपनेतुमाहइंद्रियसन्निक
र्षादिशालिनीतिइंद्रियसन्निकर्षवलादग्रस्थमाणइत्यर्थः आदिपदादालोकसंयोगदूरत्वादिदोषाभावयोग्य
तानांपरिग्रहः अग्रस्थमाणेतिअग्रस्थमाणःसमानादिःकोटिद्वयसहचरितोधर्मोयत्रसतादृशधर्मोतस्मि
त्यर्थः आदिपदादसाधारणधर्मपरिग्रहःसंशयोभवेदितिअत्रेत्यपत्रिरनुभवविरोधान्नसंभवतीतिभावः
ननुसमानादिधर्मविशिष्टधर्मिज्ञानजन्यतयाऽभिमतसंशयेसमानादिधर्मिविशिष्टस्यधर्मिणोभानोपगमा

गदा॰प्र॰ त्तादृशधर्म्मिभासकसामग्र्याएवसंशयेधर्म्मिभाननियामकत्वमस्तुकिंतादृशधर्म्मिज्ञानहेतुतयेतिशंकांनिरस्यति
५० नचतद्धेतोरेवेतिज्ञानस्यसामग्रीत्यसमासइतिस्वनंभग्निमतत्पदाभ्यांज्ञानस्यपरामर्शस्फुटीकर्त्तुंहेतुरितिआ
स्तांसंशयइतिशेषः समानादिधर्म्मवत्ताविषयकस्यैवनियमतः संशयइत्याशयंनहितद्ग्राहकसामग्रीहे
50 तुतेतित्रि अनुमित्यादौचनव्याप्यवत्त्वादिज्ञानसामग्र्याहेतुतासंभवतिप्रत्यक्षादिनानुमितेरयोगपद्याव्याप्य
वत्ताप्रत्यक्षादिसामग्र्या अनुमितिहेतुत्वायोगात्तद्विषयकानुमितिसामग्र्याश्चान्यस्या अकृप्तत्वादितिभावः
अननुगमादितियद्यप्यननुगतानामपिसाधारणधर्म्मादिभासकसामग्रीणांसंशयहेतुत्वंसंसंशयेपितद्भानो
पगमात्तथापितादृशसामग्रीणांमध्येयस्यासंशयोपधानप्रयोजकत्वकल्पनेगौरवात्तादृशधर्म्मवत्ताज्ञानस्य राम॰
हेतुतामुपेत्यतद्घटितानुगतसामग्र्यास्तथात्वकल्पनेलाघवंधर्म्मिज्ञानहेतुत्वेपियथाधर्म्मिभासकसामग्र्या ५०
अपेक्षातथासाधारणादिधर्म्मविशिष्टधर्म्मिज्ञानहेतुत्वेनतद्विशिष्टधर्म्मिभासकसामग्र्याआवश्यकीधर्म्मिभासक

सामग्रीसामान्यापेक्षयैवानतिप्रसंगादितिभावः ननुसमानादिधर्मवत्ताभासकसामग्रीणांनानात्वेपितद्वत्ताज्ञानो
त्पत्तिप्रयोजकतावच्छेदकविशिष्टत्वेनानुगमय्यतासांकारणत्वंकल्पयित्वातदवच्छिन्नघटितानुगतसामग्र्याःसंश
योयथानप्रयोजकत्वमुपगंतव्यमिसाशंकांनिरस्यतितत्तत्सामग्रीत्वेनेतितत्वेनैवतादृशधर्मवत्ताज्ञानत्वेनैवनच
तथासतिधर्मिभासकसामग्रीत्वेनापिहेतुत्वांतरंवाच्यंतदपेक्षयासमानादिधर्मवद्धर्मिज्ञानसामग्रीत्वेनैवहे
तुत्वकल्पनंयुक्तमितिवाच्यंनिश्चयसाधारणतद्धर्मिकविशिष्टबुद्धौतद्धर्मिभासकसामग्रीत्वेनहेतुतायाःक्लृ
प्तत्वात्धर्मिज्ञानस्यसंशयेहेतुत्वव्यवस्थितौप्रामाण्यसंशयोनोपपद्यतइतिदर्शयतितथाचेतितेनप्रामाण्य
निश्चयेनतत्रव्यवसायेप्रामाण्यसंशयइत्यग्रिमेणासंबंधकोट्युत्कटत्वनियामकतयाधर्मिज्ञानहेतुतायाविचा
रासहत्वात्सर्वेयुक्तावेवनिर्भरइत्याहअन्वाचयइतिविचारासहत्वमेवदर्शयतितथाहीतितन्नियामकंसंशय
स्यतद्धर्मिविशेषणतापन्नतत्कोट्यंशेउत्कटत्वनियामकंतत्कोटीतितत्कोटिसहचरितत्वविशिष्टेभयोर्मिथोमैर्वि

गदा०प्र०
५१
51

शिष्टस्यधर्मिणोज्ञानंकारणमिमित्यर्थःन्नयस्त्वंचविपरीतकोटिसहचरितत्वेनगृह्यमाणधर्मोयेस्यात्रआधि
क्यंमन्यस्तुस्थानेषुगृहीततत्सहचाराङ्कयोधर्मदर्शनादपिउत्कटतत्संशयस्यक्वचिदुत्पन्नस्ताहृशस्यापिवैक
ल्पिकहेतुतामाहमन्यइतिउत्कटसंशयेताहृशधर्मिज्ञानविशेषहेतुत्वेपिप्रकृतेधर्मिज्ञानंविनानुत्कटप्रामाण्य
संशयोभविष्यतीतिशंकानिरासायाहतद्वलाच्चेतियद्विशेषयोरित्यादिनियमादितिशेषःततउत्कटत्वंतयाजाति
संशयत्वंतद्व्याप्यमनुत्कटंचमानसत्वव्याप्यमेवतथाचनचाक्षुषत्वादिनासंकरइत्यतआहआंशिकत्वाच्चेतिमिश्रे
स्तत्रआंशिकत्वस्यजातिबाधकतामनादृत्याव्याप्यवृत्तिःसंशयजातिरितिसुकंतामाइत्यताहृशधर्मविषयकत्वमुपाधि
र्वेत्यभिहितंदीधितिकारस्तुजातेर्व्याप्यवृत्तितानियमस्यसिद्धान्तसिद्धतयाउपाधिनैवव्यवहारोपपत्तावुत्कटत्व
जातेरप्रामाणिकतयाचाव्याप्यवृत्तिताहृशजातिमवलंब्यसिद्धान्तप्रणापनेप्रमात्वजातिनिराकरणमतोन्नलकृतोनु रम०
चितमित्याशयेनांशिकतयाजातिपक्षंनिराकृत्यउपाधिपक्षंहृषयितुंताहृशोपाधिंनिर्वक्तिपरत्वितिप्रकृतधर्मि ५१

णीयत्रतादृशधर्मो न गृह्यते तत्र स्वांतेऽपराधर्म्येतरविशेषणातयावा तादृशधर्माभानेपि न धर्मिणि उत्कटतत्कोटिसंशय
तेति तादृशधर्मप्रकारेण प्रकृतधर्मिविषयता पर्यंतमुक्तं तेद्वतादृशधर्मिविषयकत्वमेव तत्र तादृशधर्मिविषयकत्वा
वच्छिन्ननियामकं कारणतावच्छेदकं जनकत्वेनाभिमतं धर्मिज्ञानं द्वयं संशयेपि तादृशधर्मविशिष्टधर्मिविषयकत्वस्य
मग्रंतरादेव निर्वाहेण तादृशरूपेण कार्यकारणभावे मानाभावादिति भावः इदंतु तत्वं अत्रेदं संभावयामी त्यनुगतप्रतीति
साक्षिकं संभावनात्वमव्याप्यवृत्तिजातिर्विषयताविशेषो वानन्तकोयाधितत्स्वघंकविरुद्धकोटिसहचरितधर्मिविषयक
त्वरूपतयाऽकविश्वतत्कोटिसहचरितस्योधर्मविशिष्टधर्मिविषयकत्वरूपतयास्यत्वस्ययथायोगंद्वित्वत्रित्वचतुष्ट्वा
दिरूपतयाऽननुगमात्तन्नियामकं च तस्यागत्या अननुगतमेवोपेयत इतिमत्वे विशेषदर्शनेपीतिग्रंथवादावपीत
त्वादिनिश्चये पूर्वं सत्यपीत्यर्थः तदुक्तावपीतिपथातत्रपीतत्वादिभ्रमे सत्यपि पूर्वोक्तवादपीतत्वादिनिश्चयात्तत्प्रका
रिकाप्रवृत्तिर्जायते तत्या रजतादिज्ञानेऽनभ्यासदशापन्नेपि प्रामाण्यग्रहस्वीकारात्तदुत्तरं कथंचित् प्रामाण्यसंशयेपाप

गदा॰प्र॰ पादेनेपि निश्चितप्रामाण्यकतयानभ्यासदशायत्रज्ञानस्यापि प्रवर्त्तकतास्यादित्यर्थेः अप्रामाण्यज्ञानानास्कंदितज्ञा
५२ नप्रवर्त्तकत्वेनापं दोषाणोहूषणांतरमाहसाक्षात्कारीतित्र्प्रनेनग्रंथेनविशेषदर्शनदशायांपीतत्वादिभ्रमोपपादनं
प्रामाण्यसंशयोपपत्तौसत्यांस्वतःप्रामाण्यग्रहेनदूषणमतोदोषाधीनत्वस्मतदनुपपादर्शनायदोषवशाद्यथापीत
52 त्वादिभ्रमइतिदृष्टांतदूषणामिदमित्याहसत्यपीतियत्रप्रथमंदोषासत्वात्तरांखेनपीतइतिचाक्षुषंदोषसमवधानंच
तत्रतादृशदोषवशात्पीतत्वभ्रमोपपद्यतेतियद्यप्यपीतःशंखइत्यादेरर्थस्तदातदुपरिसाक्षात्कारीत्यादिदूषणासंगतिःसा
क्षात्कारिविपरीतनिश्चयस्यैवतत्रसत्वेनदोषाधीनत्वयेवतदुपपत्तेरित्यानुमानिकविपरीतज्ञानदशायामेवासौग्रं
थःसमानेंद्रियजन्यलौकिकापीतत्वादिनिश्चयस्थलेदोषसमवधानेपितादृशनिश्चयनाशएवपीतत्वादिभ्रमोत्प राम॰
त्तेःश्रमन्यथासमानेंद्रियजन्यताप्रयुक्तविरोधितायाएवोच्छेदात्दोषविशेषात्तन्पीतत्वाद्यारोपेविपरीतनिश्चयमा ५२
त्रस्यैवप्रतिबंधकत्वादित्याविष्कृतनुमानुमानिकइत्युक्तेश्र्प्रानुमानिकविपरीतनिश्चयस्योक्तभ्रमाविरोधितालाभाय

साक्षात्कारीत्यनंतरमेवकारं दर्शयति साक्षात्कार्येवेति ॥ ननु यत्र साक्षात्कारित्वं साक्षात्त्वग्रहयोग्यत्वं अतः साक्षात्का
रित्वजातेः पित्ताद्यजन्यपीतत्वाद्यारोपात्मकपीतत्वाद्युपनीतभानसाधारण्येपि न क्षतिः साक्षात्कार्येपि शंखत्वादि
दर्शनेन पीतत्वाद्यारोपविरोधीति विशेषदर्शनपदं व्याख्याभावनिश्चयपरतया व्याचष्टे विपरीतनिश्चय इति
एवकारव्यवच्छेद्यं स्पष्टयति न त्वानुमानिकादिरिति विपरीतनिश्चय इत्यनुषज्यते अत्र साक्षात्कारिविपरीतनिश्चये
साक्षात्कारित्वमविरोधित्वाभावः एवेति तेवकारलभ्यार्थः एवं तथादर्शनादिति भ्रमस्य तथापदेन परामर्शः न्नमविशे
षत्वप्रज्ञानप्रतिबंधकतायां साक्षात्कारित्वस्य प्रयोजकत्वाभिधानात् संशयत्वप्रज्ञानस्य प्रतिबंधकतायां तस्याप्रयोजक
त्वं लभ्यते विशेषविधेः शेषनिषेधपरतया औत्सर्गिकत्वादिति विपरीतनिश्चयसामान्यस्यैव संशयप्रतिबंधकतालाभ
इति स्फुटयति संशये त्विति तन्निश्चये । विपरीतनिश्चये तस्य । संशयस्य अनुत्पादात् न च प्रकृते प्रामाण्यस्य तन्म
ते साक्षात्कारिनिश्चयस्यैव सत्वात् साक्षात्कारित्वस्य संशयप्रतिबंधकतायां तत्रत्वेपि संशयानुपपत्तिसत्वात्तस्यां तथा

गदा॰प्र॰ त्वस्यां तत्र तत्प्रतिपादनं प्रकृतानुपयोगीति प्रकृतोपयोगितया तदभिधानासंगतिरिति वाच्यं अनुव्यवसायस्य प्रामाण्यघ
५३ टकज्ञानधर्मप्रकारितांशे लौकिकत्वेपि तद्घटकवह्निविषयांशेऽलौकिकत्वमिति पित्तादिदोषाप्रतिबध्यस्य तुल्यत्वा
53 घांशे उपनीतभानात्मकस्य रूपादिलौकिकग्रहस्य सत्त्वे शंखो न श्वेत इत्यादिसाक्षात्कारिभ्रमोत्पत्तासाक्षात्कारिभ्रम
प्रतिबंधे प्रकारतावच्छेदकांशे लौकिकत्वापेक्षावत्संशयप्रतिबंधेपि तदपेक्षायां प्रकृते संशयोपपत्तिसंभवात्तत्र तदन
पेक्षानुसारेण स्यादावश्यकत्वात्पीतत्वादिभ्रमस्थलप्रकृतस्थलयोरेतावताविशेषलाभेन प्रकृतप्रामाण्यसंशयानु
पपत्तितादवश्यकत्वात्पीतत्वादिभ्रमस्थलप्रकृतस्थलयोरेतावताविशेषलाभेन प्रकृतप्रामाण्यसंशयानुपपत्तिता
दवस्थ्यपरतामुक्तग्रंथस्य स्फुटयति तथा चेति प्रतिबंधकविरहादिति न च विपरीतनिश्चयसामान्याप्रतिबध्यत्वं पी
तत्वभ्रमस्य साक्षात्वग्रहयोग्यताधीनं तद्योग्यतापि लौकिकसन्निकर्षाजन्यस्य तस्य दोषविशेषजन्यतैयैव तथा च दो राम॰
षविशेषसमवधानस्थले पीतत्वग्रहप्रतिबंधकाभावस्तत्समवधानाधीन एवेति प्रामाण्यसंशयस्थलेपि दोषस्य ५३

वधानात्प्रतिबंधकाभावविनिर्वाहः संभवतीत्यविशेषइतिवाच्यं संशयेकचिदपिसाक्षात्कारग्रहेणासंशयजनकं दोषस्यसा
क्षात्कारित्वग्रहणाप्रयोजकतयादोषजन्यत्वेपितस्यतद्योग्यत्वेनविशेषात्तविशेषावक्ष्यतइतिसाक्षात्कारित्वमप्रतिबंध
कतायांसाक्षात्कारित्वमात्रेनतंत्रंअपितुसमानेंद्रियजन्यत्वसहितमतस्त्वचाउरगत्वाभावादियेहेपिदोषविशेषाद्
शादापुरगत्वादेश्चाक्षुषायाधारोपइतिवक्ष्यतइत्यर्थः विपरीतनिश्चयसामान्यंयत्रप्रतिबंधकतत्रतदभावव्याप्यदर्श
नादिकमपियथानुमित्यादाविति नियमाद्विपरीतनिश्चयसामान्यस्यसंशयप्रतिबंधकताभिधानेनअप्रमात्वसंशयेपिप्र
माणपनिश्चयस्यप्रतिबंधकत्वलाभात्प्रमात्वनिश्चयेनप्रतिबंधात्तदभावसंशयोमास्तु अप्रमात्वसंशयेप्रमात्वग्रहप्रतिबं
धकत्वस्यात्माभेअप्रमात्वसंशयश्चतज्ज्ञानाज्ञानाभ्यांनसंभवतीत्युक्तत्वादित्यपिमनस्त्वासंगतिरित्ययिनिरस्तं आलोककी
रास्तुविशेषदर्शनमितिविशेषस्यविपरीतस्येवदर्शनमित्यर्थकएवंचअप्रमप्रतिबंधकतायांसाक्षात्कारित्वस्यैवग्राह्यत्वा
भावावगाहित्वस्याप्यपेक्षावाधनात्संशयप्रतिबंधकतायांग्राह्याभावावगाहित्वानपेक्षायाअपिउक्तयुक्त्यनिर्वलेन

गदा०प्र०
५४
54

लाभात्प्रमात्वनिश्चयस्याप्रमात्वसंशयप्रतिबंधकतालाभ इति प्राहुः ननु संशयस्य साक्षात्त्वग्राह्ययोग्यत्वेन न विपरीत
निश्चयसामान्यप्रतिबध्यता दोषविशेषजन्यप्रमत्वेलौकिकसन्निकर्षजज्ञानसाधारण्यात् तद्योग्यतायाश्चानुगतायाः दुर्वचत्वात्
नापि संशयत्वेनानुमित्याद्यग्रहात् नापि प्रत्यक्षनिश्चयान्यज्ञानत्वेन निश्चयत्वव्यप्रमोपनीतभानासंग्रहात् नच
तदसंग्रहे पि तत्क्षतिः। विपरीतज्ञानोत्तरप्रत्यक्षनिश्चयान्यज्ञानत्वेन निश्चयत्वव्यप्रमोपनीतभानासंग्रहात् नच तदसंग्र
हे पि तत्क्षतिः। विपरीतज्ञानोत्तरप्रत्यक्षनिश्चये विशेषदर्शनस्य हेतुतया बाधनिश्चयसत्वे विशेषदर्शनस्यावश्यकत्वे निश्चयो
पनीतभानाप्रसंगात् तत्सत्वे च तस्य ग्रहत्वादिति वाच्यं विशेषदर्शनहेतुतायाश्चानेनानभ्युपगमात् नापि लौकिकान्यज्ञान
त्वेन लौकिकसन्निकर्षजन्यसंशयाग्रहात् अयथालौकिकनिर्णयान्यज्ञानत्वं प्रतिबध्यतावच्छेदकं च स्तूतो लौकिकान्य
ज्ञानत्वमेव तथा लौकिकसन्निकर्षो न संशयजनकः सर्वत्रकोटिद्वयोपस्थितिसत्वेनोपनयसन्निकर्ष एव क्वचिद्धर्मिणो राम०
पि लौकिकसन्निकर्षो विशेषादर्शनसहितः तद्रूपत्वादिदोषेण प्रतिबंधाद्वा वास्तवकोटिग्राहकत्वात् दशदोषासत्वे च क्व ५४

स्यात् लौकिकप्रत्यक्षसामग्र्याः प्रतिबंधात्तद्विपरीतकोटिमानसंभव इति संशयो नो यद्यप तइति चेन्न यथा पि पित्ता
दिदोषजन्यस्मर्यमाणापीतिमाद्यारोपस्यानुमानिकाद्यपीतत्वनिश्चयस्य प्रतिबंधकत्वापत्तिर्दुर्वारैवमत्र
दोषविशेषाजन्यालौकिकज्ञानत्वं तथेति चेन्नर्हि साधकं विशेषदर्शने दोषात् राडुमवदप्रामाण्यसंशयो भविष्यती
ति चेत्सत्यं एतदालोच्यैव प्रामाण्यनिश्चयेपि दोषात्संशय इत्येतन्निराकरणायैरत्वं न चेत्यग्रिमग्रन्थस्य वक्ष्यति नव्या
स्तत्रालौकिकज्ञानत्वं विपरीतनिश्चयसामान्यप्रतिबध्यतावच्छेदकं तत्रालौकिकत्वं च न लौकिकसन्निकर्षाद्यजन्य
त्वं तत्रापि तु साक्षात्त्वव्यंजकतदीयविषयताविशेषशून्यत्वं तादृशी च विषयता लौकिकसन्निकर्षाद्यजन्यत्वं तत्रापि तु
साक्षात्त्वव्यंजकतदीयविषयताविशेषशून्यत्वं तादृशी च विषयता लौकिकसन्निकर्षजन्यैव क्वचित् पित्तादिदोषज
न्यस्मर्यमाणापीतिमाद्यारोपेपि प्रामाणिकी तत्र पीतं साक्षात्करोमि पश्यामीति प्रत्ययात् तत्र लौकिकसन्निकर्षस्य व्य
भिचारोऽगत्या दोषविशेषाजन्यत्वं कार्यतावच्छेदके निवेशयवारणीयः इत्थं च विपरीतनिश्चयसामान्यप्रतिबध्यता

गदा॰प्र॰ ५५ 55 यामपिदोषविशेषाजन्यत्वमनिवेश्यैवपीतः शंखइत्याद्यारोपउपपादयितुंशक्यः संशयेचनतादृशीविविषयता
तत्रसद्वृत्तीसेवानुव्यवसायात् ननुसाक्षात्करोमीतिश्चातः संशयमात्रस्यविपरीतनिश्चयसामान्यप्रतिबध्यत्वमि
त्याहुः व्यवसायादावितिप्रामाण्यघटकत्वधर्मधर्मिवैशिष्ट्यभासकव्यवसायादावित्यर्थः प्रामाण्यस्यदोषाद्व्य
हइत्यनुषंगेणान्वयः इत्यत्रप्रामाण्यसंशयोपपादकमुक्तोदोषाद्भ्रमसंशययोरुत्पाददृत्युक्तेश्चेतिसत्यपिप्रामा
ण्यनिश्चयेदोषविशेषजन्यज्ञानस्यविपरीतज्ञानाप्रतिबध्यत्वात्स्यादिनिश्चयदशायांदोषविशेषात्समर्थ्यमा
णायीतिमाद्यारोपवत्प्रामाण्यसंशयोदोषान्तरात्स्यादेवेतियदुक्तंतत्तेवेत्यर्थः दोषानुगमखंडनेउक्तगौरवेणप्रामा
ण्यसंशयजनकदोषाजन्यत्वस्यविपरीतनिश्चयप्रतिबध्यतावच्छेदके निवेशासंभवात्प्रामाण्यसंशयोभविष्यती
त्युक्तोपरिनिवेश्यादिदूषणासंगतिरित्याशयः नवदोषात्प्रामाण्याग्रहेपिस्वतोग्राह्यत्ववशरीरेज्ञानग्रहसामग्र्यांप्रामा राम॰
ण्यसंशयोनुभवसिद्धस्तत्रदोषात्प्रामाण्याग्रहेपितस्यस्वतस्त्वक्षतेस्तदाशंकनासंगतिरितिवाच्यंयत्रप्रामाण्यसंशयो ५५

नुभवसिद्धस्तत्र दोषात्प्रामाण्याग्रहेपि स्वतोग्राह्यत्ववादिरीत्या ज्ञानग्रहसामग्र्यां प्रामाण्यग्रहप्रतिवंधकासंभवहितत्व
निवेशात्स्वतस्त्वोपपत्तेः नच ज्ञात्वैव कश्चिद्दोष इति मूलमभेदेत्तरीयेत्यभिप्रायेणाज्ञात्वा जन्मनात्रानभ्यासदशा
जन्मनेति यावत् तथाचानभ्यासदशाजन्मनानुगतो दोषः अनभ्यासस्य प्रामाण्याग्रहेनुपत्वेन तद्घटितानुगतधर्मा
वच्छिन्नस्य तदधीनसत्ताकस्य तत्प्रयोजकत्वानुपपत्तेरित्यननुगतरूपेण तत्प्रतिवंधकत्वं कल्प्यं तद्गौरवादु
पेक्ष्यमिति व्याख्यातमालोककृता तत्र सम्यक् अनभ्यासदशाजन्मनोनुगतदोषत्वनिराकरणेपि तादृशदोषां
तरात्प्रामाण्यशंकाया अनिराकरणात् तन्निराकरणायानभ्यासदशाजन्मवदभ्यासेपि नानुगत इति भावो मूलस्य व्या
ख्येयः तत्र च जातिपदस्यानुगतत्वपार्थकतया अनुगतरूपपुरस्कारेण कश्चिद्दोषः नच्चैतत्प्रामाण्यादिग्रहप्रति
वंधको नवापि तत्तारोपप्रामाण्यसंशयजनक इत्यर्थकत्वमेवोचितमित्याशयेन व्याचष्टे नहीति यदि प्रामाण्यग्र
हप्रतिवंधादिप्रयोजकयावत्साधारणोऽनतिप्रसक्तो धर्मः संभवतीति शक्यमशांकनं तदाच्चैतत्प्यग्रहप्रतिवंधकपित्वा

गदा॰प्र॰ दिसाधारणोपि संभवेत् तथा च प्रामाण्यग्रहे यिन्दोषस्य घटकू प्रतिबंधकता अपि तु स्वेतरप्रामाण्यग्रहसाधारणान्न
५६ पावच्छिन्नप्रतियित्वद्व्यादिसाधारणान्यपेणैकमेवप्रतिबंधकत्वमित्यपिशंकास्यात्तामेवप्रथमं निराकरोति स्वेतरप्रामा
ण्यप्रतिनन्नुयीतत्वम् अप्रामाण्यसंशयसाधारणान्यावच्छिन्नजनकत्वमेव तथैतस्याः शंकां निराकर्त्तुं तदवच्छेदकमप्येकं
56 दुर्वचमित्याह यदीत — तिमान्नत् स्वेतरग्रहप्रतिबंधकसाधारणान्यप्रामाण्यग्रहप्रतिदोषस्यप्रतिबंधकताभावम्
त्सकलप्रामाण्यग्रहे दोषाणामेकप्रतिबंधकत्वं घटज्ञानादिप्रामाण्यग्रहप्रति दोषाणामेकैकप्रतिबंधकत्वं कल्प
नीयम् अत आह तन्न व्यवसायेति प्रामाण्यग्रहेति प्रामाण्यत्वेन किंकप्रत्यक्षे त्यर्थः तेन अप्रामाण्योपस्थितिदशायां प्रामा
ण्यानुमित्याद्युत्पन्नावपि न क्षतिः तद्विरहे पि अप्रामाण्योपस्थितिविरहे पि अनन्तरं ततः अनुव्यवसायद्वितीयक्ष राम॰
णोत्पन्ना प्रमाणोपस्थितिः ततः प्रामाण्यसंशयात् तत्रानुव्यवसायेन प्रामाण्यग्रहे बाधकाभावेन प्रामाण्योपस्थितेः ५६
प्रामाण्यग्रहप्रतिबंधकतया तदुपपादनासंभवादिति शेषः ननु सामग्रीबलाद् अनुव्यवसायस्य प्रामाण्यग्राहकत्वमा

वश्यकमितितस्यप्रामाण्याग्राहकत्वंदुष्करमतआह यथाचेति एतत्त्वअनुव्यवसायस्यप्रामाण्याग्राहकत्वं
व्यवसायस्यप्रामाण्यमेवतेषांस्वतोग्राह्यंनत्वनुव्यवसायप्रामाण्यमितिभ्रमेणाव्यवसायधर्मिकप्रामाण्यसं
शयएवतद्धर्मिज्ञानमपेक्षितंनत्वनुव्यवसायप्रामाण्यसंशयेतज्ज्ञानमितिभ्रमेणावानचप्रामाण्यसंशयादित्या
दिकामूलत्वशंकाप्रामाण्यमात्रमेवतेषांस्वतोग्राह्यंपरतःपक्षेवाधकस्याविशेषादेवमविशेषेणसंशयमात्र
एवतद्धर्मिधीर्हेतुरित्याशयेनभ्रमंनिराकरोतिप्रामाण्यज्ञानेपीति ननुविरोधिनिश्चयेप्रामाण्याभावसंशयस्ये
वभ्रमत्वसंशयस्याप्ययोगात्कथमित्यादिनानुव्यवसायेव्यवसायप्रामाण्यतत्पस्वविषयांशेभ्रमत्वसंशयात्त
दग्रहेतेपिव्यवसायप्रामाण्यशंकास्यादितिशंकानाचतरतिअनुव्यवसायानुव्यवसायंविनाधर्मिज्ञानाधी
नस्यतत्रभ्रमत्वसंशयस्याप्ययोगादनुव्यवसायस्याग्रहस्यस्वीकारेतत्रभ्रमत्वविरोधिनःप्रामाण्यस्यनिश्चयो
स्तीतिस्वयमेवप्रथमंस्फुटीकृतत्वादित्यतःसाक्षात्कारिभ्रमइवसंशयेपिग्राह्याभावनिश्चयएवविरोधीनतुवि

गदा०प्र० रोध्यंतरनिश्चयइत्यभिमानमूलकत्वेनतादृशशंकामवतारयतिदीधितौनन्वनुमानादितियद्यपिसाक्षात्कारित्वम
५७ इत्यादितोग्राह्याभावविषयकत्वंसंशयप्रतिबंधकतायामतंत्रमितिलभ्यतेअतएवचभ्रमत्वसंशयत्वशून्यतदुक्तानाहा
नाभ्यंनसंभवतीत्युक्तत्वादितिसमाधानेऽउक्तत्वादितिवक्ष्यतेतथापिभ्रमत्वरूपविशेषोपादानबलादेवसंशयप्र
57 तिबंधकतायांसाक्षात्कारित्वस्यातंत्रतालाभेनसंशयेविपरीतनिश्चयसामान्यप्रतिबध्यतालाभादर्थभंगः तत्रविरो
ध्यंतरनिश्चयप्रतिबध्यतालभ्यतेसाक्षात्कार्येवेतिवत्तद्विपरीतविषयकत्वेवत्यवधारणापरतयासंशयप्रतिबंधक
तायांग्राह्याभावावगाहित्वस्यातंत्रतालाभादुभयथाप्यस्फुटतयातत्परत्वानवबोधेनेतच्छंकावतारः तस्याभावो
पिभ्रमत्वस्याभावोपिभ्रमानुव्यवसायइतिशेषः तदाअनुव्यवसायग्रहकालेउपस्थापकाभावात्भ्रमत्वोपस्था
पकोनेत्यातत्भ्रमत्वेनागृहीतस्यभ्रमत्वरूपविरोधिविषयकग्रहस्यापिप्रतिबंधकतयाअन्यथासिद्धयत्वमन्य राम०
थासिद्धग्रहविषयत्वाभावविशिष्टार्थकतयाव्याचष्टेअनन्यथेतिअन्यथासिद्धत्वेनत्यस्यव्याख्याभ्रमत्वेने ५७

तियघयिम्रमत्वमन्यथासिद्धत्वमितिमूलकृतैवविवरणीयं यस्मात्तथापितदनवलोकनेनप्रथमंप्रसिद्धार्थ्यैतरप
रत्वशंकानिराकरणायेदंव्याख्यानं अन्यथासिद्धत्वेपत्यग्रिमग्रन्थस्यापीदंव्याख्यानमित्यवधेयं विशेष्यस्यधर्मेव
ततदप्रकारेणासिद्धंसिद्धिस्तस्यज्ञानमितियावदितिव्युत्पत्त्याअन्यथासिद्धपदस्यभ्रमार्थकतामूलेअतएवअन्य
थासिद्धत्वयागृहीतज्ञानस्याविरोधित्वादेवसंशयइत्यग्रिमेणास्यसंबंधः तेनविनापितज्ज्ञानंसंभवतीत्यनेनसंश
यप्रयोजकतयाभिधीयमानस्यतज्ज्ञानविषयत्वधर्मस्यसमाधारणंप्रदर्शितं अन्यथासिद्धत्वयाशंकितमितिविषयी
भूतपुरुत्वादिनिश्चयविशेषणंपरिभवहेतुगर्भंयविरुयस्याविरोधिनेनकृत्वासंशयोजायतइत्यध्याहार्यं एवमग्रे
पिप्रामाण्यइतिअग्रिमेणासंशयइत्यनेनसंबंधः तन्निश्चयस्यप्रामाण्यनिश्चयस्यतंप्रामाण्यनिश्चयंननुघटो
यमितिज्ञानेघटविषयकत्वावच्छिन्नघटत्वप्रकारकत्वरूपंप्रामाण्यमिवघटविषयकत्वावच्छिन्नमपिसंदिग्धतेघ
टत्वप्रकारकत्वांसंशयस्यतत्रकदापिअनुदयाद्घटविषयकत्वांशस्यसंशययोग्यतयेवप्रामाण्यसंशयात्तथा

गदा०प्र० नुव्यवसायगृहीतत्वतयाघटविषयकत्वेप्यज्ञानसंशयइतिदृष्टांतासंगतिरतोघटविषयत्वइतिमत्वस्यघटविषयत्वत
स्यसंशयकोटितानवच्छेदकत्वेननतात्पर्यंकिंतुघटत्वांशस्योपलक्षणात्तयाकिंचिद्विषयत्वांशस्यैवातथात्वइत्याच
५८ ष्टेदीधितौघटविषयत्वइतिमत्वेतद्विषयत्वंज्ञानत्वसविषयत्वविषयकानुव्यवसायत्वंअनभ्यासिद्धंतद्विषय
58 त्वांशेऽभ्रमनियतंअतस्तत्कृहविषयानुव्यवसायेज्ञानत्वांशेभ्रमत्वसंशयानुदयान्नव्यवसायेनुव्यवसायगृही
तज्ज्ञानत्वादेःसंशयइतिपुत्रमतइतिभावःप्रामाण्यविषयत्वंचप्रामाण्यावगाहनंतुतेनविनापिप्रामाण्येनविनापि
अप्रमायामपीतियावत् तथाचप्रामाण्यविषयकानुव्यवसायत्वेनप्रामाण्यांशेभ्रमत्वनियतमितितत्कृहविष
येप्यनुव्यवसायेप्रामाण्यांशेभ्रमत्वसंशयसंभवइतिभावःतत्रसंशयःव्यवसायप्रामाण्येनुव्यवसायगृहीतेपिसं राम०
शयःभ्रमनिराकरणंविनाभ्रममूलकाशंकासमाधानेनभवतीतितन्निराकरणंस्फुटयतिभवेदेवमितितदभावव्याप्य ५८
स्यतदभावव्याप्यत्वेनैवज्ञानंयदितद्ग्राहकप्रतिबंधकंभवेत्तदेतरपिभ्रमत्वाभावव्याप्तिविशिष्टस्यप्रमात्वस्य

स्वतोग्राह्यत्वानभ्युपगमात्प्रमत्वसंशयः संभवतीति तमपि निराकरोति तदभावव्याप्यत्वेनैवेति धर्मांतरस्य तदभाव
निरिक्तस्य यदवच्छेदेनेति यत्र धर्मे तदभावावच्छेदकत्वं निश्चितमित्यर्थः ननु तत्र का युक्तिरित्यत आह यथा चेतदिति पु
रुषो न स्थाणुरिति निश्चये अयं पुरुष इत्याकारकस्य स्थाणुत्वाभावव्याप्यप्रकारकनिश्चयस्यापि स्थाणुत्वसंशय
विरोधितायाश्चानुभविकत्वात्तदभावव्याप्तिविशिष्टवैशिष्ट्यावगाहितायाश्चाकिंचित्करत्वमिति वक्ष्यत इत्यर्थः इद
मुपलक्षणम् तदभावावच्छेदकधर्मदर्शनस्याविशेषितस्यानुव्यवसायेज्ञानत्वादिविषयकत्वग्रहेऽपि ज्ञानत्वांशे
प्रमत्वसंशयोऽस्यानुव्यवसायेज्ञानत्वादिसंदेहस्य दुर्वारतया परेषां ज्ञानत्वांशेऽसंशयोपपादनं विरुध्येतेत्यपि वि
ध्येयं प्रमत्वसंशयाद्विषयसंशयस्यानुत्पत्तिर्व्यवस्थापनायोगात् एवमित्यादिमूलस्य तेषां तदुपगमासंभवदर्शि
न परतोऽस्तु दृष्यपि तु एतत्पतितवमते स्यादिति एवं चास्मत्रानुव्यवसायादयमत्र पुरुषादिज्ञाने प्रमात्वनिश्चये तदभाव
संशयासंभवेऽपि प्रमत्वसंशयात्तद्विषये पुरुषत्वादौ संशय इत्यपि तवमते न स्यात्तु संभवतीति मूलार्थः प्रमाणपसं

गदा॰प्र॰ शयात्तद्विषयेसंशयोपितुनिश्चितेप्यर्थेसाधारणधर्मदर्शनादेवसंशयइतिप्रामाण्यसंशयोनाभ्युपेयस्तत्तएवविष
५९ यसंशयानुरोधविरहादितिनचवाच्यमित्यादिशंकाभिप्रायोनसंभवतिप्रामाण्यसंशयमनपेक्ष्यैवनिश्चितार्थगोच
रसंशयोदयेनिश्चितेपिप्रामाण्यसंशयापत्तेरतःप्रामाण्यसंशयोयथाद्दनपरतथैवप्रामाण्यसंशयस्यविषयसं
59 शयाद्धेतुत्वशंकाप्रकृतेसंगमयतिज्ञानप्रामाण्यसंशयादितिइत्थमनुपालम्भाइतितत्रनिश्चितेप्रामाण्यारेकदापि
संशयोनस्यात्तद्धेतुप्रामाण्यसंशयस्यतत्रदुर्घटत्वादित्युपलम्भाइत्यर्थःनिश्चयसत्वासत्वयोरितिनिश्चयास
त्वइवतत्सत्वेपीत्यर्थःनचनिश्चयकालीनार्थसंशयेप्रमात्वसंशयस्याहेतुत्वेपिअप्रामाण्यज्ञानाभावविशि
ष्टस्यकोटिनिश्चयस्यविपरीतकोटिधीविरोधितयातत्रप्रामाण्यसंशयस्यापेक्षास्त्येवेतिप्रामाण्यसंशयानुपपत्तौ
निश्चितार्थसंशयानुपपत्तिर्दुर्वारैवेतिवाच्यंएतन्मतेविशेषदर्शनजन्यस्यैवविपरीतनिश्चयस्यप्रतिबंधकत्वमित्यु रम॰
पगमात्तन्मतेपिविशेषदर्शनानधीननिश्चयस्याप्रामाण्यशंकापरिभवेनाविरोधितयाऽनुभवविरोधविरहा ५९

त्साधारणधर्मदर्शनविलंबादेयद्यक्वचित्संशयो न स्यादिति प्रामाण्यसंशयस्यार्थसंशयेनपेक्षायामपि न निश्च
योच्छेद इति न चैवमित्यवांतरशंकाया असंगतिरिति साधारणधर्मदर्शनस्य सर्वत्र संभवे हेतुतया दर्शयति साधा
रणेत्यादि ततः प्रमेयत्वादेरपि साधारणधर्मत्वादिति भावः संशय इति मूलं संशयसामग्रीसत्त्व इत्यर्थः तन्निश्च
योच्छेद इति निश्चितेपि विषये संशय एव स्यान्नतु निश्चय इत्यर्थः प्रामाण्यसंशयोपि सर्वत्र संभवतीत्यभिमानेन
प्रामाण्यसंशयेपीत्यनेन मूलेन तुल्यत्वमाधाद्दिति प्रामाण्यसंशयेपि प्रामाण्यसंशयस्य विषयसंशायकत्वमतेपि
अभिमानं तिरस्कृत्य न च वाच्यमित्यादिशंकोपरि प्रायशो निश्चयोच्छेदरूपं बाधकमेव दूरीक्रियते तस्यासार्वत्रि
कत्वादिति तत्र तत्पदस्य प्रामाण्यसंशयपरामर्शकत्वेन स्फुटमिति न च वाच्यमिति वाक्यांतरेण प्रामाण्यसंश
यस्य प्रक्रांतस्यापि व्यवधानात् अव्यवहितवाक्यस्थेनेति शब्देन तुल्यत्वादित्यंतवाक्यार्थस्य बोधेन तदंतर्गत
प्रामाण्यसंशयस्य प्रक्रांतत्वेतादृशवाक्यार्थनिश्चयादेरपि घटकतया तेषामपि प्रयत्नक्रांतत्वात्। एकपदार्थो

गदा॰प्र॰
६०
60

तर्गततयाप्रक्रांतस्यतच्छब्दस्यपरामर्शेऽनुपयोगाच्चेतितच्छब्दस्यतत्परत्वंस्फुटयतिदीधितौतस्येति।प्रामाण्य
संशयस्यासार्वत्रिकत्वंचविशेषदर्शनकालीनज्ञानेप्रामाण्यनिश्चयसंभवेनेतिबोध्यंनतुल्यत्वमितिप्रामाण्य
संशयस्यविषयसंशयाद्धेतुत्वेनिश्चयोच्छेदकत्वस्यतथात्वेनतदुच्छेदइत्यर्थः।यद्यपितन्मतेपिएककोटिभा
नसामग्रीयत्रैलौकिकसन्निकर्षादिघटिततयाविशेषदर्शनसमवधानेनवाबलवत्यनुवर्त्ततेतत्रैवसाधारण
धर्मदर्शनादिसत्वेपिनिश्चयपरंपरासंभवः।तथापितदतिरिक्तस्थलेतन्मतेनिश्चयपरंपरोच्छेदएवदोषोबोध्यः
तुल्यत्वेप्रामाण्यसंशयहेतुतामतेनिश्चयोच्छेदः।उच्छियतांतत्रोक्तस्थलेतद्धेतुतामतेनिश्चयः।इत्यत्राह।इत्यत्रा
नुभवविरोधमाह।नचविशेषदर्शनात्नवीनज्ञानेभवतोप्रामाण्यसंशयस्यापिसंभवेनतदुत्तरंसंशयोत्पत्तेरे
वानुभविकत्वंविशेषदर्शनजन्यज्ञानस्यचमयापिसंशयविरोधित्वाभ्युपगमात्तत्वेममापिसंशयानुत्पादोपप राम॰
त्तिरितिशंक्यंतुरभिप्रायस्यवर्णितत्वात्तत्रानुभवविरोधेनमूलकृतःप्रामाण्यसंशयहेतुताव्यवस्थापनसंगतिरिति ६०

वाच्यंविशेषादर्शनकालीनेननिश्चयेपिकोट्युपस्थितिधर्मिज्ञानादिविलंबेनप्रामाण्यसंशयानुत्पातत्सत्वेर्थसंशयानु
त्पादोनुभवसिद्धइत्याशयात्अयंचग्रंथोनार्थसंशयविशेषेप्रामाण्यसंशयकारणतातात्पर्यतस्थितिपरःकिंत्वप्रयोगिता
मात्रपरःसाचप्रामाण्यसंशयजन्यविशिष्टज्ञानेनविपरीतनिश्चयोनविरोधीतन्निश्चयकालीनज्ञानेचप्रामाण्यसंश
यत्त्वेनाप्रामाण्यग्रहत्वेनवाहेतुरित्यतोविशिष्टज्ञानसामान्येअप्रामाण्यग्रहाभावविशिष्टनिश्चयोविरोधीत्य
तोवानिर्वहतुअथस्यादिमत्वेअनुव्यवसायादिनाप्रामाण्यग्रहात्तत्संशयस्यासंभवेनतस्यार्थसंभवेनतस्यार्थ
संशयेहेतुताखंडनपरतयामिश्रैर्व्याख्यानंतच्चनसंगच्छतेअन्वयव्यतिरेकसिद्धार्थसंशयहेतुताकप्रामाण्यसं
शयानुरोधेनतस्यानुव्यवसायाद्यग्राह्यत्वकल्पनायाएवयुक्तत्वात्नवप्रामाण्यसंशयस्यार्थसंशयाहेतुताया
बाधात्तन्नचप्रामाण्यसंशयासंभवेऽन्वयाग्रहेणाकारणतायानान्वयव्यतिरेकसिद्धतेतिवाच्यंपत्रप्रतिबंधकवशादनु
व्यवसायादेःप्रामाण्याग्राहकत्वेतत्रतन्मतेपुनरकालेप्रामाण्यसंशयोनंतरंचार्थसंशयइत्यन्वयग्रहसंभवात्

गदा०प्र०
६१
61

अतो याथार्थ्ये तत्प्रामाण्यसंशयापत्त्याये न स्वतस्त्वव्यवस्थापनपरतये वतस्याचेष्टेयघनुव्यवसायानंतरमितिनत्वे
वमिति अनुव्यवसायानंतरं तत्संशय एव नेत्यर्थः नचार्थसंशयहेतुभूतयाथार्थ्यसंशयानुदयेऽर्थसंशयानुप
पत्तेः कथमियं शंकायीतिवाच्यं अर्थनिश्चये जाते अनुव्यवसायादिना तन्नाशे सत्येवार्थसंशय इत्याशयेन शंका
संगतेः नन्वनुव्यवसायाद्युपनीते व्यवसाये इदं ज्ञानं प्रमा न वेति संशयोनुभवसिद्धस्तथा च रयद्भूव इस्यत आहयरं
त्विति स्मृत्यन्यज्ञानत्वादावेवेति तस्यापि प्रामाण्यपदार्थत्वात्तत्कोटिकसंशयस्यापि प्रमा न वेत्याकारकत्वेतिशंकिं तु
राशय इति भावः मूले अस्मिन्निश्चितेपीति अस्मिन्याथार्थ्ये प्रामाण्यसंशयात्प्रमा न वेत्याकारकत्वेतिशंकितुराशय इ
ति भावः मूले अस्मिन्निश्चितेपीति अस्मिन्याथार्थ्ये प्रामाण्यसंशयात्प्रमा न वेत्याकारकसंशयात्तत्याथार्थ्यं न प्रामाण्य
तथा च याथार्थ्यस्य स्वतस्त्वसिद्धावपि नाभिमतसिद्धिरिति भावः एतन्निश्चयादेवेति याथार्थ्यनिश्चयादेवेत्यर्थः निष्कंप राम०
व्यवहारादिति तथा च तत्प्रामाण्यपदार्थो भवतु वा मा वेत्यन्यदेतत् प्रवृत्त्यौपयिकधर्ममधिकृत्यैव स्वतस्त्वविचारात्त ६१

स्वतोग्राह्यत्वसिद्धो नाभिमतासिद्धिरिति भावः अस्तु तावदिदमित्यत्रेदं यदस्य याथार्थ्यं परतो न संभवति तस्य प्रामा
ण्यपदार्थतया निष्कंपव्यवहारांगतायाश्चैनयायिकमततया तेषामायाततस्तदभ्युपगमासंभवादतो व्याचष्टे इ
दमिति एवं च प्रामाण्यमिति मूलं प्रामाण्यपदार्थ इत्यर्थकं प्रमा न वेति संशयकोटित्वानुरोधेन प्रामाण्यपदार्थता
याः स्मृत्यन्यज्ञानत्वादेरेतेषां संकेतितत्वादायाततस्तदभ्युपगमसंगतेः स्मृत्यन्यज्ञानत्वरूपप्रामाण्यसंशयस्यानु
भवविकलत्वेन याथार्थ्यस्य स्वतोग्राह्यत्वे बाधकमतस्तथाविधेति याथार्थ्यरूपेत्यर्थकं मूलस्य प्रामाण्य इत्यस्याव
हितोक्तिः स्मृत्यन्यज्ञानत्वार्थकत्वे तथापीत्यादिसमुदितफक्किकायास्तथाविधप्रामाण्य इत्याद्यर्थवर्णनेन घटत इ
ति तदनुरोधेन तत्पदं व्याचष्टे प्रामाण्य इति यद्यप्यनुव्यवसायस्यार्थतद्वत्ताविषयकत्वलाभेन तद्घटितप्रामाण्यवि
षयकत्वमपि अर्थतो लभ्यते तथाप्यर्थतद्वत्त्वविषयकत्वेपि तद्विशेष्यकत्वतत्प्रकारकत्वयोरवच्छेद्यावच्छेदक
भावाग्रहेणाप्रामाण्यसंशयस्य तदधीनस्यार्थतद्वत्त्वसंशयस्य वा पपत्तेरर्थतद्वत्त्वविषयकत्वे निर्भरो नोचित इति

गदा॰प्र॰ नेत्यनंतरंतद्वतितत्प्रकारकत्वमितिअर्थेतद्वत्त्वमित्यनंतरंअनिर्भरस्यचकंकेवतिचरंरितंधर्मिणोधर्मितावच्छेदकेदंत्व
६२ वैशिष्ट्यावगाहनेनैवानुव्यवसायस्यविषयांशेनिष्प्रकारकत्वरूपनिर्विकल्पकत्तावारणोधर्म्यंशेसप्रकारकत्वा
त्यथानुपपत्तिरूपयुक्त्यानप्रामाण्यस्यतद्घटकरजतत्वविद्विषयकत्वभानमात्रेणैवतथाकारतोपपन्नेस्तत्प्रकारक
62 त्वेनतादृशस्याव्यवच्छेद्यावच्छेदकभावस्यभानासिद्ध्याप्रामाण्यभानंनततःसिध्यत्येवेतिनन्वित्यादिमूलशंकायाः
सामग्र्याःप्रामाण्यभानप्रमाणतायत्त्वमाहननुसामग्र्यीति एवंचनन्वित्यादिमूलस्यायमर्थः इदंरजतमितिव्यव
सायस्यइदंत्वरजतत्वरूपस्वप्रकाराश्रयधर्मिविषयकत्वेऽनुव्यवसायएवमानमितितस्यतद्विषयकत्वमावश्य
कंतथासतिव्यवसायविषयैर्योवड्डिःप्रकारकैर्विशिषितएवधर्मीविषयितोविशेषणतयाअनुव्यवसायविषयीभ
वतितद्विशेषितस्यधर्मिणस्तथाभानेधर्म्यंशेअनुव्यवसायोनिष्प्रकारकएवस्यात्प्रकारांतरस्योपनायकवि राम॰
रहेणैवाभानात्तथाचेदंरजतंजानामीतितदाकारेणनस्यात्ईदृशानुव्यवसायत्वप्रत्यासत्तिघटितसामग्री ६२

वलाच्चविषयिताविशेषणतायत्रधर्मिणीदंत्वरजतत्ववैशिष्ट्यमनुव्यवसायविषयः एवंव्यवसायस्येदंत्वरजतत्वप्र
कारकत्वेपिअनुव्यवसायएवमानमितितद्विषयस्यविषयएवमिदंविषयकत्वरजतविषयकत्वाभ्यामिदंत्वप्रकारक
त्वेपिअनुव्यवसायएवमानमितितद्विषयस्यविषयएवमिदंविषयकत्वरजतविषय्यरजतत्वप्रकारकत्वयोरवच्छेद्या
वच्छेदकभावोपिबाधाभावादिघटितसामग्रीबलाद्विषयइतिधर्मितावच्छेदकेदंत्वांशइवरजतत्वांशेपिप्रामाण्याव
गाहनमनुव्यवसायस्यावर्तनीयमितिअतएवेदंत्वंनूपधर्मितावच्छेदकांशेनप्रामाण्यसंशयइतिननुव्यवसायाभ्य
वहितोत्तरज्ञानंनूयस्यानुव्यवसायस्याज्ञानीमीत्याकारकत्तानोभयसिद्धाविशेषणज्ञानस्यविशिष्टधीहेतुताव
दिनांनैयायिकानांज्ञानत्वादिनिर्विकल्पकस्यव्यवसायद्वितीयक्षणेउत्पन्नोत्तृतीयक्षणएवज्ञानत्वादिविशिष्ट
ज्ञानसंभवादितिनैयायिकंप्रतिअनुव्यवसायस्येदंरजतंज्ञानामीत्याकारकत्वाभावापादनंनसंगच्छतेऽतोभाव
छेअनुव्यवसायइतिविशिष्टज्ञानकारणत्वानभ्युपगंतृणांमीमांसकानामाहत्यव्यवसायद्वितीयक्षणेअन्येषां

गदा॰प्र॰ ६३ 63

तदभ्युपगंतॄणां नैयायिकानां तदुत्तरकालं नन्वस्माकं धर्मितावच्छेदकांशे प्रामाण्यमपि न स्वतोग्राह्यतयानुमतं न
वा तत्र संशयोनुमतो यद्बलात्तस्य स्वतस्त्वं व्यवस्थापयिष्यसीति धर्मिणीत्यादिदृष्टांतासंगतिरत आह धर्मिणीति भव
तां नैयायिकानां मूले वह्निविशेष्यक इति रजतत्वादिरूपवह्निविशेषणाविशेष्यतापन्नधर्मिविशेष्यकत्व इत्यर्थः अ
स्माकं आत्तादृशधर्मिविशेष्यकत्वज्ञानाद्यसहकारेणग्राहकत्वात् नन्वेवमिदमिदंत्वेनेत्यादिमूलासंगतिः इदंत्वस्या
पि वह्निविशेषणतया तद्विशेषितधर्मिविषयकत्वाग्रहेणेदं जानामीत्याकारकतानुपपत्तेः न च वह्निः पदं धर्मिताव
च्छेदकान्यवह्निविशेषणाविशिष्टपरमिति न तदसंगतिः अत एव च धर्मितावच्छेदकांशे प्रामाण्यस्य स्वतोग्राह्यत
परटीकायामपि न विरोध इति वाच्यं वह्निः पदस्य धर्मितावच्छेदकान्यविशेषणाविशिष्टपरत्वे अत इदंत्वरजतत्वैव
शिष्ट्यानुव्यवसायविषय इत्युपसंहारविरोधात् यत्तु रजतविषयकत्वविशिष्टरजतत्वप्रकारकत्वमात्रेणेदं रज
तमिति ज्ञानस्येदंत्वावच्छिन्नप्रवर्तकतौपयिके प्रामाण्य इदमंशे रजतत्वाप्रमात्वग्रहाविरोधित्वात् अपि तु स्वांते

राम॰ ६३

रोदंत्वावच्छिन्नस्यरजतत्ववैशिष्ट्यमपितद्घटकंतथाचेदंरजतंतद्विशेष्यकंचरजतत्वप्रकारकंज्ञानमित्याकारकएवप्र
माण्यग्रहोंगीकार्यःसचनसंभवतिवहिरंतरोभयमुख्यविशेष्यकज्ञानजमनेमनसोस्वातंत्र्यादितिमिश्रानुसारेण
म्हलार्थवर्णनं।तन्नुच्छं।अस्मिन्नजतेरजतत्वप्रकारकमिदंज्ञानमितिज्ञानस्येदंविषयेप्रवर्त्तकत्वेबाधकाभावात्ताद
शज्ञानस्यचबहिर्मुख्यविशेष्यकत्वविरहेणस्वतःसंभवादिदंमुख्यविशेष्यकप्रामाण्यग्रहस्यप्रवर्त्तकत्वेवक्ष्यमाण
नुमानेनतदजननात्तंसदर्भेविरोधाच्चएवंबहिरंतरोभयमुख्यविशेष्यकमानसज्ञानमात्राभ्युपगमेमानसज्ञानस्य
ज्ञानविशेषणतायत्नविषयांशेरजतत्वादिवैशिष्ट्यभानस्याभ्युपगतत्वान्नतस्यविषयांशेनिर्विकल्पकत्वप्रसक्तिरिति
धर्मिणीदंत्वरजतत्वप्रकारकज्ञानविषयत्वभानेननिर्विकल्पकतावारणमपिविनुध्येतेतिएतेनेदंरजतमितिताद
त्म्यारोपश्चावर्त्तनायप्रामाण्यशरीरेधर्मिणोमुख्यविशेष्यतानिवेश्यामुख्यविशेष्यतावप्रकारतानवच्छिन्नविशेष्य
तातत्त्वप्रकारतानवच्छिन्नत्वंनस्वतोग्राह्यमितिनप्रामाण्यंतथ्यमितिम्हलाशयवर्णनमपिनसत्पुरोवर्त्तिनिरजतत्वादि

वैशिष्ट्याभानस्य प्रामाण्याभानप्रयोजकताकथनविरोधाच्चेति मैवं वह्निर्विशेषणवैशिष्ट्यं विशेष्यता विशेषणतायां
न धर्मिणी विशिष्टविशेष्यिताज्ञानाद्यसहकृतं मनो न भासयतीत्येवं हि मूलार्थः अनुव्यवसायस्येदंत्वादिप्रकारकज्ञा
नविषयत्वन्तु पर्वतोऽयमित्यादौ दंत्वेन ज्ञानविशेषणतायां तत्र धर्मिविषयकत्वापगमादिदं रजतत्वेन जानामीत्याकारकतानिर्वाहात्
अत एवाग्रे धर्मिणी इदंत्वादिप्रकारकज्ञानविषयत्वभानेन तदंशे निर्विकल्पकतावारणमिति सर्वं समंजसं ज्ञानविष
यतया भासमाने धर्मिणि व्यवसायोल्लिखितप्रकारवैशिष्ट्यमपि भासत इति व्यवस्थापयन् प्रामाण्यग्रहस्वास्वतस्त्व
दीधितिकृदाक्षिपति नन्वित्यादिना विशिष्ट इदं त्वरजतत्वविशिष्टं ज्ञाने ज्ञानविशेषणतायां तत्र विषयतांशे विशेषणत्वे
न भासत इत्यन्वयः तद्विशिष्टविशेष्यकत्वमिव तदवच्छिन्नतत्प्रकारकत्वमपि भासत इत्याह भवतामित्यादिना इदंत्ववै
शिष्ट्यभानस्याग्रे व्यवस्थापनीयतया भवतां पुरोवर्त्तिनि रजतत्वप्रकारकज्ञानमिति वच्चेति दृष्टांतः पुरोवर्त्तिनि रजत
इति पुरोवर्त्तित्वन्तु पव्यवसायोल्लिखितप्रकारविशिष्टविशेष्यकत्वावच्छेदेन वतां रजतत्वविशिष्टविशेष्यकत्व

वच्छेदेनापिरजतत्वप्रकारकत्वग्रहेबाधकाभावादुपनीतविशेषणाविशिष्टविशेष्यकत्वावच्छिन्नप्रकारिता
लौकिकप्रत्यक्षेमनसासामर्थ्येपुरोवर्त्तिनिरजतत्वप्रकारकंज्ञानमित्यनुव्यवसायस्याप्यसंभवादितिभा
वः नन्विदंत्वविशिष्टविशेष्यकत्वमेवनानुव्यवसायोगृह्णातिकुतस्तदवच्छिन्नरजतत्वप्रकारकत्वंकुतस्त
रांचरजतत्ववद्विशेष्यकत्वावच्छिन्नरजतत्वप्रकारकत्वमित्यतआहस्यामेवचेतिअनुव्यवसायस्येदंत्ववति
रजतत्वप्रकारकतयाज्ञानावगाहनेनैवचेत्यर्थः इत्याकारकः प्रामाण्यसंशयइति इदंत्ववतिरजतत्वप्रका
रकज्ञानत्वप्रकारकतयाज्ञानावगाहनेनैवचेत्यर्थः इत्याकारकः प्रामाण्यसंशयइति इदंत्ववतिरजतत्वप्र
कारकज्ञानत्वप्रकारकज्ञानविरहेतद्धर्मितावच्छेदककसंशयायोगात धर्मितावच्छेदकप्रकारकधियः संशय
हेतुत्वादितिभावः ननुरजतत्वप्रकारकंज्ञानंप्रमानवेत्याकारकएवानुव्यवसायरूपधर्मिज्ञानहेतुकः संशयो
नतुपुरोवर्त्तिनिरजतत्वप्रकारकज्ञानंप्रमानवेत्याकारकइत्यतआहाहार्यसंशयेचेतिइदंरजतंनवेत्याकारादिनि

गदा॰प्र॰ ६५ 65

यमइतितद्धर्मेधर्मितावच्छेदककार्यनिश्चयकालीनतादृशार्थसंशयेतद्धर्मवद्विशेष्यकार्थज्ञानत्वधर्मितावच्छेदक
कप्रामाण्यसंशयोहेतुःइदंरजतंतच्चरजतमितिनिश्चयदशायांतद्विशेष्यकरजतत्वज्ञानंप्रमानवेतिसंशयेपिइदं
रजतंनवेतिसंशयानुदयादितिअनभ्यासदशायन्त्विदंरजतमितिज्ञानस्यानुव्यवसायानंतरमिदंविशेष्यकरज
तत्वप्रकारकंज्ञानंप्रमानवेतिसंशयानभ्युपगमेतदुत्तरमिदंरजतंनवेत्याकारकसंशयोनस्यादितिभावः ननुत
द्धर्मावच्छिन्नविशेष्यताकत्वधर्मितावच्छेदककप्रामाण्यसंशयएवतद्धर्मेधर्मितावच्छेदककार्थसंशयेप्रयो
गोवाच्यएवंचेदंत्वविशेषितधर्मिविशेष्यकत्वस्यानुव्यवसायेनाग्रहणेपिविशेष्यतायामिदंत्वावच्छिन्नत्वा
वगाहिनोनुव्यवसायादिदंत्वावच्छिन्नविशेष्यताकत्वधर्मितावच्छेदककप्रामाण्यसंशयादिदंरजतंनवेत्याकार
कार्थसंशयोभविष्यतीत्यतआशयेनाह प्रामाण्यस्येतिग्रहइत्यग्रिमेणान्वयः उपनीतविशेषणाविशिष्टवि
शेष्यकत्वस्यमानसानभ्युपगमेबाधकमुपनीततदभाववद्विशेष्यकत्वभानेनतदभाववतितत्प्रकारकत्वरूप

राम॰ ६५

प्रामाण्यग्रहकथनेविशेषदर्शनोपनीतदाहसामर्थ्यादिन्नपव्याप्यधर्मेवद्विशेष्यकत्वग्रहेणप्रामाण्यानु
मापकंहेतुग्रहोपपादनंचविवक्षितेतिभावः यद्यपिविशिष्टविशेष्यकत्वेमनसःस्वातंत्र्येणाग्रहेतेनतद
भाववद्विशेष्यकत्वस्यदाहसामर्थ्यादिविशेष्यकत्वस्यचतत्रतत्रोपनीतभानमेवांगीकरणीयमन्यलक्षणातत्र
दाहसामर्थ्यादिविशिष्टस्यविशेष्यतायाश्चविशकलितज्ञानादेवनिर्वहतीतिनविशिष्टविशेष्यकत्वस्यलौ
किकप्रत्यक्षसिद्धिस्तथापिदाहसमर्थादिविशेष्यकत्वस्योपनयदशायांकथंविदुपस्थितविपरीतकोटेरपि
भानसंभवेनविनाविशेषदर्शनंनिश्चयासंभवःविशेषदर्शनेचेदंत्वादिविशिष्टेदाहसामर्थ्यादिनिश्चयेइ
दंत्वादिमद्विशेष्यकत्वनिश्चयएवतदानीमिदंत्वादिमद्विशेष्यकत्वेदाहसमर्थविशेष्यकत्वतादात्म्यग्र
हणात्तत्रतद्व्याप्यत्वग्रहादिदंत्वादिमद्विशेष्यकत्वस्यचनिश्चयोलौकिकप्रत्यक्षरूपस्तन्मूलकस्मरणारूपो
वास्त्वभ्युपगंतव्योनतुविशकलितेदमाद्युपस्थितिमूलकोपनीतभानरूपस्तत्रतद्विपरीतकोटेरविभानस

गदा॰प्र॰ भवेननिश्चयफलासंभवादित्युपनीतविशेषणाविशिष्टधर्मिविशेष्यकत्वस्यलौकिकप्रत्यक्षमावश्यकंनचैवंदा
६६ हसमर्थविशेष्यकत्वस्यापिलौकिकप्रत्यक्षसंभवेनकिंतदुपनीतमानानुसरणेनेतिवाच्यंअयंवन्हिरितिज्ञान
नाशेतन्निष्टदाहसमर्थविशेष्यकत्वस्यलौकिकसन्निकर्षासंभवाद्व्यवसायेस्योपनीतप्रकारवद्विशेष्यकत्वस्ये
66 वलौकिकप्रत्यक्षोपगमाज्ज्ञानांतरोपनीतदाहसामर्थ्यवद्विशेष्यकत्वस्यायंवन्हिरितिप्राचीनज्ञानेउपनीतभा
नस्यैवसंभवात्तद्धर्मवद्विशेष्यकत्वस्यतदवच्छिन्नधर्मीतरप्रकारकत्वस्यवानुव्यवसायग्राह्यतामंगीकृत्यै
वप्रामाण्यस्यपरतोग्राह्यत्वमुपपादयतिअथाहुरित्यादिनाअनुव्यवसायस्यासामर्थ्यमितितद्वद्विशेष्य
त्वावच्छिन्नत्वस्यविशेष्यतासंबंधेनलौकिकप्रत्यक्षप्रतितत्प्रकारकत्वभेदस्यहेतुताकल्पनेनेदमुपपा
दनीयंनवानुव्यवसायस्यप्रामाण्यविषयकत्वेपितज्जनितज्ञानगोचरसंस्कारात्स्मृतौपक्षणेप्रामाण्यवि राम॰
षयकज्ञानद्वयधर्मिस्मरणाकल्पनेपिवाप्रामाण्यसंशयोपपादनसंभवात्किमेतादृशकार्यकारणभा ६६

यकल्पनेनेतिवाच्यप्रामाण्यसंशयेष्वनंतानांधर्मिस्मरणानांकल्पनापेक्षयातादृशैककार्यकारणभावकल्प
नायाएवलाघवेनोचितत्वात्वस्तुतस्तुतद्व्यक्तिविशेष्यकत्वावच्छिन्नतत्प्रकारकत्वभासकानुमित्यादिसामग्र्याअ
भावाल्लौकिकसन्निकर्षादिघटितसामग्र्यास्ताद्रूप्येणतद्भासकतायाःकल्पकाभावाच्चानुव्यवसायस्यविशि
ष्टप्रामाण्यावगाहितेतिदर्शितकार्यकारणभावोपिनाद्रियतेनचरजतत्वादिप्रकारकत्वप्रकारकानुव्यवसा
यपूर्वप्रकारित्वादेःप्रत्यक्षमवश्यमंगीकार्यंन्यायमतेविशेषणज्ञानंविशिष्टज्ञानानुत्पन्नेस्तथाचप्रामाण्य
स्यलौकिकप्रत्यक्षनिराकरणेपितादृशानुव्यवसायेउपनीतप्रामाण्यभानंदुर्वारमेवप्रामाण्यघटकप्रका
रित्वाद्युपनायकधीसत्वात्तविशिष्टोपनीतभानेविशिष्टज्ञानानपेक्षणादन्यथाकविकाव्यादिमूलत्वमूतापर्व
विशिष्टार्थज्ञानानुपपत्तेस्तथावकथंन्यायमतएवतादृशानुव्यवसायानंतरंप्रामाण्यसंशयइतिवाच्यंप्रका
रित्वाद्युपस्थितिंविनापितत्संर्गकानुव्यवसायसंभवात्अनुपस्थितानांज्ञानत्वप्रकारित्वादीनांप्रकारतया

गदा०प्र०
६७
67

मानोपगमेक्षतिविरहाच्चयदिचरजतत्ववद्विशेष्यकत्वावच्छिन्नरजतत्वप्रकारकत्वादिवद्रजतत्वादिविशेष्यकत्व
मपिनानुव्यवसायेनगृह्यतेतदनंतरंतत्संशयस्याप्यनुभविकत्वात्प्रामाण्यघटकघटत्वप्रकारकत्वादेर्निश्चि
तत्वेनप्रामाण्यसंशयस्यतद्वद्विशेष्यकत्वसंदेहएवपर्यवसानात्तद्धर्मितावच्छेदकवद्विशेष्यकत्वमेवचगृह्य
तेधर्मिणिप्रामाण्यसंशयविरहादितिमतंतत्तदातद्वद्विशेष्यकत्वावगाहिन्यनुव्यवसायेतद्धर्मितावच्छेदककव्य
वसायोहेतुर्वाच्यइत्यधिकंस्वयमूहनीयंधर्मान्तरविशिष्टविशेष्यकत्वावच्छेदेनविशेषणप्रकारकत्वस्यानुव्यव
सायेनग्रहणेस्वोक्तेमूलकृतःसंवादंदर्शयतिवक्ष्यतिचेतिमूलेस्वग्राह्यत्वेपिकदाचित्परग्राह्यत्वादितितज्ज्ञा
नप्रामाण्यस्यतज्ज्ञानग्राह्यतावादिप्राभाकरमतेपिकदाचित्स्वप्रामाण्यस्यपरेणातज्ज्ञानधर्मिकप्रामाण्यानु
मित्यादिनाग्रहादित्यर्थःसिद्धसाधनमित्यग्रिमेणान्वयःपरग्राह्यत्वादित्यस्यचयत्किंचिदपेक्षयापरग्राह्यत्वादि राम०
निनार्थःकदाचिदित्यस्यासंगतेःतथावश्यस्याप्यन्यापेक्षयापरत्वादितिहेतुःप्रकृतेनसंगच्छतेअतआभिप्रापि ६७

कशंकानिराकरणायरतयातंसंगमयतियरमात्रेतिदुक्तसिद्धसाधनवारणायेत्यादिस्तथासतितज्ज्ञानप्रामाण्य
स्यगुत्तुमतेतेनापियग्रहणान्नपरमात्रयात्वघत्वमितिनसिद्धसाधनमितिभावः तत्राहेतिततोक्तौपरपदस्यतज्ज्ञा
नभिन्नार्थकत्वेदोषविरहेपिकिंचिदवधिकपरत्वपरताभिमानेननतस्यकेवलान्वयितयामात्रार्थाप्रसिद्धिरूपद
षणमाहेत्यर्थः नचेत्यादिशंकायामात्रार्थाघटितसाध्यसिद्धसाधनोद्धारपरतानसंभवतियत्स्वप्रामाण्याद
यंघटइत्यादिज्ञानात्यरेणाप्रामाण्यनुमित्यादिनातन्मतेपिप्रामाण्यग्रहादतस्तछंकायाःसामान्यतःपरत्व
स्यकेवलान्वयित्वेपिप्रामाण्यंपयत्रज्ञानेयात्त्वंतदपेक्षयापरत्वस्यातथात्वात्रेदेवात्रविवक्षणीयंतथाचमात्रा
र्थघटितमेवसाध्यमितिनसिद्धसाधनमित्येतत्परत्वमाहस्वस्यापीत्युक्तेतिमूलेग्राह्यकस्यापियात्स्वप्रामाण्य
त्वेनेतिप्रामाण्यग्राहकानुमित्यादेरपियार्थयत्प्रामाण्यादिघटितप्रामाण्यंतदाश्रयत्वेनेत्यर्थः प्रामाण्यस्यत्र
मापदप्रवृत्तिनिमित्तत्वेनानुगतरूपेणानिवेशइत्यभिमानेनेदंतदपेक्षयापरत्वाभावादितितथाचपरभिन्नतज्ज्ञा

गदा॰प्र॰ स्यत्वस्यप्रामाण्येपसत्वान्नपरमात्रग्राह्यत्वंमापमतेपीतिभावः पक्षीभूततत्त्वाप्रामाण्याश्रयापेक्षयापरत्वविवक्षणा
न्नैषदोषइत्यतआहस्वग्राह्येतियाहकाणां सर्वेषामेवप्रामाण्यापेक्षयापरत्वाद्बहुव्रीहिसमासाभिप्रायेण
६८ स्वग्राह्यप्रामाण्यपदं तदाश्रयार्थकतयाव्याचष्टे स्वग्राह्यप्रामाण्यमित्यादिस्वग्राह्यपदस्ययथाश्रुतार्थकत्वे
68 गुरुमतएवप्रामाण्यविषयस्यायंघटइत्यादेर्व्यवसायस्यमापमतेस्वग्राह्यप्रामाण्यत्वाभावाद्विवक्षणीयस्यत
द्व्यधिककवरत्वस्यालाभः अतोग्राह्यपदंग्राह्यत्वतयाप्रभाकराभ्युपगतपरतयाव्याचष्टे स्वग्राह्यत्वेनेतिप्रमापद
प्रवृत्तिनिमित्तत्वादिनाप्रामाण्यनिवेशेज्ञानमात्रस्यैवपरमतेस्वग्राह्यप्रामाण्याश्रयत्वमितियर्ल्लोक्तदोषानुद्धारा
त्प्रामाण्यपदस्यपक्षीभूतविशेषपरतामाहघटत्ववतीतिमूलोक्तपरत्वस्यस्वपरमात्रग्राह्यत्वरूपसाध्यघट
कतयाविवक्षितइतिशेषपूरणाभिप्रायेणव्याचष्टेतत्स्वमात्रग्राह्यत्वरूपपरतत्त्वेसाध्यइतिअप्रामाण्यप्रसंगे राम॰
हेतुपूरपतितग्राहकस्येतिबाधादित्यंतेबाधःसाध्यघटकनिरुक्तप्रामाण्याश्रयग्राह्यत्वस्यतद्ग्राह्यत्वज्ञानेन ६८

पः तदाश्रयत्वात्स्वग्राह्यप्रामाण्याश्रयत्वात्प्रामाण्यस्यानुक्तविशेष्यताघटितत्वे अनुमितिपदमयं घट इदं
च ज्ञानं प्रमेतिसमूहालंबनानुमितिपरं बोध्यं अनुमितेरतुल्यादृ इति मूलोक्तप्रामाण्यपदार्थविवरणं प्रमा
सामान्यार्थकपदस्य अनुमितिरूपतद्विशेषपरत्वात्करणताबोधकस्य तृतीयाध्वफलोपधानपरत्वात्तत्संगतिः बाधा
नवतारदशायामनुमितिसंभवादाह बाधानवतार इति अप्रमत्वमिति तथा च प्रमानुत्पादे अप्रमत्वं चाप्रामाण्यपदेन
विवक्षितमित्याशयः स्वग्राह्येत्यत्र ग्राह्येति पाठे ग्राह्यपदस्य यथाश्रुतार्थकत्वे अप्रसिद्धिः वस्तुमात्रस्यैव
ग्राह्यत्वात् । स्वग्राह्यार्थकत्वे ग्राह्यप्रामाण्यपदस्य स्ववृत्तिप्रामाण्यग्राहकत्वार्थतया गुरुमते तादृशज्ञानाप्रसि
द्धिः प्रसिद्धौ च सिद्धसाधनमतो व्याचष्टे स्वग्राह्यत्वेनेति एतत्सार्वपक्षे कस्यचिद्व्याख्यामनुपपन्नत्वस्येति ग्राह्यप्रामा
ण्यमिति ग्राह्यप्रामाण्यभिन्नमिति ग्राह्यप्रामाण्याश्रयभिन्नमित्यर्थः अत्र ग्राह्यत्वमव्यावर्तकतया परित्यज्य व्याच
ष्टे अप्रमाणमितीति अप्रमेत्यर्थः अप्रमाभिन्नत्वेन प्रमानिवेशोनुचित इत्यतः पर्यवसितार्थमाह प्रमाग्राह्यत्वस

गदा॰प्र॰ ६९ 69 इतिप्रमाया इत्यस्य विवरणं अनुमितेरितिवक्तृमात्रस्यैव प्रमायास्थलत्वे तत्र विवादाप्रसक्तेरनुक्तिसंभवात्कस्मि
दिति अनभ्यासदशापन्नत्वस्य पक्षप्रविष्टज्ञाने विशेषणतापानिराकरणीयत्वात्तस्य दोषादानप्रयोजनमाह अ
नभ्यासेतीति स्वरूपसिद्धीति पक्षसत्वेत्यर्थः अनभ्यासदशापन्नज्ञानेत्युक्तौ पक्षगोप्रामाण्यसंशयात्प्रामाण्याश्र
यज्ञाने अनभ्यासदशापन्नत्वकथनात्प्रामाण्यस्याश्रयानंतरत्वतीपक्षरावृत्तिसंशयकोटित्वरूपहेतुसत्वं लभ्य
तइति भावः ततश्च अनभ्यासदशापन्नत्वं विशेषणापक्षतावच्छेदककोटिप्रविष्टं अर्थांतरप्रसंगादिति उक्तविप्रति
पत्तौ तादृशविशेषणप्रवेशात्तु इदंत्वधर्मावच्छिन्नेपरतस्त्वादिकोटरजिज्ञासितत्वादिति भावः तद्विशेषणस्य प्रयो
जनसत्वेपि अगत्या विप्रतिपत्तिस्थज्ञानपदस्यानभ्यासज्ञानपरत्वं स्वीकार्यं तथाचनार्थांतरमिति आशंक्यतस्य निष्प्र
योजनकत्वं दर्शयति निष्प्रयोजनकत्वादिति नन्वयं घट इदं ज्ञानं प्रमेत्याद्याकारकानुमित्यादेः प्रामाण्यस्य स्वतो राम॰ ६९
ग्राह्यत्वस्य पक्षत्वे विधिसाधनेंशतः सिद्धसाधनं निषेधसाधनेवाधः उक्तहेतो भागासिद्धिश्चेति तद्वारणाय तद्विशे

षणाफलत्वं न चाभ्यासानभ्यासकालीनज्ञानयोर्घटत्ववतीत्यादिप्रामाण्यमेकमेव तथा चोक्तविशेषणाप्रवेशे
पिनोक्तज्ञानव्यावृत्तिरिति वाच्यं ज्ञानव्यक्तिभेदेन प्रामाण्यभेदाभावे विशेषणाप्रवेशादप्रवेशे चोक्तसमकाले
वनानुमितिग्राह्यत्वमादाय दोषस्य वारणासंभवात्तद्भेदमतमालंब्यैवानुमानस्य व्याख्येयत्वादित्याशंकां नि
राकुरुते तथा हीत्यादिना यावदिति स्वाश्रयपदस्य यावत्स्वाश्रयपरत्वादिति भावः तथा च जद्भेदमते नोक्तदो
षावसरः यावत्स्वाश्रयांतर्गतानभ्यासदशायज्ञानाग्राह्यतयासामंजस्यादिति तन्मतमवलंब्योक्तानुमानव्या
ख्यासंभवान्नोक्तविशेषणमर्थवदिति तत्र च तन्मते च सिद्धसाधनादेरित्यादि यदा त्रिषु षसाधने विरोधिन्या
रं शतो वा सिध्याः परिग्रहः अवकाशोतिप्रसंगः घटत्ववति घटत्वप्रकारकत्वादिरूपपक्षतावच्छेदकाको
तस्यैकैकत्तयोशासंभवादिति भावः ननु तथापि ज्ञानव्यक्तिभेदेन प्रामाण्यभेदमतमवलंब्य मतविशेषणासा
र्थक्यमुपपादनीयमत आह भेदे त्विति न तदवकाशः अंशतः सिद्धसाधनादेर्दूषितात्प्रसक्तिः अंशे स्वाश्रय

गदा॰प्र॰ ७० 70

याप्यतानिरूपस्यअवच्छेदकावच्छेदेनतदनुमितौसामानाधिकरण्यमात्रेणतदभावानुमितौचाविरोधित्वा
दितिभावः ननुअप्रामाण्यग्राहिकपाद्यवसायसामग्र्याअप्रामाण्यस्यानुमतेप्यग्रहात्प्रामाण्यावच्छेदे
नविधेयत्वसामानाधिकरण्यमात्रेणाचाभावस्यसाधनंवाच्यसिद्धसाधनाभ्यांनसंभवतितथाचपक्षतावच्छेदक
सामानाधिकरण्येनविधिस्तदवच्छेदेनैवचाभावःसाधनीयइतिपक्षसंकोचआवश्यकइत्यतआहवस्तुतस्त्वि
तिइत्थमनुगतत्रैयप्रामाण्याश्रयज्ञानंसाध्यपक्षयोनिवेश्यमत्रलोपदर्शितपरतस्त्वानुमानतथाचोक्तपुत्स्माप
क्षसंकोचवैयर्थ्यमितिशेषः इतिबोध्यमिति इतिरीत्यातत्रज्ञानव्यक्तेर्वैशिष्ट्यतिवेश्यानुमानंबोध्यमित्यर्थः घटत्व
घतिघटत्वप्रकारकत्वाद्याश्रयत्वेनसाध्येज्ञाननिवेशापावल्लस्यतदविशेषणोसमन्वहात्वेवनत्रूपतादृशयत्किंचिज्ज्ञा
नयाप्यतयाघटत्ववतीत्यादिप्रामाण्यमात्रएववाधात्यावत्स्यतद्विशेषणत्वेचप्रत्येकंसकलतादृशप्रामाण्य राम॰ ७०
व्यक्तीनाघटत्वाघटिप्रकारकयावज्ज्ञानाग्राप्यतयासिद्धसाधनस्यदुर्वारत्वात्साध्येविशिष्यतत्तज्ज्ञानोपादानेचपक्ष

तावच्छेदकावच्छेदेनाभावसिद्धेनुद्देश्यतायामंशतः सिद्धसाधनस्य संभवतोप्यदोषत्वेपि सामान्यरूपेणपक्षत्वम
फलं सामान्यरूपेणपक्षत्वमभ्युपेत्यभागासिद्ध्यादिवारणाय पक्षेविशेषणादानायासोपि प्रक्षालनाद्धीति व्याप
नानुचित इति भावः ननुस्वत्वेन सामान्यतः प्रामाण्यनिवेशसंभवे शेषनूपेण तत्तत्प्रामाण्याश्रयव्यक्तीनामुपाद
नत्वौचितमित्यत आह अन्यथेति अन्यथा स्वपदेन प्रामाण्योपादानेशब्दमात्रेति मात्रपदेनार्थानुगमव्यवच्छे
दः स्वपदेन प्रामाण्यत्वावच्छिन्नोपादाने एवं दोषानुद्धारेण तस्य तत्तद्व्यक्तित्वावच्छिन्नपरतया आवश्यकत्वात्तद
श्रयज्ञानव्यक्तानामेव तत्तद्व्यक्तित्वेनोपादानौचित्यमिति भावः ज्ञानव्यक्तिभेदेन प्रामाण्यभेदपक्ष एव निर्भरः कृत इति
मूलोक्तस्वाश्रययदस्यपावत्स्वाश्रयार्थकतायांनिर्भरं दर्शयति न स्वाश्रययोरस्वं न यावत्स्वाश्रययोस्वमिति घटपद
दिज्ञानप्रामाण्यानामनुगतरूपेण न साध्यघटकतापि तु विशेष्यैवेति दर्शयति तन्न हि धर्मघटितेति तादृशेणाघ
त्ववति घटत्वप्रकारकत्वत्वादिना अननुगतत्वादिति तद्घटितेति तत्प्रकारकत्वस्य तत्पदार्थाननुगमेन सर्वेषां प्रामाण्या

नामननुगतत्वेनाभिधानासंभवादित्यर्थेननुमास्त्वितितत्प्रकारकत्वत्वमनुगतप्रमापदप्रवृत्तिनिमित्तत्वादेरनु
गतधर्मस्यसत्वात्तदवच्छिन्नस्यैवस्वशब्दार्थताकिंनोपपद्यत इत्यतआहप्रमापदेति॰अननुगमेपिसर्वप्रामाण्यानां
संग्रहसंभवेपिपरेषांनैयायिकानांगुरूणांज्ञानत्वात्मत्वादेःतत्त्वसिद्धिसंभवात्परेषामित्युक्तंपद्यश्चैतदनुमानस्य
नैयायिकोक्तत्वात्परपदेननैयायिकाभिधानंदुर्घटतयाप्रतिभातितथापियावत्त्वाश्रययत्किंचिद्रूपसाध्यसमभि
व्याहारात्तत्साध्यव्यवस्थापकापेक्षयापरत्वेननसदोषोनैयायिकलाभः एवंचपक्षत्वमपिविशेषरूपेणैवननुप्रमा
पदप्रवृत्तिनिमित्तत्वादिनाएकप्रामाण्येऽपरप्रामाण्याश्रययावद्वृत्तित्वाभावस्यनिर्विवादतयाउक्तरूपेणास
कलपक्षतायाअनौचित्यात्अतएवेश्वरयोगिज्ञानमात्रवृत्तितदंकुरप्रकारकत्वघटितप्रामाण्यबाधासिद्धिवा
रणायपानव्यासइत्यादिविशेषणाभित्यायास्तमतादृशविशेषणोपादानेपिसर्वविषयकत्ववतिसर्वविषयक
त्वप्रकारकत्वादेर्बाधस्यदुर्वारत्वात्तादृशप्रामाण्यस्यअस्मदादीनांतत्तीपक्षत्वासंशयेनपक्षतावच्छेदकाक्रांत

स्यात्॰ हेतुघटकोत्तरतती पत्वस्यानुगतस्य दुर्निर्वचतया भागासिद्धिवारणाय शक्यत्वाच्च॰ घटत्ववति घटत्वप्रका
रकत्वत्वादिना प्रामाण्यस्य साध्यघटकत्वे यावत्तदाश्रयया स्वत्वस्य प्रसिद्धिस्थलं प्रदर्शयन्नेव हेतुविशेषणा
व्यावर्त्यं निर्धारयति॰ तद्धर्मेति॰ न च घटत्ववतीत्यादिप्रामाण्यस्य घटादिरूपधर्मिभेदेन भेदाऽप्रामाणिक इति प्र
त्येकं कस्याश्रयि घटादिमत्केनैतादृशप्रामाण्याश्रययावज्ज्ञात्वत्वमिति कथमेतदिति वाच्यम्॰ तत्र घट्टित्वा
घे केकनात्रघटित्रिप्रकारघटितप्रामाण्यपक्षकस्थलाभिप्रायेणोक्तत्वसंगतेः वस्तुतो विशेष्यतापाविशेष्यभे
देन भिन्नतया तद्घटितत्वेन सामान्यतस्तत्तद्धर्मिघटितत्वेन च प्रामाण्यमपि धर्मिभेदाद्भिन्नमेव एवं च घटत्वा
दिनत्र द्रष्टादिविशेष्यकत्वावच्छिन्नघटादिप्रकारकत्वेनैव प्रामाण्यं साध्ये निवेशनीयं न तु घटत्वादिम
द्विशेष्यकत्वावच्छिन्नघटत्वादिप्रकारकत्वत्वेन सकलघटविशेष्यकघटत्वप्रकारकज्ञानानामेव तादृशघ
टत्वादिप्रकारकत्वाश्रयतया प्रत्येकं कुत्रापि प्रामाण्यपर्यावन्नादृशज्ञानयावत्त्वत्वासत्त्वे नवाधापत्तेः एवं च तत्र घ

गदा॰प्र॰ घटादिघटितप्रामाण्याश्रयपावच्छास्थत्वंतन्नघटादौप्रसिद्धमेवेतितत्रैवेतिविषयांतरेतद्धर्मघटितप्रामाण्य
७२ आश्रययावच्छास्थत्वाभावसत्वेनव्यभिचारानवकाशात्ज्ञानत्वादौचहेतुत्वसत्वादितिभावः तदुक्तेरितितत्पदेनतत्तत्प्रा
72 माण्याश्रयसामान्यस्यविवक्षणेतादृशप्रामाण्याश्रयएवंएवंज्ञानाधिकरणक्षणध्वंसस्यक्षणमात्रएवस
त्वेनतादृशज्ञानाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणक्षणाप्रसिद्धिःपत्किं
चिन्नादृशज्ञानाधिकरणक्षणध्वंसनिवेशोचायंघटइत्यादिव्यवसायोत्तरतृतीयक्षणोपत्रघटादौकथंविद्य
टादावेवधर्मिणिघटत्वादिसंशयस्तत्कोटितामादायघटत्वादौव्यभिचारइत्यतआहतदाचेतितदातछेदे
नतस्यपुंसःप्रामाण्यसंशयइतितदुत्तरतृतीयक्षणवृत्तितद्व्यक्तिसमानाधिकरणसंशयविषयत्वेनासिद्ध राम॰
मितिभावः नतद्धर्मादिष्वितिअतोनोक्तव्यभिचारइतिभावः प्रामाण्यसंशयजन्यसंशयकोटावितितृतीयक्षण ७२
ज्ञातप्रामाण्यसंशयोत्तरज्ञातसंशयकोपवित्यर्थः पघव्यक्त्युत्तरतृतीयक्षणेप्रामाण्यसंशयस्तस्याएवहेतु

घटकं तयात् तृतीयक्षणे प्रामाण्यसंशयानुधावनं अर्थसंशयस्य प्रामाण्यसंशयजन्यत्वं व्यभिचाराप्रयोजकमि
तिध्येयं सत्त्वं तस्य स्वाश्रयस्य समानकालीनत्वार्थकत्वे उत्तरत्र तृतीयक्षणाजातस्य तथात्वाभावादप्रसिद्धिः
स्वाश्रयजाते सतीत्यर्थकत्वे स्वाश्रयोत्पत्त्युत्तरत्वपर्यवसितस्य तदर्थस्याप्रवर्त्तकतया वैयर्थ्यमतः सतिसप्तम्याः
सामानाधिकरण्यपरतया तत्सार्थकप्रतिसत्त्वं तच्चेति तद्व्यक्तीति तदुत्तरतृतीयत्वावधीत्यर्थः तदप्रसिद्धिः यदुत्तरतृती
यक्षणे तदाश्रयस्य पुंसो न घटत्वादौ संशयः पुत्रोत्पातरस्य तत्र संशय एव सैवोपादेया अतो सत्त्वं तद्वैयर्थ्यसमुदिति
हेत्वर्थमाह तथा चेति यत्संशयविषयत्वं प्रामाण्ये तद्विषयत्वं तद्घटकघटत्वादिसाधारणमिति तत्र व्यभिचारवार
णाय कोटित्वादिति उत्तरतृतीयत्वं उत्तरत्वे सति तृतीयत्वं यदि विवक्षितं तदा एवोत्तरसाधारणात् तृतीयत्वस्यैकस्य
दुर्वचतया प्रकृते तृतीयत्वमुत्तरतृतीयस्यैवेति उत्तरत्वांशे वैयर्थ्यमतः समुदायस्यैवार्थे निर्वक्ति तदुत्तरतृतीयत्व
चेति सत्त्वं तद्विशेषणाध्वसापूर्वकालीनार्थसंशयमादाये न व्यभिचारः विषयितासंबंधेन तदधिकरणतद्विषयप्र

गदा०प्र
७३
73

वोत्पन्नज्ञानादिध्वंसमादायपूर्वकालेऽतिप्रसंगवारणाय प्रथमक्षणोपदैकालिकसंवंधेनाधिकरणत्वस्याभायएवं
तदधिकरणकालध्वंसविषयकपूर्वकालीनज्ञानध्वंसमादायपूर्वकालेऽतिप्रसंगवारणाय द्वितीयक्षणमपि कालि
कसंवंधेनाधिकरणतात्वाभाय द्वितीयक्षणसाधारणातदधिकरणकालध्वंसाधिकरणत्वमात्रनिवेशेतत्तीयक्षणे
ऽनुपजातघटधर्मिकघटत्वादिसंदेहमादायतत्रव्यभिचारः यद्व्यक्तेरुत्तरत्तीयक्षणेन संशयस्तद्व्यक्तेर्हेतुघटकत
वाय द्वितीयक्षणे संशयस्तस्यास्त्रपि व्यक्तेर्हेतुघटकत्वात् अतो द्वितीयक्षणध्वंसाधिकरणत्वनिवेशः वस्तुतो द्वि
तीयक्षणे संशयस्तस्यास्त्रपि व्यक्तेर्हेतुघटकत्वात् अतो द्वितीयक्षणध्वंसाधिकरणत्वनिवेशः वस्तुतो द्वितीयक्षण
साधारणोक्तभागमात्रनिवेशेनैवोक्तात्रत्तीयपर्यन्तस्य यथाश्रुतार्थपरित्यागइति द्वितीयक्षणध्वंसनिवेशः यथा
सन्निवेशेऽवैयर्थ्यात् अत एव तद्व्यक्तिध्वंसाधिकरणत्वेसतीत्यत्रोपेक्षितघटादिध्वंसानधिकरणक्षणोपि तदुत्तरत् गम०
तीयव्यवहारेणतादृशसत्तार्थघटितस्यापदार्थत्वात् चतुर्थादिक्षणवारणायविशेष्यदलं तादृशेति द्वितीयध्वं ७३

सविषयकपूर्वज्ञानध्वंसाधिकरणतयाऽप्रसिद्ध्यापत्तेः न्यूलोक्तस्वपदंवयथाश्रुतार्थंकं अन्यथात्ततीयक्षणापर्यंत
स्थायिस्थूलकालवृत्तितायाव्यवसायपूर्वकालोत्पन्नार्थसंशयेपिसत्वेनव्यभिचारप्रसंगात् उत्तरान्ततीयइतिस
मासादेरणास्थितिक्षणायेक्षयात्ततोपक्षणाविवक्षायामपिपद्यक्तेस्तादृशक्षणोप्रामाण्यएवसंशयोनार्थतद्य
क्तिधितीयक्षणोपादानेनार्थव्यभिचारणासंभवेक्षणास्मतत्नव्यक्तित्वेनोपादानेगौरवविरहेपिचाप्रयोजकत्वंउर्वार
मेवस्वाश्रयेणाप्रामाण्यग्रहेपितत्राशेप्रामाण्यसंशयसंभवात् अउत्पत्तिक्षणापेक्षयात्ततीयक्षणमात्रवृत्ति
उत्तरततीयत्वंनिनुक्तं एवंचव्यवसायानंतरज्ञातानुव्यवसाय— पदमिन्नानततदुत्तरज्ञातकोटिद्वयोपस्थिति
भ्यांतनितंव्यद्दसायेप्रामाण्यसंशयमादायनपक्षेहेतुसिद्धिरत्त ःस्थलांतरीयप्रामाण्यसंशयमादायतानु
पपादयतिपूर्ववन्नीतिएकस्मरणमितिज्ञानघटोभयविशेष्यकवाक्षुषादिज्ञानासंभवात्स्मरणानुधावनम् अ
नुमितिशाब्दबोधादेरप्युपलक्षणमेतत्प्रामाण्याप्रामाण्यस्मरणस्यप्रामाण्यघटकतयाघटेघटत्ववत्ताव

गाहित्वेनघटत्वघटितप्रामाण्याश्रयत्वेपितद्वितीयक्षणाज्जातसंशयेतत्तृतीयक्षणावृत्तित्वसत्वेविचघटस्मुख्यवि
शेष्यकघटत्वप्रकारकज्ञानएवघटत्वांशेप्रामाण्यग्रहस्यतइत्युक्तौतादृशज्ञानोत्तरतृतीयक्षणावृत्तिसंशयविषयत्व
मेवहेतुत्वकार्यमन्यथाप्रयोजकताथत्तेरितिज्ञानत्वप्रधर्मिस्मरणस्यमुख्यविशेष्यकत्वानुधावनेवक्तुतोयादृशस्वा
श्रयव्यक्तेर्द्वितीयक्षणस्यप्रामाण्यसंशयजन्यतव्यक्तेनमूलस्थस्वाश्रययदेनविवक्षातथासतिद्वितीयक्षणावृ
त्तित्वमुपेक्ष्यतृतीयक्षणावृत्तित्वानुसरणस्यनिर्वीजतायातादितिधर्मिज्ञानस्यप्रामाण्याश्रयत्वमुपपादयितुमेतदे
वप्रामाण्योपस्थितेः संशयजनकत्वेधर्मिज्ञानप्राक्कालीनस्वातंत्र्येणघटविषयकत्वापेक्षावीजं प्रामाण्यादिको
टिस्मृतेःस्वातंत्र्येणघटविषयिण्याअनंतरंयत्रतदनुव्यवसायत्वप्रधर्मिज्ञानंतदनंतरंजातसंशयमादायपक्षे
हेतुसत्वनिर्वाहेयिसाधारणधर्मादिविशिष्टधर्मिज्ञानजन्यतायाःतवकोट्युपस्थितेःसंशयजनकत्वेधर्मिज्ञानप्रा
क्कालीनकोट्युपस्थितितोनसंशयःसंभवतीतिधर्मिज्ञानोत्तरकोट्युपस्थित्यनुधावनंसकलप्रामाण्यमुक्तप्रणा

त्वात्तदाश्रयत्वतीयपक्षरोसंशयस्याप्रामाणिकत्वात्तत्प्रामाण्यविषयेहेतौविशेषेहेतावसिद्धिरित्याशंकांपरिहर
तितत्प्रामाण्यंपक्षाद्बहिर्भावनीयंनपक्षीकार्यंप्रामाण्यंविशिष्यैवपक्षत्वादितिभावः।ननुव्यवसायोत्रत्वतीयपक्ष
राष्ट्वत्तिनिश्चयप्रकारतामादायघटत्वादौव्यभिचारस्यवारणायपक्षेसंशयउपपन्नः।संशयत्वंचयदिएकधर्मिणिस्वस्व
विरोध्युभयप्रकारकत्वंवविवक्षितंतदागुरुमतेहेतुसिद्धिः।अन्यथाख्यातिवादिनस्तस्यज्ञानांशेप्रामाण्यविरोधिकोटेर्वा
धितत्वेनतत्प्रकारकत्वासंभवात्तनापिज्ञायमानेधर्मिण्यग्रहस्यप्रमाणासंसर्गकस्वविरोधिज्ञानत्वमुच्यतेतन्मतेस्वतंत्र
कोटित्वस्योपस्थितावतन्मतेचकोटिद्वयविशेषज्ञानेपिप्रसिद्धमितितन्मतेव्यवसायेप्रामाण्यभानेनाप्रामाण्यासंसर्गाग्र
हसत्वात्तृतीयपक्षरोऽप्रामाण्यस्याग्रहीतासंसर्गकत्वविरहेणासिद्धेः।नापिस्वविरोधिविषयकज्ञानत्वमात्रंयव्यवसा
योत्रत्वतीयपक्षरोघटत्वाद्यभावस्यक्वचिद्धर्मिण्यनिश्चयोनापिनिर्विकल्पकज्ञानंसएवव्यवसायस्तत्पदेनविवक्षित
इतिनिर्विकल्पकज्ञानस्यविपरीतप्रतिबंधतयाप्रामाण्यस्यव्यवसायेनग्रहणापित्वतीयपक्षरोतादृशाप्रामाण्यज्ञानसं

गदा·प्र·
७५
75

भेवेनतादृशज्ञानविषयत्वस्याप्रयोजकतायाव्यवसायाविषयत्वासाधकत्वात्नापिधर्मिसाकांक्षस्वविरोधिकोटिविषय
कज्ञानत्वचत्राकांक्षावयदार्थांतरमितिसायमतेतादृशाकांक्षायाअप्रसिद्धेरित्यतआहस्वमतेनैवेतितथाचएकधर्मि
कस्वस्वाभावोभयप्रकारकज्ञानत्वमेवसंशयत्वंसंशयत्वस्यान्यथाख्यातिरूपताप्रसन्नेरणाव्यवस्थाप्यमध्यस्थस्योक्तहे
तुमत्तानिश्चयःपक्षेउपपादनीयइतिभावः यद्यप्यन्यधर्मिकसंशयसाधारणानुपेणासंशयस्यहेतुघटकत्वेअप्रयोज
कत्वंदुर्वारमेवभिन्नधर्मिकसंशयस्यविरोधिज्ञानाप्रतिबध्यत्वात्· तथाप्यग्रेस्वपमुद्राविपिव्यतरएवदोषइत्सदोषः व्य
वसायसमानधर्मिकत्वन्तुसंशयस्यविवक्षातहेन्यायमतेव्यवसायस्यस्वाविषयकत्वेनतद्धर्मिकप्रामाण्यसंशयस्यव्य
वसायसमानधर्मिकत्वविरहेणाप्रसिद्धेःव्यवसायधर्मिकतत्तृतीयक्षणोत्पत्तिसंशयविषयत्वेनतद्व्यवसायाग्राह्यत्वे राम·
साधनेऽप्यप्रयोजकत्वंदुर्वारमेवान्याशग्राह्यत्वसाधारणाहृपावच्छिन्नग्राह्यत्वाभावमंतरेणापिप्रामाण्यपक्षेनिरुक्तहे ७५
तुमत्तायाउपपत्तेः तद्व्यवसायांशेतदृग्राह्यत्वसाधनेचन्यायमतेव्यवसायांशेतदृग्राह्यत्वरूपप्रतियोग्यप्रसिद्धिः स्वग्राह

कृतव्यवसायत्वस्य साध्यत्वोपगमेव स्वत्वाननुगमेन साध्यप्रसिद्धौ — — — येताव्यवसायं पक्षीकृत्य प्रामाण्यग्राह
कत्वसाधनप्रकारः स्वयमग्रे दर्शनीयः एतेनेति उक्तक्रमेण न्यायमतेपि व्यवसायो त्वरत्ती पक्षणो तद्धर्मिकप्रामाण्य
संशयसंभवादसिद्धिविरहेणाव्यवसायव्यक्तिविशेषोपादानादर्थे व्यभिचारविरहेणाचेत्यर्थः दूषणाभासाः। असिद्धि
व्यभिचारप्रदर्शनरूपाः तेषामाभासता दर्शितस्फुटतरसमाधानसत्त्वेन समाधानानामाभासतावदोषोत्तरसंपादकत्वेन
प्रकृतदोषनिराकरणाक्षमत्वेनवेति व्यक्तीभविष्यतीति न्यायमत इति शेषः क्रमिकानुव्यवसायात्मकधर्मिज्ञानकोप
पस्थितिसापेक्षणादिति भावः तथा चासिद्धिदोष इति सूचितं असिद्धिपरीहारमाशंकते अथेति तत्स्थितिक्षणोति स्वाश्र
यद्वितीयक्षणोत्यर्थः वक्तव्यं तदुत्तरत्वतीयत्वमिति शेषः अत्र च द्वितीयक्षणस्य स्वोत्पत्त्यधिकरणस्वाश्रयकालत्वेन नि
वेशः अनधिकरणतानिवेशे उत्पत्तिक्षणस्य स्वाश्रयतया तत्तृतीयक्षणाध्वंसाधिकरणाच्चतुर्थक्षणस्य पूर्वोपदर्शित
विशेष्यदलासत्त्वेनासंगत्यापत्तेः ज्ञानत्वविशिष्टस्य ग्राहक इति ज्ञानत्वविशिष्टवृत्तेज्ञानत्वज्ञानस्य प्रकारित्वादिविशि

गदा॰प्र॰ षत्वेनैतज्ज्ञानस्यैवाहेतुत्वमित्यभिप्रायेणज्ञानत्वस्यव्यवसायकालेयत्रज्ञानेप्रकारांतरेणतत्स्थलाभिप्रायेणास्वया
७६ ह्येकावतीतितत्रापिविशेषणज्ञानंहेतुःज्ञानत्वस्यप्रकारांतरेणपत्रनोपस्थितिरित्यभिप्रायेणतथाचसतिज्ञानत्वरूपधर्मि
76 तावच्छेदकप्रकारकज्ञानविरहेणतद्घटितधर्मावच्छिन्नधर्मिकप्रामाण्यसंशयासंभवेपिघटत्वादिप्रकारकत्वादिमा
त्रंधर्मितावच्छेदकीकृत्यसंशयसंभवात्तमादायैवप्रामाण्येहेतुसिद्धिःसंभवतीतिज्ञानत्वस्यधर्मितावच्छेदकानंतर्भावो
किंचित्कर इति अनुव्यवसायानंतरापेक्षयाविलक्षणस्यनावकाशइतिभावः अथेति अनंतरमित्यर्थः एवमग्रेपि
स्वाश्रयस्यघटत्ववतिघटत्वप्रकारकत्वाश्रयस्य अयंघट इत्यादिव्यवसायस्यविषयेविषयेवाधर्मांतरेपटादे
रन्यथाविपक्षेणचतुर्थपक्षेणतृतीयपक्षेणवासंदिह्यमानेघटत्वादावित्यन्वयः उक्तव्यवसायस्यसमूहालंबनात्मक
त्वेपितदुत्तरजातपटादिरूपधर्मिज्ञानवशात्तद्धर्मिकघटत्वादिसंशयःसंभवतीतिमिश्रोक्तसमूहालंबनेननिर्भरइ रा॰म॰
तिसूचनायविषयेऽविषयेवेत्युक्तंतत्रव्यवसायतृतीयपक्षेणतदीयप्रामाण्यसंदेहानुदयात्स्वपदस्यतृतीयपक्ष ७६

घटभिन्नत्वादिप्रकारकप्रामाण्यग्रहविषयतायाः प्रामाण्यत्वानवच्छिन्नत्वात्तदुक्तविवक्षा
याः प्रयोजनांतरमाह। नवेति निषेधस्य तादृशज्ञानग्राह्यत्वाभावरूपनैयायिकसाध्यस्याप्रसि
द्धिरितिवस्तुमात्रस्यैव सामान्यलक्षणादिजन्यप्रमाविषयकज्ञानाजन्यज्ञानविषयत्वेन तादृ
शज्ञानविषयत्वस्य केवलान्वयित्वादिति भावः प्रकारतापर्यंतनिवेशे निषेधाप्रसिद्धिमुद्धारयितुमि
त्येवेति द्वितीयकल्पाभिप्रायेणेदं प्रथमकल्पे तज्ज्ञानांशे ग्राह्यत्वस्यान्यांशेपि प्रसिद्धेः सुलभ
त्वादिति ज्ञानस्य तज्ज्ञानरूपविशेषणाज्ञानजन्यतया नैयायिकसिद्धस्य वज्ज्ञाने प्रकारतया तद्भिन्नज्ञाने
प्रकारत्वाभावस्य तत्रासंभवादिति भावः नच प्राथमिकतज्ज्ञानप्रत्यक्षादावपि मीमांसकमते तज्ज्ञान
स्य प्रकारतया तादृशज्ञानस्य च ज्ञानविषयकज्ञानजन्यत्वेन नैयायिकसिद्धिरितीयानुव्यवसा
यादिभिन्नतया मीमांसकमते द्वितीयकल्पे निषेधाप्रसिद्धिर्दुर्वारैवेति वाच्यं तद्रूपसंबंधावच्छि

गदा० न्यप्रकारतायाद्वितीयकल्पेसाध्यघटकतोपगमेनस्वरूपसंबंधेनावृत्तेन ज्ञानेद्रव्यादावपिपरमतेनिषेधप्र
७६ सिद्धेः संपादनीयत्वात् मिश्रमतेस्वरूपसंबंधेनावृत्तावपितेनसंबंधेनान्यथाप्रकारत्वस्यसत्वेपितादृ
76 शावृत्तेः सर्वस्यतादृशभ्रमेमानाभावात्क्वचित्तदभावप्रसिद्धिसंभवात् तज्ज्ञानपर्यंतानुधावनंचप्रका
रतावच्छेदकसंबंधविशेषाप्रवेशेपिस्वमतेतत्प्रसिद्धिःसंभवतीत्यभिप्रायात्मतांतरमाह तज्ज्ञान
पटितेतिविशेषणतयातज्ज्ञानेयद्घटकंतादृशविशिष्टेस्यर्थः तादृशविशिष्टज्ञानस्यन्यायमतेतज्ज्ञा
नविषयकज्ञानजन्यएवज्ञानेविषयत्वात् एवंचविषयतामात्रस्यसाध्यघटकत्वेपिनिर्वाहोबोध्यः
कश्चिदित्यनेनास्वरसःसूचितः केवलेविशेष्येतादृशज्ञानाजन्यज्ञानविषयत्वसत्वेविशिष्टेपिविशे
ष्यतदभावस्यदुर्लभत्वमितितद्बीजं॥ प्रथमकल्पेविधिप्रसिद्धिस्थलमाहविधीति घटत्वप्रकारक एम०
त्वादावितिअभावत्वप्रतियोगित्वयोरिवन्यायमतेप्रकारित्वादेरप्यनुपस्थितस्यप्रकारत्वाद्यव ७६

सायानंतरक्षणोत्पन्नानुव्यवसायेव्यवसायविषयकज्ञानजन्यत्वेनतन्नैयायिकसिद्धभिन्नेव्यवसायज्ञा
नात्मकविशेष्यनिरूपितप्रकारतायाघटत्वप्रकारकत्वादौसत्वादितिभावः।यद्यप्येवंप्रामाण्यनिषे
धरूपनैयायिकसाध्यसाधकयोः प्रामाण्यस्यैवघटत्वप्रकारकत्वत्वादिमात्रपुरस्कारेणात
न्मतेपिज्ञानविषयकज्ञानाजन्यत्वात्तद्विषयत्वेनतत्रतदभावस्यदुर्घटत्वात्तथापिविषयेपिविष
यतानवच्छेदकरूपावच्छेदेनविषयत्वाभावमभ्युपेत्यैतदभिधानं अन्यथाप्रकारित्वादिकमप्य
नुपस्थितंनप्रकारइतिमतमवलंव्यवाधः परिहरणीयः घटज्ञानांशेविषयितासंबंधेनप्रथमा
नुव्यवसायेप्रकारीभूतेविषयएवव्यवसायकालीनोपस्थितिवशात्तदनंतरंतत्रत्यक्षएवतत्र
प्रकारीभूतज्ञानत्वादौचतन्नज्ञानरूपघटत्वप्रकारकत्वाद्याश्रयविषयकज्ञानाजन्यज्ञानप्रकार
त्वप्रसिद्धिः आदिपदादेवचतत्परिग्रहः द्वितीयकल्पेज्ञानाद्यत्तावपिवस्त्वेतरेस्तोलभ्यमित्याह

गदा०
७७
77

घटादौवेतिस्वरूपसंबंधावच्छिन्नप्रकारतायाः द्वितीयकल्पेविवक्षितत्वेअन्यथास्यादात्मनंगीकृतंगु
रुमतेताद्दशसंबंधेनावर्त्तमानघटादौताद्दशीप्रकारतानसंभवतीत्याशयेनादिपदंताद्दशंसंबंध
नवृत्तिमत्तामभावादीनांपरिग्राहकंविशेष्यभूतनैयायिकसिद्धभेदेनताद्दशज्ञानजन्यतयानै
यायिकसिद्धभिन्नंज्ञानमादायापियद्दमतमात्रसिद्धप्रसिद्धिस्थलमाहभट्टानामितिप्रका
रत्वसंभवेत्विति ज्ञानेरूपसाध्यांशेसमानकालीनत्वसंबंधेनप्रकारत्वरूपेत्यर्थः तस्यांज्ञातता
यांज्ञातांशेग्राह्यत्वघटित साध्यस्यापिप्रसिद्धिरित्यर्थः लिंगस्यसाध्यविशेषणतयानुमि
तौभानंसविवादमित्यतःसंभवेत्वित्यभिहितंद्वितीयकल्पेघटादिविशेष्यकज्ञानतानाप्रत्य
क्षप्रकारतामादायापितेषांस्वमतेसाध्यप्रसिद्धिरिष्टैवयद्यपिज्ञाततालिंगतामादायज्ञात
तादावपिप्रसिद्धिसंभवस्तथापितत्रोभयमतएवतत्प्रसिद्धिस्तस्यघटत्वप्रकारकत्वादा

गम०
७७

विरस्यादिपदेन प्रागुपादानाद् ज्ञाततापर्यंतानुसरणात् ज्ञाततात्वेज्ञानांशेग्राह्यत्वरूपसाध्यवत्त्वाभा
वात्तदुपेक्षितं। नैयायिकसिद्धसंवादिप्रवृत्तिजनकत्वादिलिंगकानुमित्याप्रामाण्यप्रकारेणज्ञा
नावगाहनेसतिसाध्यप्रसिद्धौतन्मूलकज्ञाततालिंगकानुमित्याप्रामाण्याग्रहेणैवमहद्गमनेतद्
र्शितसाध्यनिर्वाहादनुव्यवसायस्थानीयपूर्वाप्रतीतज्ञानविषयकसामान्यमुखव्याप्त्यधीन
ज्ञाततालिंगकानुमितेर्नप्रामाण्यावगाहित्वात्तन्मतेसिद्ध्यति नवातावतानतेषांस्वतस्त्वसि
द्धिःप्रामाण्ये तादृशप्रामाण्यभासकसामग्र्यायथार्थेच्छादिलिंगकप्रामाण्यविशिष्टानु
मितिसामग्रीतोऽविशेषात्नैयायिकासिद्धज्ञाततालिंगकत्वेनविशेषस्यस्वतस्त्वसंपा
दकत्वोपगमेपरिभाषामात्रोपगमेनस्वतःपरतोवेतिविवादपर्यवसानात् ज्ञाततालिंगकरू
पपदार्थांतरदभावएवविवादविश्रमात्तदस्याशंक्योक्तानुमितिव्यावर्त्तनायविशेषणांतरंप्र

वेशयतितादृशज्ञानेनेतिप्रकृतप्रामाण्याश्रयज्ञानेनेत्यर्थः सामानाधिकरण्यद्वयंतन्निरूपितं एतच्चविशेष
णंयथाश्रुतमूलत्नभ्यमेवएतद्विशेषणेनचपूर्वोपदर्शितयथार्थसंस्कारादिलिंगकसामान्यव्याप्त्युप
ष्टम्भानुमितिग्रास्यतृयाःर्थीतरवारणासंभवस्यदर्शितत्वाततादृशज्ञानजन्यतयानैयायिकसिद्धभि
न्नत्वरूपोक्तविशेषणोपादानमित्यवधेयंदर्शितज्ञाततालिंगकानुमित्यार्थीतरवारणायतादृश
ज्ञानजन्यत्वेननैयायिकसिद्धभिन्नत्वमुपेक्ष्यतादृशज्ञानजन्यभिन्नत्वेननैयायिकसिद्धत्वंके
चिन्निवेशयंतिविशेषणं उक्तज्ञाततालिंगकानुमितेस्तादृशज्ञानजन्यतयानैयायिकसिद्ध
भिन्नत्वेपिनतदजन्यतयानैयायिकसिद्धत्वमतस्तद्ग्राह्यतयानेसिद्धसाधनमितिवदंतितन्म
तमुपन्यस्यति केचित्त्विति नन्वेवमनुव्यवसायस्यानीयज्ञाततालिंगकानुमितेरपिभट्टमतेऽ
संग्रहः तस्यानैयायिकासिद्धत्वादित्यतआह व्यवसायेति व्यवसायानंतरंज्ञाततोत्पत्त्यधिक

रणाव्यवसाय भट्टमते द्वितीयक्षणमाद्यक्षणात्रयस्य क्षणचतुष्टयस्य वा मध्ये जायमानमित्यर्थः ज्ञात
ताद्वितीयक्षणे ज्ञाततायाः प्रत्यक्षव्याप्तिस्मरणयोर्भट्टमते युगपदुत्पादसंभवात् विशिष्टपरामर्शस्य येन
स्य अनुमितावनपेक्षायां तत्तृतीयक्षण एव ज्ञानानुमितेः संभवः। विशिष्टपरामर्शापेक्षायां तदा विशि
ष्टपरामर्शोत्पत्त्या चतुर्थक्षणेऽनुमितिरित्याशयेन त्रिचतुरेत्युक्तं नैयायिकैः साक्षात्कारित्वेनैव वृत्ति
साक्षात्कारित्व व्यवसायानंतरक्षणोत्पन्नत्वाभ्यामेवेत्यर्थः व्यवसायानंतरक्षणोत्पन्नतया स्वीकृतत्वे
न व्यवसायविषयक ज्ञानाजन्यतया स्वीकृतत्वलाभः। व्यवसायानंतरक्षणोत्पन्नतास्वीकारोनुमि
तित्वोपगमेन संभवतीति तद्धेतुत्वया साक्षात्कारित्वोपगमाभिधानं एवकारेणानुमितित्वव्यवसाया
नंतरं तृतीयक्षणोत्पन्नत्वादिस्वीकारव्यवच्छेदः न तन्मतापरिग्रहः भट्टमतसिद्धज्ञाततालिंगकानु
मित्यपरिग्रहः तस्याज्ञाततालिंगकानुमितित्वेन न्यायमतासिद्धत्वेपि तज्ज्ञानविषयकज्ञानाजन्यज्ञा

गदा०
७९
79

न प्रत्यक्षत्वेन तन्मात्रसिद्धतयैव तत्संग्रहसंभवादिति भावः तादृशाश्रयं । प्रकृतप्रामाण्याश्रयं । अपूर्वप्रा
माण्यग्रहात् पूर्वं प्रमात्वेन ज्ञानवृत्तिप्रामाण्यस्य योगजधर्मबले न तज्ज्ञानांशे ग्रहान्निषेधसाधने बाध इ
ति तन्मते योगिनामभावेन तद्व्यवस्थापनं विना सिद्धसाधनाव्यवस्थितेस्तत्त्वोक्तं न च प्रामाण्यज्ञा
नं विना प्रामाण्यप्रकारकत्वासंभवात् व्याप्यदोषः योगजधर्मादेव प्रथमं प्रामाण्यग्रहेण विशेषण
ज्ञाननिर्वाहे तज्ज्ञानेऽपि निर्विकल्पकस्य भाने बाधकाभावात् तादृशज्ञानजन्यतयैव प्रामाण्यप्रकारकज्ञान
स्य तदाश्रयविषयकज्ञानाजन्यत्वं दुर्घटं प्रामाण्यस्य तद्वृत्तितत्प्रकारकत्वविशिष्टज्ञानत्वरूपत्वे तज्ज्ञाना
न्तर्गतिमेव वैशिष्ट्यघटकतज्ज्ञानभानमिति वाच्यं प्रमात्वं ज्ञानं विनापि प्रमापदप्रवृत्तिनिमित्तत्वादिना
प्राकृतप्रामाण्यरूपविशेषणस्मरणादिसहकृतात् प्रामाण्यघटकप्रकारित्वादिस्मरणसहकृता
द्योगजधर्मात्तत्प्रकारकप्रत्यक्षसंभवात् न चैवं वक्ष्यमाणरीत्या योगिज्ञानवारणेऽपि तदुपदर्शित

प्राम०
७९

स्मरणादिजन्यप्रामाण्योपनीतभानं ज्ञानांशे लौकिकं प्रामाण्याश्रयविषयकज्ञानाजन्यमपि संभवती
ति निषेधबाधो दुरुद्धर एवेति वाच्यं उपनीतभानस्थले दर्शितनियमसत्वे प्रामाण्याश्रयविषय
कज्ञानाजन्यमपि संभवतीति निषेधबाधो दुरुद्धर एवेति वाच्यं उपनीतभानस्थले दर्शितनि
यमसत्वे प्रामाण्याश्रयज्ञाने प्रामाण्यभानं विना तदंशे प्रामाण्योपनीतभानासंभवात् तज्ज्ञानां
शे ग्राह्यत्वविरहस्य बाधासंभवात् प्रमापदप्रवृत्तिनिमित्तत्वादिनोपस्थितप्रकृतप्रामाण्यरूप
सामान्यप्रत्यासत्तिजन्यतत्प्रकारकप्रत्यक्षमादायापि न बाधः तत्संबंधेन सामान्यप्रकार
कमेव ज्ञानं तत्संबंधेन सामान्याश्रयभासकमिति मतस्यावलंबनीयत्वात् तादृशज्ञानस्य च
प्रमात्वरूपस्य प्रमाविशेष्यकत्वात् व्यधिकरणप्रकारकाजन्यत्वेनेति मज्ज्ञाने विशिष्याप्रमावि
शेष्यकप्रामाण्यरूपसामान्यप्रत्यासत्तिजन्यग्रहस्य वारणीयत्वात् नावतैव च तज्ज्ञानविशे

गदा०
८०
80

ष्यतानिरूपिततत्वानिशेषिततत्प्रकारतामात्रस्यग्राह्यतास्वरूपत्वकल्पेभ्रमरूपपक्षेव्याप्यत्वघटकत
यापिप्रमात्वरूपसाध्याश्रयत्वेनभ्रममवगाहमानेनतपरामर्शेनाजनितां प्रामाण्यानुमितिमादायनि
षेधस्यबाधवारणंसंभवतीतिध्येयं तदाश्रयपदेनतदाश्रयत्वग्रहविषयार्थकतयाभ्रमजन्यज्ञा
नव्यावृत्तिरित्यपिकेचित् नवक्तव्यः नतज्ज्ञानपदेनविवक्षणीयः स्वपदस्याजन्यज्ञानतपानुयो
गिपरत्वेचरमज्ञानपदेनानुव्यवसायादीनांन्यायमतेनोपादानसंभवः तन्मते प्रामाण्यस्यतद्ग्रा
ह्यत्वाद्विति प्रामाण्यग्राहकं चज्ञानं तन्मते स्वग्राह्यप्रामाण्याश्रयज्ञानजन्यमेवेतिस्वपदार्था
प्रसिद्धिरतः प्रतियोगिनिस्वत्वमंतर्भाव्यभेदकूटंनिवेशयति तथाचेति तज्ज्ञानसमानाधिक
रणेति तज्ज्ञानसमानाधिकरणंयत्स्वग्राह्यप्रामाण्याश्रयतज्ज्ञानविषयकज्ञानंतज्जन्यत्वंन
नैयायिकसिद्धंयद्यस्त्वंतदन्यघटजज्ञानसमानाधिकरणंज्ञानंतद्ग्राह्यंनवेत्यर्थः प्रथमस

राम०
८०

मानाधिकरण्येनानुपादानेप्यपि स्वग्राह्यप्रामाण्याश्रयविषयकत्वेन परमेश्वरज्ञाननिवेशेपिन
न्यायमतेतज्जन्यास्मदादिज्ञानाप्रसिद्धिः प्रामाण्यविषयकानुमित्यादेरेव स्वपदेनोपादानात्तद
न्यत्वरूपाजन्यांतार्थस्यप्रामाण्याविषयकज्ञान एव प्रसिद्धेः प्रामाण्याविषयकं च ज्ञानं न्यायमते
प्रामाण्यविषयकत्वेन मीमांसकमतप्रसिद्धं अनुव्यवसायादिकमपीति निषेधसाध्ये घटत्ववती
त्यादिप्रामाण्यस्य तद्ग्राह्यत्वस्य सिद्धेरप्रत्यूहतया तत्पक्षकविप्रतिपत्तेर्न काचिदनुपपत्तिः प्रा
माण्यघटितप्रामाण्यपक्षकस्थले विषयीभूतप्रामाण्यविषयकस्येदं प्रमेत्यादिज्ञानानुव्य
वसायादेर्न्यायमते स्वग्राह्यप्रामाण्याश्रयघटादिज्ञानविषयकेश्वरज्ञानजन्यतयातदजन्य
ज्ञानाग्राह्यत्वस्यैव तन्मते साध्यतया अनुव्यवसायादेः प्रामाण्याग्राहकत्वासिद्ध्या उद्देश्या
सिद्धिस्तत्प्रथमसमानाधिकरण्येनोपादानेपि तादृशानुव्यवसायादेः स्वग्राह्यविषयीभूत

प्रामाण्याश्रयघटादिज्ञानविषयकेण तद्धर्मिकप्रामाण्यप्रकारकोक्तव्यवसायरूपतज्ज्ञानसमानाधि
करणज्ञानेन जनितत्वादसंग्रहेणासमानेवतादृशप्रामाण्यस्य पक्षेबहिर्भावेन समाधिरपि समान एव तत्
थापि घटादिज्ञानानुव्यवसायस्यान्यायमतेपि घटत्वादिप्रकारकत्वेन तत्प्रामाण्यावगाहितया स्वग्रा
ह्यप्रामाण्याश्रयव्यवसायविषयकपरमेश्वरज्ञानजन्यतया प्रामाण्यत्वेन ग्राह्यतापर्यन्तस्य चाविवक्षि
तत्वात् कथितं यद्यस्त्वं तदन्यत्वं दुर्घटं एवं पुरुषांतरीयप्रमाविषयकान्यपुरुषीयप्रामाण्यज्ञानानुव्यव
सायस्य ग्राह्यं तद्विषयीभूतप्रामाण्यं तदाश्रयपुरुषांतरीयज्ञानविषयकेव्यवसायेतज्ज्ञानसामानाधि
करण्यासत्वात् प्रथमसमानाधिकरणपदोपादानेतादृशानुव्यवसायस्याजन्यांतेनोपादानसंभ
वः तदनुपादानेतादृशानुव्यवसायस्य स्वग्राह्यप्रामाण्याश्रयविषयकेणान्यपुरुषीयज्ञानेन
भगवज्ज्ञानेन च जनितत्वान्न तदुपादानसंभवइति प्रथमसमानाधिकरणपदोपादानं एवं प्रा

एषधर्मत्वादिप्रकारकतद्वद्विशेष्यकज्ञानीयप्रामाण्यस्यपत्रपक्षतातत्रतादृशज्ञानानुव्यव
सायस्यप्रामाण्यधर्मत्वादिप्रकारकत्वावगाहिनोन्यायमतेपिप्रामाण्यग्राहकतयोस्वग्राह्यप्रा
माण्यविषयकेश्वरज्ञानजन्यतमाप्रथमसमानाधिकरणतानुपादानेनसंग्रहःस्यादितितत्सं
ग्रहायापितदुपादानंद्वितीयसमानाधिकरणांतव्यावृत्तिःपूर्ववदेवमिश्रमतेजन्यभिन्नत्वा
निवेशेपिनक्षतिःतन्मतेस्वप्रतियोगिग्राह्यप्रामाण्याश्रयविषयकज्ञानप्रागभावप्रयुक्तय
द्यत्स्वंतदन्यप्रागभावप्रतियोगिज्ञानविषयत्वस्यैवविवक्षणीयत्वात्तेनैकविवक्षयायोगि
ज्ञानव्यावृत्तिंस्पष्टयति योगिप्रत्यक्षंचेतियोगजधर्माधीनंप्रत्यक्षमित्यर्थःज्ञानभिन्नत्वेना
त्मननजन्यमितियद्यपितादृशमननस्यनिदिध्यासनद्वारासार्वज्ञ्यसंपादकधर्मविशेषहेतु
तयायोगजधर्मजन्यप्रत्यक्षप्रयोजकत्वमेवननुजनकत्वंतथापिजन्यपदस्यप्रयोज्यपरत्वा

गदा०
८२

न्नासंगतिःसाध्येपिअजन्यत्वेनेनाऽप्रयोज्यतायास्वविवक्षणीयत्वात्अतएवमिश्रोक्तनिदिध्यासनमुपे
क्ष्यमननमेवतन्मूलभूतमुपात्तंनिदिध्यासनस्यापिजनकतायाअप्रामाणिकत्वात्प्रयोज्यत्वघटितसा
ध्यस्यावश्यविवक्षिततत्वेनिदिध्यासनमूलभूतमननप्रयोज्यतयापितद्वारणासंभवतीत्याशयात्आ
त्मनोनित्यत्वादिबोधकवाक्याजन्यत्वादिसामान्यधर्मावच्छिन्नभिन्नतयैवात्मनःश्रवणमस्तितुने
ज्ञानत्वादिरूपविशेषधर्मावच्छिन्नभिन्नतयातादृशधर्मावच्छिन्नबोधकागमाश्रुतेरित्याशये
ननतदुपेक्षितंश्रवणोज्ञानभानानियमात्ज्ञानविषयकज्ञानापेक्षायामेवविषयीभूतज्ञानस्य
ग्राह्यत्वयत्किंचित्प्रामाण्यापश्रयतयासिद्धसाधनवारणासंभवात्ज्ञानत्वावच्छिन्नभिन्नत्वेना
त्ममननंचावश्यकंविज्ञानवादिसमुत्थापितज्ञानाभेदवासनानिवर्त्तकतद्दृढसाक्षात्कारनि एम०
र्वाहकतर्कोचरज्ञानधारामूलभूतज्ञानभेदवासनाबीजत्वात्ज्ञानत्वावच्छिन्नभिन्नत्वे ८२

नात्मनोनुमितौभेदप्रतियोगितयासकलज्ञानभानेबाधकाभावःसामान्यलक्षणाप्रत्यासत्त्याअनुमि
तिजनकसकलसाध्यप्रसिद्धौसकलतज्ज्ञानात्तविशेषाभावकूटस्यसामान्याभावत्वसंमतेसामान्यभा
वभानेसकलप्रतियोगिभानमावश्यकमेवसामान्यधर्मविशेषितस्वस्वप्रतियोगिप्रकारेणैवतत
त्तदभावानांभानात् अन्यथाभ्रमत्वापत्तेरेवंचप्रकृतप्रामाण्याश्रयमात्रनिवेशेपियोगिप्रत्यक्ष
वारणसंभवइत्याशयेनाहवस्तुतइति अत्रैवसमाधानेस्यनिर्भरः अनागतेति अनागतत्वंग्राह
कज्ञानाधिकरणकालापेक्षयाविचारकालापेक्षयैववाग्राह्यं अन्यथाजन्यमात्रस्यैवकिंचित्का
लापेक्षयाअनागतत्वेनप्रामाण्यग्राहकत्वेनाभिमतानामनुव्यवसायादीनामनागतव्यवसाया
दिविषयकत्वेननित्यमात्रविषयकज्ञानस्यैवानागताविषयकतयाबाधापत्तेः नन्वेवंयोगिज्ञान
स्यैवपरमेश्वरज्ञानस्याप्यनागतविषयकत्वेनवारणात्तत्रंतिप्रज्ञानस्यैवानागताविषयकतया

नाधापत्तेः नन्वेवं योगिज्ञानस्येव परमेश्वरज्ञानस्याप्यनागतविषयकत्वेन वारणात् अंतिमज्ञानेतज्ञान
स्यामानाधिकरण्यविशेषणमनुपयुक्तमित्याशंकातत्परित्यजति नोपादेयं चेति नन्वनागताविषय
कत्वेनांतिमज्ञानविशेषणेऽनागतत्वप्रागभावासमानकालीनत्वादिप्रकारकज्ञाने प्रामाण्य
वाधः तादृशप्रामाण्यग्रहस्य तद्घटकानागतविषयकत्वनियमादित्यत आह अनागतेति अना
गतविषयकज्ञानमात्रस्य प्रामाण्यं पक्षाद्बहिर्भावनीयमित्यर्थः घटत्ववतीत्यादिप्रामाण्यस्या
नागतघटादिघटितत्वेपि अतीतादिघटमात्रविषयकानुव्यवसायादिनापि ग्रहात्साध्यसत्वेन
न पक्षवहिर्भावः यदि च विशेष्यव्यक्तिभेदेन घटत्ववतीत्यादिकं प्रामाण्यमपि भिद्यते एव
तद्घटितत्वात् तथा चानागतघटादिव्यक्तिघटितस्य तस्यानागताविषयकज्ञानाऽग्राह्यत्वे राम०
निवाधो दुष्परिहर एवेति मन्यते तदा तत्कालीनविचारे तदनंतरोत्पत्स्यमानघटादिव्यक्तिघटि ८३

न घटत्ववतीत्यादिक पक्षादुद्धिर्भावनीयमेवग्राहकज्ञानापेक्षया अनागतत्वनिवेशे अनागतघ
टादिघटिततादृशप्रामाण्यमपि तादृशघटादिपूर्वकालेतरकालीनतज्ज्ञानानुव्यवसायादिना
स्वापेक्षया अनागतघटादिव्यक्त्यंतरमनवगाहमानेन गृह्यत इति तत्र साध्यसत्वेन तस्य पक्षां
तर्भावोपि सिद्धं भवति यादृशघटादिव्यक्तिपूर्वकालीनेनैवानुव्यवसायादिना यद्व्यक्तिघटितप्रा
माण्यं विषयीक्रियते तादृशव्यक्तेः प्रामाणिकत्वेन तद्व्यक्तिघटितमेव तत्पक्षादुद्धिर्भावनीयमिति
बोध्यं नन्वेवं घटभिन्नत्वादिसामान्यजज्ञानस्यानागतताविषयकत्वविशेषणेनैव वारणे पूर्वोक्तप्रका
रतानिवेशे व्यावृत्त्यसंगतिरिमतत्त्राह पूर्ववर्त्तित्वादीति तेनाऽनागताविषयकत्वविशेषणेनानवार्यत इति
तथा च तादृशज्ञानविषयतावायकत्वेनैव प्रकारताविवक्षणस्यावश्यकतेति भावः तज्ज्ञानपिन्नेति प्रकृ
तप्रामाण्याश्रयभिन्नेत्यर्थः प्रतियोगिकोटौ ज्ञानत्वप्रवेशे वैयर्थ्यात् अनुयोगिनि ज्ञानत्वविशेषणम

गदा० ८५ 85

प्रसिद्धिवरस्कंसविषयमात्रस्यैवज्ञानादिभिन्नविषयत्वात् तत् अंतिमसत्तातं अनेनापिविशेषणेनविश्व
विषयकस्ययोगिज्ञानस्यैवभावज्ञानस्यापिवारणात् तत्रसामानाधिकरण्यविशेषणमेतत्कल्पेयमनु
पादेयं एवंचप्रकारतापर्यंतस्याग्रात्यतानूपत्वविरहेपिननिषेधाप्रसिद्धिरित्याह इत्थंचेतिज्ञानांतरे
तज्ज्ञानभिन्नेस्तुलक्ष्म इति तज्ज्ञानभिन्नज्ञानस्यतज्ज्ञानभिन्नज्ञानाविषयकज्ञानविषयत्वासंभवादि
तिभावः एतत्कल्पेपूर्वकल्पेचज्ञानत्वादिप्रकारकज्ञानानुव्यवसायस्यसामान्यलक्षणयायाव
ज्ज्ञानविषयकत्वेबाधकाभावान्न्यायमतेप्रकृतप्रामाण्याश्रयभिन्नज्ञानाविषयकत्वेनानागता
विषयकत्वेनचतादृशज्ञानीयप्रामाण्येपरतस्त्वसाधनेसिद्धसाधनात्तस्ययक्षवहिर्भावावश्या-
कत्वेसामान्यतोज्ञानविषयकज्ञानाजन्यत्वनिवेशएवसंभवनितादृशज्ञानजन्यतयानैयायि राम० ८५
कसिद्धभिन्नत्वस्यावश्यकतयाभट्टमतपरिग्रहस्यापिसंभवादित्यस्वरसः तच्चाश्रयगर्भमिति

तथाच प्रामाण्याश्रयज्ञानस्य प्रामाण्यघटकतया तद्विषयकज्ञानजन्यतयैव योगजधर्मजन्यप्रामाण्यप्रत्य
क्षवारणं संभवतीति भावः आश्रयघटितत्वेपि योगिनां तत्तज्ज्ञाने कथमाश्रयज्ञानापेक्षेत्याशंकायामा
ह नचेति नैयायिकानामिव स्वतस्त्ववादिनां मीमांसकानां विशिष्टबुद्धौ विशेषणज्ञानहेतुता
नंगीकारात् प्रामाण्यघटकतदाश्रयज्ञानस्य पूर्वमसत्वेपि प्रथमानुव्यवसायादिना तन्मते प्रामाण्य
ग्रहसंभवात्तद्बाध इति दर्शितं ननु योगिज्ञाने विशेषणधियो हेतुत्वे लौकिकसंन्निकर्षवत् योगजधर्मस्या
पि निर्विकल्पकजनकत्वोपगमः स्यादित्यनिष्टापत्तिमाह योगजधर्मस्येति सार्वज्ञसंपादकमिति
स्वरूपतो घटत्वादिप्रकारकस्य सघटोनवेत्यादिसंशयनिवर्त्तकस्य सघटइत्याद्याकारकनिखि
लधर्मिज्ञानस्य संपादकमित्यर्थः स्वरूपतो घटत्वादिप्रकारकबुद्धौ स्वरूपतस्तदवगाहिज्ञानस्य हे
तुतापाः सामान्यलक्षणाया सार्वज्ञस्य वारणाय अवश्यवक्तव्यतया निर्विकल्पकं विना तादृशज्ञाना

संभवादितिभावः नचविशिष्टबुद्धिंप्रतिविशेषणाधियोहेतुत्वेपिप्रामाण्यघटकविशेषणानांज्ञानस
त्वेज्ञानस्याज्ञातस्यापिसंसर्गतयाभानेबाधकाभावःसंसर्गस्याप्रकारत्वादितिकथंयोगिज्ञानेवार
णीयमितिवाच्यं विशिष्टविशेषणकज्ञानेविशिष्टस्यैवविशेषणस्यधियोहेतुतयाविशिष्टप्रा
माण्यप्रकारकज्ञानेविशिष्टप्रामाण्यज्ञानहेतुतायाआवश्यकत्वेनविशिष्टप्रामाण्यज्ञानस्य
तद्घटकाश्रयविषयकत्वनियमेनविशिष्टप्रामाण्यप्रकारकबुद्धेस्तदाश्रयज्ञानाजन्यत्वासंभ
वात् तद्धितित्प्रकारकत्वसामानाधिकरण्यविशिष्टमेववाज्ञानत्वंपक्षस्तज्ज्ञानेचसामाना
धिकरण्यघटकस्याश्रयस्यप्रकारतानियमात्तज्ज्ञानापेक्षानिष्प्रत्यूहैव ननुसर्वज्ञानंगुणाद्
सादिज्ञानीयसर्वविशेष्यताद्यवगितप्रामाण्यंसर्वविषयकव्यवसायाधीनेनैवानुव्यवसायेन
मिश्रमतेगृह्यतेतथाचतन्मतेतत्रबाधः तादृशव्यवसायस्यतादृशप्रामाण्याश्रयविषयकत्व

नियमादित्यत आह यद्विवेति विनाश्रयग्रहं दुर्ग्रहमिति आश्रयस्यैव नियमत आश्रयग्रहरूपत्वादिति
भावः अत्र च ज्ञानमित्याद्याकारकज्ञानस्यैव सर्वज्ञानमित्याकारकस्यापि सर्वज्ञानविषयकत्वानियमः न
च पर्याप्तिसंबंधेन सर्वत्वप्रकारकस्य सर्वत्वपर्याप्त्यधिकरणाविषयकत्वेन प्रमात्वमेव न निर्वहतीति
तादृशप्रमायाः सर्वज्ञानविषयकत्वनियम इति वाच्यं समुदायस्य पर्याप्त्यनुयोगित्वे तदंतःपातिन
एकद्व्यादेरपि तदावश्यकत्वात् तन्मात्रविषयकसर्वत्वज्ञानस्यापि प्रमात्वस्य दुर्निवारत्वात् एकोपं
द्वावित्यादिबुद्धेरप्रमात्वस्य कथंचिदुपपादनीयत्वात् तथा च सर्वत्वप्रकारकज्ञानाविषयकस्या
पि सर्वज्ञानमिति प्रमात्मकज्ञानस्य संभवात्तदनुव्यवसायस्य दर्शितप्रामाण्याश्रयज्ञानविषयक
त्वानाजन्यत्वसंभवतीत्यालोच्य यद्विवेत्युक्तं अत्रापि तद्वितितत्प्रकारकत्वमात्रप्रवृत्त्युपयुक्तं न तु तद्वि
शिष्टज्ञानत्वपर्यंतं इत्थं च विशिष्टस्य तत्त्वसाधने तद्वितितत्प्रकारकत्वे सत तत्त्वासिद्धौ वापि विशिष्टस्य

गदा० ८६
86

परतस्त्वसाधनेनतद्व्युत्तिनत्प्रकारकत्वेपरतस्त्वसिद्धिरितितन्मात्रस्यपक्षत्वमुचितंनविशिष्टस्येत्यस्वरसः
उक्तिभंग्याउक्तमिति नैयायिकसिद्धप्रामाण्यग्राहकानुमित्यादेः प्रापश्चाःस्तदाश्रयविषयकज्ञानज
न्यत्वादितिभावः एवंचयोगिज्ञानादेः प्रामाण्यग्राहकतयानैयायिकसिद्धतयातद्भिन्नत्वाभावेनसिद्ध
साधनोद्धारः अथैवमुक्तायास्त ज्ञानेनिषेधप्रसिद्धेरनवकाशंनैयायिकमतेयादृशज्ञानेनप्रामाण्यं
नावगाह्यतेतादृशेपिप्रत्यक्षादौप्रामाण्याश्रयज्ञानस्योपस्थितस्यप्रकारत्वादित्याशंक्यान्यत्रनिषे
धप्रसिद्धिंदर्शयति निषेधेति प्रामाण्यत्वेतिप्रामाण्यत्वस्यप्रमेतराद्वृत्तित्वादिघटितस्यप्रामाण्यविषय
कज्ञानेनैवावगाहनात् तत्रन्यायमतसिद्धप्रामाण्यविषयताकान्यज्ञानविषयत्वाभावस्यसुलभत्वादि
तिभावः नैयायिकेसिद्धप्रामाण्यग्राहकभिन्नप्रथमानुव्यवसायादिनामीमांसकमतेप्रामाण्यत्ववि
शिष्टप्रामाण्यावगाहनेनप्रामाण्यत्वेनमतद्वयेसाध्यप्रसिद्धिरितिनशंकनीयं तद्बुद्धिशेषोष्यकत्वाव

गम० ८६

च्छिन्नत्वतन्निरूपितत्वसहितप्रकारिताख्यरूपात्वं उभयधर्मेत्यप्रामाण्यत्वस्यैव मीमांसकमते अनुव्यवसा
यादिनाग्रहात् ननु प्रमेतरावृत्तित्वादिघटितस्यतस्यैव च प्रकृते विवक्षितत्वात्तस्यष्टतार्थस्यत्वांत
रं दर्शयति प्रामाण्याभाववत्त्वेति अत्र च विशिष्टप्रामाण्यविषयकान्यज्ञाने प्रामाण्यत्वप्रामाण्याभा
वत्त्वादिघटकविशेष्यस्य विषयतयाविशिष्टपि विशेष्ये तदभावस्य न प्रसिद्धिसंभव इत्यस्वरसः द्वितीय
त्वतीयविप्रतिपत्ती इति न त्वेकदेति तथा च मतत्रयसाधारणविधिकोटिप्रयासोव्यर्थ इति भावः न
न्वत्र यावत्त्वदाभावात्मा माण्याश्रयप्रामाण्यानुमित्यादिग्रास्यतयासिद्धसाधनयावत्त्वे निवेशेप्रा
माण्याभान विरोधिदोषादिसमवहितस्वाश्रयेण ग्रहाद्बाध इत्यत आह शीतिनुक्तेवेति पूर्ववदेव
कारवलादेव सामग्र्यां यावत्त्वलाभः प्रामाण्यग्रहप्रतिबंधकासमवहितत्वविवक्षया च बाधः परि
हरणीय इत्यर्थः मिश्रमते भट्टमते विप्रतिपत्तेरप्रदर्शने मूलस्य न्यूनतास्यादितीति शब्दस्यैव तत्त्व

दर्शकतामाहइति अनेनप्रकारेणेति विशिष्टमिश्रादिमतेविप्रतिपत्तिंस्वयंदर्शयति मिश्रेति स्वाश्रया
नुव्यवसायेनेतियावद्यनवेत्यग्रिमेणान्वयः स्वाश्रयविषयकलौकिकप्रत्यक्षविषयोनवेत्यर्थः उपनीतभाना
दिविषयत्वेनसिद्धसाधनवारणायलौकिकप्रत्यक्षपर्यंतनिवेशः प्रमाविषयोघटइत्याद्युपनीतभानस्या
पिघटाद्यंशेलौकिकत्वात्स्वाश्रयोपादानंतथासति स्वाश्रयांशेलौकिकत्वविवक्षयातद्वारणंबोध्यं
नचैवमपिस्वाश्रयांशेलौकिकप्रामाण्योपनीतभानमादायसिद्धसाधनंदुर्वारमेवेतिवाच्यं एतदस्व
रसेनैवद्वितीयकल्पानुसरणात् अथवास्वाश्रयानुव्यवसायग्राह्यत्वंत्तानविषयत्वाप्रयोज्यमानसप्र
कारताश्रयत्वंप्रामाण्यांशेउपनीतभानीयतदीयविषयताउपनायकत्त्वानविषयताप्रयोज्यैवेतिनोक्तसि
द्धसाधनंअभिधेयत्वादिसामान्यलक्षणाजन्यप्रत्यक्षविषयत्वेनसिद्धसाधनवारणायप्रकारतानि
वेशः अभिधेयत्वादिनावस्त्वंतरविषयकपरामर्शादिजन्यतद्रूपावच्छिन्नानुमित्यादिप्रकारतया

तन्मतेऽर्थांतरवारणाय प्रमानसप्रवेशः अनुपस्थितं प्रामाण्यं घटत्वप्रकारितात्वादिनापि न्यायमतेनानु
व्यवसाये प्रकारः अतो न निषेधसाधने बाधः योगजज्ञानीयप्रकारतापि विशेष्यताज्ञानविषयताप्रयोज्ये
वेति न तया सिद्धसाधनं तादृशप्रकारताऽभावत्वप्रतियोगित्वादौ न्यायमते प्रसिद्ध्यति तस्यानुपा
स्थितस्यैव प्रकारतापाः सिद्धं न सिद्धत्वात् तादृशप्रकारताविरहाश्च घटादावेव सुलभः प्रामाण्य
ज्ञानजन्यप्रत्यक्षप्रकारत्वविवक्षा तु न साधु परमते तदभावाप्रसिद्धेः नच प्रामाण्यस्वपदेनोपादे
यं तथा च गुरुत्वादि प्रामाण्यादिज्ञानाजन्यप्रत्यक्षप्रकारत्वाभावस्य गुरुत्वादौ प्रसिद्धत्वमसामंजस्य
मिति वाच्यं एकस्वपदार्थघटितविधिकोटेः परतद्घटिताभावेन सहाविरोधात् न वा विरुद्धकोटि
कोपि संशयः संभवति नच स्वविषयकज्ञानाजन्यप्रत्यक्षप्रकारत्वाभाववद्घटत्वं तद्भेदकूटत्वरूपं
स्वतस्त्वं परैः साधनीयं तादृशास्तत्वरूपं तादृशभेदकूटाभावरूपं वा परतस्त्वं चास्माभिस्तत्र चेनानु

पपत्तिरितिवाच्यं तादृशस्वपदेनप्रामाण्यमुपादायतद्भेदसाधनेबाधात् परमतेप्रामाण्यस्यस्वपदेनोपादाने
नासंभवाच्च अप्रामाण्याद्विमात्रोपादानेचसिद्धसाधनात् यत्तुत्वाश्रयघटितसन्निकर्षप्रयोज्यविषयता
श्रयत्वं त्वाश्रयानुव्यवसायग्राह्यत्वंतदसत् न्यायमतेपिघटत्वप्रकारिकात्वादिनाप्रामाण्यस्यलौकिक
सन्निकर्षाधीनभानविषयतयानिषेधसाधनेबाधादित्यलंपल्लवेन यावद्भिर्वर्तिरिति प्रामाण्यभा
नप्रतिबंधकसमवधानानंतरक्षणानुत्पन्नत्वाश्रयलौकिकप्रत्यक्षैर्यावद्भिर्ग्राह्यंनवेत्यर्थः उपदर्शितरी
त्यासिद्धसाधनस्यवारणाययावत्पदं प्रामाण्याविषयकज्ञानोपनीतभानाग्राह्यतयाबाधवारणायलौकिकत्व
निवेशनं शेषंपूर्ववदितिप्रामाण्यभानप्रतिबंधकसमवधानानंतरक्षणानुत्पन्नत्वंनिवेश्याप्रामाण्यभ्रमा
णभ्रमात्मकानुव्यवसायाग्राह्यत्वेनबाधोवारणीयइत्यर्थः प्रामाण्याविषयकत्वेनेतिप्रामाण्याविषयक
त्वेनभट्टमतसिद्धयावद्ग्राह्यत्वस्यसाध्यत्वेज्ञाततालिंगकानुमितेनैयायिकसिद्धतयातन्मतसिद्धप्रामा

ण्यग्राहकमेवतन्मतेयावद्दंतर्गतंतथाचयावत्तद्व्याप्यत्वाभावसाधनेबाधइत्यभावद्वयगर्भतानतदुपादानेभट्टमता
सिद्धानुव्यवसायस्ययावदंतर्गततयानाभावसाधनेबाधः यद्यपिप्रामाण्यविषयकानुमितित्वेनभट्टमतसि
द्धोन्यायमतेऽनुव्यवसायोपीतिनिषेधद्वयानुपादानेपिसामंजस्यं तथापिव्यवसायसन्निहितज्ञानग्रह
माण्यविषयकत्वनुमितित्वधर्मरूपतानभट्टाभ्युपगम्यापितुउभयसिद्धकालांतरीणानुमितौव्यवसायसन्नि
हितत्वम्प्रमारूपनैवेत्यस्यापिसंभवान्नर्थसतिवानुव्यवसायस्योक्तरूपेणापिभट्टाभ्युपगतत्वासंभव
इत्याशयेननिषेधद्वयनिवेशनंज्ञानत्वेतिज्ञानत्वघटितप्रामाण्यमेवप्रामाण्याविषयकेतिप्रामाण्यप
देनविवक्षितमित्याशयेनयाथार्थ्यमात्रविवक्षानुसारेणप्रामाण्यघटकघटत्वादिपरमादिपदं वस्तु
मात्रस्यैवप्रामाण्यघटकतयातदितिविशेषणं नचैवमपिमेयत्वादिमतीत्यादिप्रामाण्यंयत्रप्रकृ
तंतत्रतदघटकाप्रसिद्धिरितिवाच्यं तादृशप्रामाण्यघटकविशेष्यमेयव्यक्तीनांभेदेनतस्यापिभिन्न

गदा०
८९
89

तयाप्रत्येकं तद्घटकस्य तत्प्रामाण्यविषयकयावद्विषयत्वाभावस्य च प्रसिद्धेः ननु योगिज्ञानादिद्वित्वे घटत्व
वतीत्यादिप्रामाण्यस्य तद्विषयकज्ञानान्तरेऽपि सत्वात्तत्पावत्त्वाश्रयग्रस्तत्वमिति सिद्धसाधनाप्रसक्त्या
यत्वित्यादिमूलासंगतिः न च सर्वविषयकयोगिज्ञानादिमात्रविषयतदंकुरत्वादिरूपप्रकारघटितप्रामा
ण्यसिद्धसाधनवारणाय रतयात्तत्संगतिरिति वाच्यं प्रामाण्यत्वस्य सर्वप्रामाण्यसाधारणस्यैकस्याभावा
द्घटत्ववति घटत्वप्रकारकत्वत्वादेरेव पक्षतावच्छेदकत्वाद्योगधर्माद्यजन्यत्वविशेषणस्याव्यावर्त्तक
त्वादित्याशंक्य ज्ञानव्यक्तिभेदेन प्रामाण्यभेद इति मतमालंब्य तत्संगमयति नन्वित्यादिना प्रतिज्ञानं भि
न्नत्वादिति विशेषिताप्रकारितयोः स्वरूपसंबंधात्मकत्वेन तज्ज्ञानस्वरूपत्वादिति भावः ईश्वरज्ञानद्व
त्तिप्रामाण्यपत द्भ्रान्त्यंशतः सिद्धसाधनं योगजधर्माद्यजन्यत्वस्य ज्ञानविशेषणतयापि दुर्वारमतो जन्य
त्वरूपविशेषणान्तरमपि प्रक्षिपति जन्येति चेति पक्षसंकोचं विना साध्यघटकस्वाश्रयेत्युक्तविशेषणा

राम०
८९

तथापि दुर्वारमनोजन्यत्वरूपविशेषणांतरमपि दूषयति अन्यथेति चेति पक्षसंकोचं विना साध्यघटकस्वाश्र
यत्वोक्तविशेषणप्रवेशे योगिज्ञानादिवृत्तिप्रामाण्यस्य तादृशविशेषणाक्रांतस्वाश्रयाप्रसिद्ध्या साध्याप्र
सिद्धिरिति मूलस्य विशेषणपरस्य पक्षप्रविष्टज्ञानविशेषणपरत्वं स्पष्टयति पक्षविशेषणमिति प्रा
माण्यमात्रेति ग्रंथस्य परकीयासिद्धसाधनप्रसक्तिदूषणपरत्वं न सम्यक् सामानाधिकरण्यमात्रेण
साध्यसाधनोद्देश्यतयापि तत्प्रसक्तेः तत्पक्षावलंबनेनैव विशेषणदानसंगतेश्च स्वयमपि पक्षताव
च्छेदकैक्यांशतः सिद्धसाधनं दोष इति प्राचीनमतानुसारेण पक्षविशेषणस्यानेकत्वोपात्तत्वादित्यतः
पक्षविशेषणमनुपादाय स्वीयपूर्वपक्षसमाधानपरतया तं संगमयति स्वयमिति दूषणांसिद्धसाधन
रूपं ज्ञानव्यक्तिभेदभिन्नघटत्ववत्त्वादीनामननुगमेन पृथक्पृथक्पक्षत्वे पक्षतावच्छेदकैक्याभा
वादवच्छेदकावच्छेदेन साध्यसिद्ध्युद्देश्यतयापि न सिद्धसाधनपरीहारः संभवतीत्याशंकां निरस्यति

गदा०
९०
90

तद्वदिति अनुगतेनेति विशेषितादेर्ज्ञानादिस्वरूपत्वेपि अनुगतप्रतीतिनिर्वाहाय विशेषितात्वादीनाम
नुगतानामतिरिक्तानामवश्योपगंतव्यत्वादिति भावः पक्षत्वात् पक्षघटकत्वात् पक्षतावच्छेदकैक्येपि त
त्सामानाधिकरण्येन साध्यसिद्धौ एकदेशसिद्धिर्विरोधिन्येवेत्य तआह पक्षतावच्छेदकावच्छेदेनेति नां
शतः सिद्धसाधनं दोष इति शेषः ननु योगिज्ञानादिप्रामाण्यसाधारणरूपेण पक्षत्वे उक्तरीत्यांश
तः सिद्धसाधनस्यादोषत्वेपि निषेधसाधने तत्रांशतो बाधात्तदनुपपत्तिरित्यत आह निषेधेति नांशतो बा
धाद्दूषणमिति शेषः किंचिज्ज्ञानप्रामाण्यस्य परतस्त्वसिद्धौ यादृशकारणविरहात्तत्र स्वतस्त्वं नादृ
शकारणविरहादन्यत्रापि योगजधर्माद्यजन्यज्ञाने प्रामाण्यस्य न स्वतोग्रहणासंभव इति सामाना
धिकरण्यमात्रेण स्वतोग्राह्यत्वाभावसाधनेपि नैयायिकाभिमतसिद्धिरिति भावः मिश्राणां समानाका राम०
रकनानाज्ञानप्रामाण्यैक्येपि अंशतः सिद्धसाधनप्रसंगसंभवमन प्रकारमुपन्यस्यति केचित्त्विति स ९०

र्वेषां विशिष्योपादानासंभवादिति घटत्वपटत्वादिघटितानंतप्रामाण्यानां घटत्ववति घटत्वप्रकार
कत्वत्वादिना सर्वज्ञानासंभवेन सर्वत्रैकदा स्वतस्त्वादिसाधनासंभवादित्यर्थः ननु प्रमापदप्रवृत्ति
निमित्तत्वे न पक्षत्वेऽवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यतया स्वयमशक्तः सिद्धसाधनपरिहर
णस्यासंगतिः विशेष्यावृत्त्यप्रकारकत्वेतिरूपप्रामाण्यस्वतोग्राह्यत्वस्यांशतो बाधादित्याशंक्य तस्य
प्रमापदप्रवृत्तिनिमित्तत्वं निराकरोति तत्प्रवृत्तिनिमित्तं चेति मूल एवेति तत इति तत्प्रकारकत्वं तद्व
ति तद्वैशिष्ट्यज्ञानत्वं वा प्रामाण्यमित्यग्रिमचिंतामणिग्रंथ एवेत्यर्थः योगिज्ञानेन ज्ञानमिदं स
र्वविषयकमित्याकारकयोगिज्ञानादिनेत्यर्थः ग्रहणात् प्रामाण्यघटकसर्वनिर्गतत्वेन प्रकारत
याविषयीकरणात् ग्राह्यतायाः प्रकारतानूपत्वे सर्वत्ववति सर्वत्वप्रकारकत्वरूपप्रामाण्यस्य सर्व
मित्याकारकस्वाश्रयप्रावज्ञाना प्रकारतयान सिद्धसाधनप्रसक्तिरिति सर्वविषयकत्ववतीत्यादि प्रामा

गदा॰ ९१ णयानुसरणांशेऽन्नच साध्ये स्वपदेन विशिष्य घटत्ववतीत्यादिकमेवोपादेयं न तु प्रमापदप्रवृत्तिनिमित्तत्वेन·
तदाश्रययावद्व्यक्तित्वस्य क्वचिदपि प्रामाण्येऽसत्वात् तथा चैकदा सकलप्रामाण्यसाध्यसाधनासंभव
९१ एतन्मतेप्यविशिष्टः घटत्ववतीत्यादौ घटत्ववतीत्यादिप्रामाण्याश्रययावद्व्यक्तित्वासत्वेनांशतो बाध
श्च दुष्परिहरः यत्किंचित्त्वाश्रयात्र्त्वं प्रत्यक्षत्वं तद्रूदकूटस्य सर्वसाधारणानुगतस्य साध्यत्वे च तादृ
शस्वपदेन प्रामाण्यादिमात्रोपादाने सिद्धसाधनं प्रामाण्यस्याप्युपादाने वाधुरित्यादिकमस्वर
सवीजं न च स्वयमपि घटत्ववतीत्यादिप्रामाण्यस्य ज्ञानव्यक्तिभेदेन भेदमुपगम्यैवागजधर्मादिजन्य
त्वविशेषणेन परेषां सिद्धसाधनवारणस्य घटत्ववतीत्यादिप्रामाण्यस्यानुगतत्वमुपगम्य च पक्षता
वच्छेदकैक्यनिर्वाहे णामणिकाराणां तद्वारणस्य च संगमितत्वादुक्तानुपपत्तिस्तत्त्वेव साध्ये घ राम॰
टत्ववतीत्यादेरनुगतरूपेणानिवेशे तदाश्रययावद्व्यक्तित्वस्य प्रसेकं सर्वत्र प्रामाण्यव्यक्तौ बाध ९१

तन्नद्धक्किलत्वननिवेशेपिचांशतोबाधस्यदुष्परिहरत्वादितिवाच्यंस्वस्वृत्तित्वग्राह्यत्वोभयसंबंधेनज्ञानवत्वस्य
साध्यतयाबाधानवकाशात्तज्ज्ञानव्यक्तिभेदेनाभेदमभ्युपगच्छंतामिश्राणांमतेत्रक्कसाध्योपगमेपिकिं
चित्त्वाच्चाश्रयग्राह्यत्वतयासिद्धसाधनस्पष्टत्वारत्वात्तच्छे ननुविशिष्टज्ञानत्वबाप्रामाण्यापत्तेस्तस्यनतेनैवन
चानुव्यवसायेनेत्यादिमूलमसंगतंविशिष्टज्ञानत्वस्यसप्रकारकज्ञानत्वरूपस्यवैशिष्ट्यविषयक
ज्ञानत्वरूपस्यवाज्ञानग्राहकसामग्र्याग्रहेबाधकाभावात्पुरोवर्त्तिनिघटत्वप्रकारकत्वादेन्यायम
तेप्यनुव्यवसायेनग्रहणादित्याशंकांनिरस्यतितुविशिष्टज्ञानत्वस्याचष्टेविशिष्टज्ञानत्वमिति तत्रेति
दृशिष्टज्ञानत्वमित्यर्थः अगृहीतासंसर्गेति तत्रधर्मिणिअगृहीतोऽगृह्यमाणोऽसंसर्गोयस्यधर्म
स्यतद्धर्मिविषयकत्वेसतितद्धर्मविषयकज्ञानत्वमित्यर्थः नायंघटइति यथार्थज्ञानस्यपटादि
रूपधर्मिणिघटत्वादिविशिष्टबुद्धित्ववारणायासंसर्गाग्रहनिवेशः धर्मधर्मिभ्यांप्रत्येकमन्वित

स्वविषयताद्वयस्य पृथक्पृथग्ज्ञानयोरप्यन्वयः संभवति तथा सति ज्ञानद्वयमपि धर्मधर्मिगोचरज्ञानेनत्यने
न लभ्यते अत एकपदं धर्मधर्मिविषयकत्वयोः सामानाधिकरण्यलाभसंपादकस्य एकस्मिन् ज्ञाने उभ
यान्वयतात्पर्यस्य लाभाय प्राक्पदेनानुपस्थितिपदस्य समासे यटानधिकरणमित्यादौ घटाधिक
रणाभेदादिवत्पूर्वकालीनोपस्थितेर्विरहः प्रत्येतुं शक्यते सचन विवक्षितः किंतूपस्थितिप्रकार
णाभावे पूर्वकालीनत्वमेव तादृशस्यैव कारणाभावस्योत्तरकालिकाप्रमाभावनिर्वाहकत्वादतो
ऽसमासं स्फुटयति प्राक्पूर्वमिति विशेषणस्य प्रागनुपस्थितौ तद्दृशिष्यस्य ज्ञातुमशक्यत्वादि
ति मूलकृतोभिधानं विशेषणज्ञानहेतुतानंगीकर्तृमीमांसकमतेन प्रामाण्यस्य स्वतोग्रहद्वषणा
क्षमम् इत्युपस्थितिपदं न्यायमते यथाश्रुतार्थकं तन्मापरमते तत्सामग्रीपरतया व्याकुर्वते अनुपस्थि
ताविति तस्य प्रथमं दुर्निरूपत्वादिति मूले तत्पदस्य प्रमाजन्यज्ञाततानिष्ठवैजात्यपरत्वे ज्ञाततात्वस्य

वतद्याप्यवैजात्यस्यापि प्रथमं प्रत्यक्षेणानुग्रहतयादुर्निरूपत्वादित्यसंगतं प्रमाहितत्वपरत्वे प्रमात्व
घटितत्वयातस्य प्रथमं दुर्निरूपत्वाभिधानोपपन्नावयितस्य प्रथमं स्वग्रहत्वाप्रसक्त्यात स्य स्वग्रह
त्व इत्यर्थकस्याग्रिमस्यान्यथेत्यस्यासंगतिरतो विशेषवितर्क्याभयं संगमयति प्रमाहितत्वमेवेत्या
दिना विशेषः प्रमात्वविशिष्टानुमापकतावच्छेदकोऽप्रमाहितज्ञाततात्याव्रतोधर्मः प्रमात्वविशि
ष्टानुमापकतावच्छेदकवैजात्यरूपविशेषस्य स्वग्रहत्वस्यान्यथेत्येतदर्थस्याप्रमाहितज्ञातत
याऽप्रमात्वस्य स्वतोग्रहानापादकतयाऽन्यथेत्याघसंगतिमाशंक्य प्रमाजन्यतावच्छेदकजा
तिविशेषस्वीकारस्य तुल्ययुक्त्याऽप्रमाण्यस्य स्वतोग्रहप्रसंजकत्वं वर्णयति प्रमेयेति एवं वा प्रमाजन्य
तावच्छेदकमिव प्रमाजन्यतावच्छेदकमपि ज्ञाततानिष्ठं वैजात्यमनुपलंभबाधितमिति मूलाशयः घटत्वा
दिविशिष्टस्य तत्तत्समवायरूपत्वे तदवगाहित्वघटितं प्रामाण्यं न गुरुमतद्वयोरभिमतमिति एवं वक्ष्य

गदा०
९३
93

माणातयोवैशिष्ट्यंव्याचष्टे वैशिष्ट्यमितिधर्मधर्मिभावोधर्मत्वंधर्मित्वंचतच्चतयोरपिविशिष्टबुद्धिविष
यतयानुमतमितिनसमवायपक्षवक्ष्यमाणदोषावसरइतिभावः तस्यासमवायस्यअनभ्युपगमादि
त्यनेनान्वयः तदैंद्रियकत्वस्यानभ्युपगमादिति तथाचतदवगाहित्वंप्रत्यक्षप्रमायामसंभवीतिभा
वः धर्मधर्मिभावश्चन्यायमतेपिएवंधप्रतियोगित्वानुयोगित्वरूपोविशिष्टबुद्धिविषयइत्यवधेयं विष
यनिरूप्यमहीत्यादिनाविषयग्राहाधीनतयाज्ञानसाक्षात्कारेविषयभानं व्यवस्थापिततावताज्ञात
तालिंगकानुमितौनविषयभानव्यवस्थितिः नवास्वप्रकाशरूपज्ञानप्रत्यक्षेतस्यविषयग्राहात्मक
स्याजन्यत्वेनतादृशयुक्तिविषयत्वाभावात् अतोमिश्रमतपरतयातद्व्याचष्टे अनुव्यवसायेति
विषयनिरूप्यमित्यत्रनिरूपणस्यज्ञानवित्तीत्यत्रवित्तेश्चज्ञानसामान्यरूपत्वेविषयग्रहाधीनज्ञान
विषयोज्ञानमित्यतोज्ञानज्ञानत्वव्यापकविषयताकोविषयइतिविषयेत्यादिमूलार्थः तथाचपद्य गदा०
९३

त्तिनिरूप्यंयोपज्ञानजनकज्ञानविषयःसतज्ज्ञानत्वव्यापकविषयताकइत्येवव्याप्तिर्मूलाभिप्रेतासाचनोपपद्य
तेवह्न्याद्यनुमितिजनकज्ञानविषयधूमादेर्वह्न्याद्यनुमितौशाब्दबोधजनकज्ञानेविषयाकांक्षादेश्चशा
ब्दबोधेभानानियमात् तदापयावज्ज्ञानजनकत्वनिवेशेचासिद्धिर्ज्ञानाद्यनुमित्यादौविषयज्ञानस्या
हेतुत्वादतोव्याचष्टेनिरूपणमिति तथाचयद्विषयकप्रत्यौकिकेप्रत्यक्षजनकज्ञानविषयोयः
सतद्विषयलौकिकप्रत्यक्षत्वव्यापकविषयताकइत्येवव्याप्तिलाभान्नदोषः घटाभावादिप्रत्यक्षेज
नकज्ञानविषयतत्प्रत्यक्षविषयघटादिरत्रदृष्टान्तः यावद्विषयनिरूप्यत्वासिद्धावपितिसंबंधिक
पदार्थप्रत्यक्षंप्रतिसंबंधितावच्छेदकविशिष्टज्ञानत्वेननसामान्यतोहेतुतापटादिज्ञानाद्घटाभा
वादिग्रहापत्तेःनापितत्तत्संबंधिकप्रापक्षेतत्तद्विषयकज्ञानत्वेनपटाभावत्वादिनाघटाभावा
द्यवगाहिप्रत्यक्षेव्यभिचारात् अपितुतत्तद्धर्मविशिष्टविशेषिततत्संबंधिकप्रत्यक्षेतत्तद्धर्मविशिष्ट

गदा० ९४ ९५

ज्ञानत्वेन तथा च घटत्वादिविशिष्टविषयकज्ञानानुव्यवसायस्य घटत्वादिविशिष्टवैशिष्ट्यावगाहित्वसि
द्धावेव तादृशप्रत्यक्षजनकतावच्छेदकविषयताकत्वरूपतादृशज्ञाननिरूपकत्वं तादृशज्ञानसाक्षात्का
रत्वव्यापकविषयिताकत्वसाधकलिंगं वैशिष्ट्यसिद्धमर्हतीति तत्रैव च विवादेन वैशिष्ट्यरूपविषयेत
दसिद्धावित्यर्थः प्रत्यासत्तिसत्वेपि कारणांतरविरहेण तद्धतो विषयस्याभानसंभवात् प्रकृते ज्ञान
प्रत्यासत्तिसत्व एव सकलतद्भासककारणसंभवाद्वैशिष्ट्यभानं दुर्वारमिति मूलभावमाविष्करो
ति सामग्रीतिन च तत्संसर्गकस्यापि ज्ञानस्य तदुपनायकत्वे तत्संसर्गकज्ञानान्नसंसर्गकमिव तत्प्रका
रकं तद्विशेष्यकं च ज्ञानं स्यादिति वाच्यं दृष्टत्वात् तस्य वैशिष्ट्यांशे तावतापि सामग्रीवलेनापि
समूहालंवनेति घटत्ववैशिष्ट्यं पुरोवर्त्तिविषयकं च ज्ञानमित्यादिवोधेत्यर्थः सिद्धमिति घटत्वा एम० ९४
दिविशिष्टघटादिविषयतापर्यंतस्योपनायकज्ञानजन्यतानवच्छेदकत्वादिति भावः घटत्वादि

नायत्किंचिद्घटादिमात्रविषयकज्ञानेघटत्वादेस्तद्विषयत्वनूपनत्संबंधितायाअतिरिक्तवृत्तितया
तत्संबंधितावच्छेदकत्वंनसंभवतीत्याशंकाज्ञानविषयतावच्छेदकत्वंप्रकारतानूपमतिप्रसक्तादाव
पिसंभवतीत्याह संबंधितेति व्यवसायनूपवर्त्तमानज्ञानमादायापिज्ञायमानेसंबंधिनीत्यादिनि
यमनिर्वाहान्नप्रकृतसिद्धिरित्यतोव्याचष्टे ज्ञायमानइति विषयीक्रियमाणइतिस्वेनससंबंधिक
विशेषणातेपेत्यादिः तेनव्यवसायविषयीकरणेनअयंघटोघटत्वप्रकारकंचज्ञानमितिसमूहालंब
नसिद्ध्याचनचरितार्थताअनुमित्यादावुक्तनियमाभावान्निरूपणंसाक्षात्कारइतिलौकिकेप्रत्य
क्षमित्यर्थः ईदृशनियमस्याप्रयोजकता निराकरणपरे अन्यथेत्यादिमूलेपुरोवर्त्तिनरजतंच
जानामीतितदाकारः स्यादितिनसंगच्छते तादृशप्रत्यक्षसंबंधितावच्छेदकरजतत्वादिनासंबंधि
नोभानादतस्तद्व्याचष्टे अन्यथेतिपुरोवर्त्तिरजतविषयतास्यादितिपुरोवर्त्तित्वरजतत्ववैशिष्ट्य

धर्मिज्ञानानां विशकलितानां ज्ञानत्रयस्य क्वादौ भानं स्यादित्यर्थः ननु रजतत्वविशिष्टपुरोवर्त्तिविषयेति न रजत
त्वेन पुरोवर्त्तिनं ज्ञानामीत्याकारकता प्रयोजकविशिष्टविषयतेत्यर्थः तदाकारे ज्ञाने धर्मिणि तत्तीयार्थ
रजतत्वादिवैशिष्ट्यस्यावश्यं भानादित्यभिमानः ननु ज्ञानादिप्रत्यक्षस्य विषयांशे निर्विकल्पकत्व
वारणाय धर्मितावच्छेदकीभूतेदंत्वादिप्रकारेणावविशेष्यभानमुपेयं न तु रजतत्वादिप्रकारेणापि र
जतत्वेनेदं ज्ञानामीति बुद्धौ ज्ञानांशे भासमानप्रकारितायाः एवं तत्तीयार्थत्वादिति रजतत्ववतीत्या
दिप्रामाण्यभानासिद्धिः न चेदंत्वादिरूपधर्मितावच्छेदकवैशिष्ट्यस्येव रजतत्वादिरूपप्रकारवैशि
ष्ट्यस्यापि विशेष्यितानिविशेषणानापन्नविषयांशे सामग्रीवलाद्भानेवाधकाभावः रजतत्वादेर्य
त्र धर्मितावच्छेदकता तत्र तथा तद्भानस्यावश्यकतया तत्स्थलीयविशेषणज्ञानादिघटितसामग्र्याः
प्रकृतेप्यविशिष्टत्वादिति वाच्यं तत्र तद्धर्मितावच्छेदककव्यवसायस्यापि हेतुतया तदभावादेवत

स्थलीयसामग्र्यभावात् नचतादृशव्यवसायस्यतथात्वेनहेतुत्वमप्रामाणिकंतद्धर्मावच्छिन्नविशेष्य
ताकस्यैवतादृशस्यापितद्धर्मप्रकारकज्ञानस्यतद्धर्मावच्छिन्नविशेष्यताकत्वेनप्रत्यक्षवारणायवि
शेष्यतासंबंधेनतत्प्रकारकत्वस्यैवतादात्म्यसंबंधेनतादृशव्यवसायस्यविशिष्यहेतुतायाःआ
वश्यकत्वात् तदवच्छिन्नविशेष्यताकत्वभानस्यलएवचतद्विशेष्यताकत्वभानोपगमेनतज्ज्ञा
नेपितादृशव्यवसायापेक्षणात् घटइत्यादिव्यवसायस्यघटत्वप्रकारकत्वेनैवभानमुपपद्यतेनतु
धर्मिविशेष्यताकत्वेनापीतिनतस्यविशेषणानवच्छिन्नधर्मिविषयताप्रसंगइत्युपदर्शितप्रा
माण्यभानयुक्तेरकिंचित्करतयास्वयविशेष्यिताविशेषणतयाइदंत्यादिनापिभासमानेधर्मिणि
रजतत्वादिवैशिष्ट्यस्यापिभानेयुक्त्यंतरमाह वस्तुतस्त्विति येनरूपेणायस्योपनयइतियेनरू
पेणयस्योपनायकज्ञानेभानमित्यर्थः उपनायकज्ञानपदंशेयःप्रकारइतियावत् तेनरूपेणो

वतस्योपनीतभानमितितत्स्योपनीतभानंतत्प्रकारकमेवेत्यर्थः तद्रूपंतदुपनीतभानेतदंशेप्रकारइति
यावत् तथाचायंघटइत्यादिज्ञानानुव्यवसायविशिष्यिताप्रतियोगितयाउपनयमर्यादयाभासमा
नेधर्मिणाघटत्वादेःप्रकारत्वमावश्यकमितिभावः उक्तनियमेयुक्तिमाह अतएवेति नचतत्रोप
स्थितजातित्वभानेबाधकाभावाज्जातिमन्नित्यवभानंप्रकृतेवव्यवसायविशेषरूपकारणाभावन्नूप
बाधकमुक्तमेवेतिवाच्यंजातित्वभानेपिजातिमान्गौरितिद्विविधविषयताशालिबोधोत्पत्त्यास्वरू
पतोगौरवात्त्वानुपस्थितिदशायांतादृशबोधानुत्पादएवकथितनियमोपष्टंभाभिधानात् नचतदा
तादृशबोधोत्पत्त्यावपिकथितनियमाभंगेनोपष्टंभासंगतिरेवफलीभूतज्ञानोपनीतवस्तुविषय
तायाउपनायकज्ञानविषयतावच्छेदकयावदवच्छिन्नत्वासत्वेनासंभवादितिवाच्यंयद्धर्मप्रकार
कपदीयविषयताशालिज्ञानाप्रयोज्यायाउपनीततद्विषयतायास्तद्धर्मप्रकारिकेतिनियमस्योपगंत

व्यत्वात् ईदृशश्च नियमस्तद्धर्मानवच्छिन्नतद्विषयताकोपनीतभाने तद्धर्मानवच्छिन्नतद्विषयताकज्ञा
नत्वेन हेतुतयोपपादनीयः नव स्वरूपतस्तत्प्रकारकबुद्धौ स्वरूपतस्तद्विशेषणावगाहिज्ञानस्य ल्ल
म हेतुतयैवोक्तातिप्रसंगवारणसंभवे उपनीतभानस्य लीयोक्तनियमनिर्वाहककारणताकल्पनम
युक्तमिति वाच्यं मीमांसकैर्विशिष्टबुद्धौ विशेषणज्ञानहेतुतानुपगमात् न च तथाप्युक्तकार्यकारणभावम
पेक्ष्य लाघवेनोपनीतभानस्थल एव स्वरूपतस्तद्विषयकोपनीतभाने स्वरूपतस्तद्विषयकज्ञानस्य
हेतुत्वकल्पनमुचितं ताचन प्रकृते तन्निर्वाह इति वाच्यं एतदभिप्रायेणैव सिद्धांते स्वतः प्रामाण्यग्रह
स्यावश्यं ग्रहणीयत्वात् तदानीमापाततो दर्शितनियमावलंबनेन स्वतस्तदग्रहस्य व्यवस्थापनात् अत
एवेदृशग्रंथस्य गुरुमतपरत्वाभावादिवात एवेत्यादिकमपीति तेन ग्रंथेन प्रमानुव्यवसायस्य शुक्त्यादौ
धर्मितारजतत्वादिवैशिष्ट्यावगाहितया अपि संभवेन रजतत्वादिनाभासमानधर्मिविशेष्यकत्वा

गदा०
९७
97

वच्छेदेनतत्प्रकारकत्वावगाहितायाउपपादितत्वात्तन्मिश्रमतएवचतत्संभवादितिभावः निरूप्यंहीत्यस्यग्रं
थस्यमतत्रयसाधारण्येविषयग्रहाधीनसाक्षात्कारकत्वरूपपूर्वोपदर्शितविषयनिरूप्यार्थकतानसंभव
तिगुरुमतेज्ञानप्रत्यक्षस्यव्यवसायरूपविषयग्रहरूपतयातज्जन्यत्वात्भट्टमतेज्ञानस्यातीन्द्रियत्वेन
तत्साक्षात्काराप्रसिद्धेरितिविषयाविषयकज्ञानाविषयत्वमेवविषयनिरूप्यत्वंमिश्रैर्व्याख्यातं तत्र
ज्ञानपदस्यज्ञानसामान्यार्थकतानसंभवति ज्ञानस्यस्वविषयाकशशशृंगादिज्ञानविषयत्वादितिज्ञानपदं
ज्ञानवर्त्तमानताधीनप्रकृतज्ञानविषयताकज्ञानपरंवाच्यंभट्टमतेविषयेपरोक्षज्ञानविषयताज्ञाततालिं
गकानुमितौज्ञानवर्त्तमानताधीनैवेतिव्युत्पादितं एवंचस्वविषयाविषयकतादृशज्ञानाप्रसिद्ध्यात
दविषयत्वरूपस्वविषयकतादृशज्ञानत्वव्यापकविषयविषयकताकत्वसाधकहेत्वप्रसिद्धिः स्व
विषयाविषयकज्ञानावृत्तिज्ञानवर्त्तमानताधीनस्वविषयताकत्वस्यहेतुत्वेतादृशस्वविषयताव्या

गम०
९७

पकत्वविषयविषयताकत्वसाध्यप्रसिध्येवक्तृतर्कस्यतयोक्तहेतुनानहनुमानमप्युक्तं भट्टमतेविषयोपहि
तज्ञानस्यज्ञाततालिंगकानुमितिविषयत्वसिद्धविनज्ञानविषयतायाज्ञानवर्तमानताधीनतासिद्ध्यात
दधीनविषयताघटितहेतोर्ज्ञानेप्रसिद्धिस्तत्साधकंचोक्तानुमानमेवेत्यन्योन्याश्रयश्चेतितादृशग्रंथम
न्यथाव्याचष्टे प्राकृतिकमितिसामग्रीविशेषस्वभावाद्विषयावगाहीत्यर्थः अन्यथाअनुव्यवसाया
दिरूपतयाविषयमविषयीकृत्यासंभवदितिविषयावगाहनं विनाअसंभवतज्ज्ञानविषयताकमि
त्यर्थः विषयाविषयकत्वप्रसंजितज्ञानाविषयकत्वाभावमितियावत्प्रकृतज्ञानेचविषयानुपहि
तज्ञानभानप्रयोजकसामग्र्यजन्यत्वेसतिविषयाविषयकत्वं ज्ञानविषयकत्वाभावोवायाद्दकं एवंच
विषयविषयकत्वसाधकतर्कप्रदर्शकंमूलमितिभावः असंभवदित्यंतं विषयनिरूप्यं हि ज्ञानमि
त्यस्यव्याख्याअनुव्यवसायत्वेनाभिमतेज्ञानेनैयायिकानामपिवैशिष्ट्यातिरिक्तविषयभानस्या

गदा० ९८
98

निर्विवादतयायुक्तिपुरःसरमपिज्ञानवित्तोविषयवेदनकथनंनप्राधान्येनतत्परमपितुतद्धर्मधर्मिविषयक
त्वस्यदृष्टांतीकरणीयतयातत्राविवादिलाभायैवतदभिधानमितिसूचयितुमतोज्ञानवित्तिवेद्योवि
षयइत्येतन्नोपवर्णितंभेदेसत्येवदृष्टांततेतिमूलोक्तधर्मधर्मिणोर्विषयांतरत्वेनाभिधानंभासक
सामग्र्यविशेषेणैवदृष्टांततोपपद्यतइतितदविशेषरूपंहेतुंपूरयति अविशेषादिति सामान्यतो
भासकसाम्यस्यहेतुत्वेनाभिधानेतद्विशेषाकांक्षायांव्यवसायेत्यादिग्रंथंयोजयति अविशेष
मिति। व्यवसायस्यज्ञानप्रत्यासत्तिविधयाविषयभासकतागुरुमतेनोपपद्यतइतितन्मतेनादृश्य
ग्रंथमन्यथाव्याख्यास्यमानोमिश्रमतेतादृशयथाश्रुतार्थपरतामाहमिश्रमतइति व्यवसायस्व
रूपजनपितव्येव्यवसायस्वरूपज्ञानार्थयाप्रत्यासत्तिःयोविषयभासकेश्चक्षुरादिलौकिकसन्नि राम० ९८
कर्षःतुल्यत्वात्साधारणत्वात्तदेवविवृणोतिघटेतिगुरुमतेसमवायस्यातीन्द्रियतयावैशिष्ट्यप

दंनतत्परंनातिरिक्तंवैशिष्ट्यपरंमद्दैनैवतरंगीकारादितितस्यधर्मत्वधर्मित्वार्थकतामाह धर्मेतिनूपप
दस्यस्वरूपार्थकत्वेयुष्माभिरा थ्याऽतिरासंभवएवतदौचित्यमित्याशयेनाह व्यवसायनिरूपकेत्वेति
अथवाविषयतासंवंधेनप्रमासोधकज्ञानतालिंगकवक्ष्यमाणानुमानेज्ञानमाननियामकज्ञा
नतासंवंधोव्यापकत्वेनासौविषयेअपितुव्यापकतावच्छेदकत्वरूपसंवंधएवेतिज्ञानतापक्षके
प्रमाजन्यत्वसाध्यकानुमानेज्ञानस्यापिव्यापकतावच्छेदकतयातदभिप्रायेणव्यवसायस्वरू
पइतिविषयपक्षकानुमानाभिप्रायेणव्यवसायनिरूपकेइतिजन्यतासंवंधस्यवृत्त्यनियामकत
याव्यापकताघटकत्वेतज्जन्यतायाएवसाध्यत्वमित्यवधेयंसंवंधोज्ञानतात्वस्यतस्यावालिं
गस्यसचात्रेविशेषतोऽस्मत्पादयिष्यतिव्यवसायरूपप्रत्यासत्त्येत्यस्यविषयतारूपव्यवसायसं
वंधस्यवर्त्तमानज्ञानस्यहेविषयभाननियामकस्यतुल्यत्वादितिमिश्रव्याख्यानंतुहेनज्ञानत्वे

गदा० ९९ नघटत्वप्रकारकत्वानत्वेन वाव्यापकतात्वानाद्दृष्टविषयकत्वोपरक्तज्ञानानुमितिमाभ्युपगच्छतां तेषामेव
युज्यते व्यापकतावच्छेदककोट्यप्रविष्टस्य विषयस्य विधेयतावच्छेदकतया भाने वर्त्तमानव्यवसायवि
षयताया एतादृशवनियामकत्वस्य तत्तद्विषयकव्यवसायोपलक्षितकालविशेषस्य ज्ञाततालिं
९५ गकपरामर्शेन तत्तद्विषयोपरितज्ञानानुमितिजनने सहकारित्वमित्याशयेन तेरंगीकाराणात् अनेन
तुज्ञाततालिंगकपरामर्शेन तथास्वभावस्य प्रथमविप्रतिपत्तौ दूषितत्वादन्यथा तादृशग्रंथे व्या
ख्यायते अतएव वैशिष्ट्यपर्यन्तस्य विषयस्य व्यापकतावच्छेदककोटिप्रविष्टत्वन्यायो ज्ञाततात्व
स्य ज्ञाततायावासंबंधः घटत्ववैशिष्ट्यवद्धर्मिघटितप्रामाण्यप्रकारेणाज्ञानस्य साध्यतायामेवो
पपद्यते तथा सति च व्यभिचारवारणाय ज्ञाततायां घटत्वमित्वमपि हेतौ निवेशनीयमित्याश रामः
येन तदुहोपायमाह तथाहीत्यादिना तज्जनितत्ता तत्ता प्रत्यक्षपीतिता दृश प्रत्यक्षजनिता ९९

याज्ञाततायाघटघटितेंद्रियसन्निकर्षजनितेप्रत्यक्षेपीत्यर्थः तदानीमपिसत्वादिति अन्यथास
न्निकर्षाभावेनज्ञाततायाएवप्रत्यक्षायोगादितिभावः अतएवभ्रमविषयपुरोवर्त्तिनिघटत्व
ग्रहसंभवेनभ्रमजन्यघटत्वप्रकारकज्ञाततायामपिघटत्ववत्त्वग्रहसंभवान्नस्या अपिप्रमात्वा
प्यतावच्छेदकरूपेणाग्रहादेवेत्यर्थः प्रमेत्येवेति क्वचित्प्रमेत्याकारकग्रहविषयइत्यर्थः तादृश
ज्ञानेप्रमात्वघटकघटरूपविषयोनभासते अपितुघटत्वेनाघटएवेतिवस्तुतः प्रामाण्यानवगा
हनात्प्रामाण्यंप्रमायांगृह्यतइतिनोक्तं प्रत्यक्षदशायांप्रत्यक्षाव्यवहितपूर्वकालेक्वचित्स
त्वात्। वर्त्तमानज्ञानग्राहकपरामर्शस्योक्तत्वभावानुपगमेसंवादीच्छादिलिंगकानुमितिसा
मग्र्यविलक्षणसामग्रीमात्रादेवप्रामाण्यभानं प्रामाण्यविषयकानुमितिसामग्रीसमशील
सामग्रीतः प्रामाण्यस्यापितुग्रहतयातस्यनस्वतस्त्वमपितुप्रामाण्यस्येवेतिविशेषः कथमि

गदा० १०० तिपक्षधराक्षेपमाक्षेनुमप्रामाण्यग्राहकलिंगदुर्ग्रहतामुपपादयतिधर्मिणाइतिभ्रमविशेष्यस्याघटस्या
पीत्यर्थःतदभाववत्त्वेघटत्वाभाववत्त्वेनैवदोषेणोवनस्यतत्तद्ग्रहहइतिग्रहस्य॰स्वतस्त्वप्रवादइत्यर्थः
100 क्वचिद्दोषनाशवशाद्धर्मिणस्तदभावग्रहणाप्रामाण्यलिंगस्यग्रहसंभवेपिन्प्रामाण्यग्रहेऽप्रामा
ण्यप्रयोजकसामग्रीविघटकदोषनाशापेक्षयापरतस्त्वप्रामाण्यग्रहेचनस्वप्रयोजकप्रतिकूलापे
क्षेतिविशेषःयद्यपिन्यायमतसिद्धसंवादाद्यादिलिंगकानुमितिसमयीलैवज्ञाततालिंगकानुमितिरि
तितयाग्रहेणचेतस्त्वतोग्राह्यत्वेनदान्यायमतसिद्धतोदृशानुमित्याग्रहेणनतथात्वमितिविशेषणेनापप
द्योतेइतिमिश्राणामाक्षेपोदुरुद्धरः तथापिभट्टमतेव्यवसायेनद्वितीयपक्षेणोज्ञाततायांजनितायांतत्ती
यपक्षेणोघटत्वप्रकारकत्वेनतत्रत्यपेक्षेजायमानेघटत्वत्रिताभानस्यावश्यकतयाप्रमाव्याप्यतावच्छेदक रामं
प्रकारेणाहेतुग्रहप्रौव्यंनतथान्यायमतेसंवादीच्छायाद्वितीयपक्षेणोत्पन्नायाघटत्वप्रकारकत्वेनप्र १००

त्यक्षे घटविशेष्यकत्वरूपहेतुतावच्छेदककोटिप्रविष्टसंवादित्वस्य दुर्ग्रहत्वात् तज्ज्ञानप्रत्यक्षस्यैवेच्छादि
प्रत्यक्षस्यापि तुल्ययुक्त्या तन्मते विषयांशे तद्घटत्वानवगाहित्वात् एतावतैव विशेषणतामतभेदेन स्व
तत्त्वपरतत्त्वरूपविशेषौ दीधितिकारैरभिप्रेतः ज्ञाततताप्रकारेण तद्घटत्वानवगाहित्वात् एतावतैव
विशेषणतामतभेदेन स्वतत्त्वपरतत्त्वरूपविशेषौ दीधितिकारैरभिप्रेतः ज्ञानाभासमाने घटे घटत्वव
त्त्वभानेऽपि ज्ञाततायां घटवृत्तित्वं न भातमिति कुतो दर्शितहेतुग्रहनैयत्यमिति शंकां परिहरति अय
मिति समानेति आधारत्वाधेयत्वयोरित्यादिः भासकसामग्रीनैयत्यं विनाभानसमनैयत्यमनुपप
न्नमित्यतः प्रत्यक्षस्थले तदुभयभासकसामग्रीसमनैयत्यमाह सामग्रीति इत्यनुमित्या एतादृशप्र
योगोपदर्शितपक्षसाध्यहेतुकानुमित्या एतेनानुमितेः पंचम्यंतार्थान्वये लिङ्गत्वेऽपि नासंगतिः घटे
घटत्वप्रकारकज्ञानत्वं शृत्येतद्रूपग्रिमेणान्वयः अनुमितौ प्रयोजिकां व्याप्तिं दर्शयति पायदृति

गदा० १०१

101

रिनिपत्वतत्वाननुगमप्राशंक्याह विशेषतस्त्विति अस्यैव विवरणं तादृश्येणेति घटवृत्ति घटत्वप्रकार
कज्ञाततात्वघटविशेष्यकघटत्वप्रकारकज्ञानसाध्यतात्वरूपेणेत्यर्थः अन्यत्र दृष्टांतो धटविशेष्य
कघटत्वप्रकारकज्ञानांतरजन्यज्ञाततात्राथमिकघटत्वादिप्रकारकप्रमासाध्यत्वसाध्यकानुमितौ
चजन्मांतरानुभूतव्याप्तिस्मरणमेवगतिः एवं चापूर्वचैत्रत्वादिप्रकारघटितसामान्यविषयकानु
मित्यनुपपत्तिरितन्मतेदोष एवं तीतानागतविषयकज्ञानेनज्ञातताया एवाजननात् असन्निकृष्ट
विषयकानुमित्यादिनाज्ञाततानजननेपितस्याः प्रत्यक्षासंभवाज्ज्ञानांतरोपायाभावाल्लिंगज्ञानासं
भवेनज्ञानग्राह्यानुपपत्तिर्वेतसामान्यस्यपतत्वतत्वघटितसामान्यधर्मोपरक्तस्य विशेषस्यातादृ राम० १०१
शसामान्यधर्मानुपरक्तस्यत्रस्यचप्रविष्टत्वमित्यनेनाभिसंबंधः अवैशिष्ट्यं तुल्यसत्वज्ञानता
लिंगकज्ञानसाध्यकानुमितिपक्षेपिव्यवसायरूपत्यस्यव्यवसायनिरूपकार्थकतयाव्याप्त्या

मवलंब्य व्यवसायेत्यादिकं योजयति एवमिति एतन्मतेपि कथितदिशा सामान्यव्याप्तिर्विशेषव्याप्ति
र्वानुमितिप्रयोजिका स्वविषयभूत्याद्व्यादिव्यक्त्यन्योन्याभावरूपमभाववत्वं लौकिकप्रत्यक्षायोग्यं ज्ञाना
नुपनीतं न भासितुमीष्टे अत स्तस्याः ज्ञातसामीप्यभाने दृष्टान्तेनाविरोध इत्याशंक्याह अभाववत्वमिति
भाववाचकत्व इति प्रतियोगिनिरूपितमित्यर्थः भावसाधारण्येपि प्रकृतसंगतेर्यथाश्रुतासंगतेः प्रति
योगिनिरूपितत्व तु संबंधतानिर्वाहकमिति स्वरूपसंबंधविशेष इत्यन्यानुपदवक्ष्यमाणे तदभिधा
नोपयोगः घटो नास्तीति बुद्धौ प्रतियोगिनः संबंधोऽभावांशे संबंधतयैव भासते न तु प्रकारतया तस्य प्र
कारत्वोपगमेपि तदनुगमाय तदंशेऽखंडधर्मो तरस्य प्रकारतया आवश्यकत्वेनाभावानुगमकाखं
डधर्मस्वीकृत्य तस्यैवाभावांऽशे प्रकारत्वोपगम उचित इत्याशयेनाह अखंडोपाधिर्वेति अन्यदे
तदिति उभयथैवा ज्ञानस्य प्रकारतासंभवादिति भावः न्यायमतेपि विशेषणाद्यिपरतन्त्रं द्विशेषणाभ

गदा०
१०२
102

देनकारणताभेदारभावत्वादिविशिष्टबुद्धौ तद्ज्ञानस्य कारणताऽकल्पनादनुपस्थितस्य तस्य प्रकारत्वोपप
त्तिरिष्टव्याभ्रांतिजन्यपुरुषमात्रस्य परमते भ्रांततया अभेदरूपस्तदुभयसंकारइष्ट एव सतो व्याचष्टे भ्रांतमि
त्यादि भ्रमइति भ्रांतपदस्य भावक्तांतत्वादिति भावः भ्रम विषयकमिति ज्ञाधातो विषयितार्थकत्वादि
ति भावः भ्रमरूपव्यवसायतदनुव्यवसाययोर्वा भेदरूपसंकरस्यापादकं दुर्घटमिति ज्ञाधातो विषयि
तार्थकत्वादिति भावः भ्रमरूपव्यवसायतदनुव्यवसाययोर्वा भेदरूपसंकरस्यापादकं दुर्घटमिति सा
दृश्यमेव संकरपदेन विवक्षणीयं तथा च ज्ञानत्वादिना सादृश्यस्येष्टत्वाद्यावत्सादृश्यघटकधर्म
पूरयति संकरो भ्रमत्वेनेति तथा च भ्रमत्वापन्नो व्यवसायो पर्यवसानान्न तथैव व्याचष्टे भ्रमज्ञानस्येति भ्रमानु
व्यवसायस्येत्यर्थः अनुव्यवसाययोर्व्यवसायविषयविषयकत्वरूपमूलोत्कापादकस्य ज्ञानांत
रे भ्रमत्वानापादकत्वात् एतेन संकरापादनस्यानुव्यवसायेऽप्रवर्त्तकत्वापादनरूपतया व्याख्याय

गदा०
१०२

जनकेज्ञाने विद्यमाने बाधावतारस्य प्रवृत्तिप्रतिबंधकत्वमयुक्तमिति तदवतारे तस्यैव प्रतिबंधकत्वादि
ति सिद्धांतोपरि ऋनुशयेनोपनायकभ्रांतेरभावाच्चेति फक्किकामवतार्य भ्रमस्य बाधरूपप्रतिबंधवशेना
नुव्यवसायवैशिष्ट्योपनायकत्वासंभवाच्च प्रवृत्त्यापादनमित्येतत्सारतया मिश्राणां तद्व्याख्यानेकु
सृष्टिरेवेति सूचितं तत्व्याख्यातभ्रमत्वायत्यनुसारेण बाधानवतार इत्यादि फक्किकात्रयं व्याचष्टे वा
षेति विषये तद्वत्त्वावगाहित्वं भ्रमविषये शुक्त्यादौ रजतत्वाद्यवगाहित्वं न तद्ग्रहः निर्द्धर्मितावच्छेदक
मपि तद्वत्त्वभानं तस्यैव बाधग्रहस्यैव वाच्यं समानविषयतामात्रेण तादृशभानेपि प्रतिबंधकत्ववाच्ये अ
न्यथा समानप्रकारकत्वेन च प्रतिबंधकत्वे दृष्टापत्तिः निर्धर्मितावच्छेदकतद्वत्त्वभानेन भ्रमेपि दृष्टापत्तिः इ
दमधिकं मूलस्य न्यूनताभंगायाभिहितं उत्तरकालं बाधनाशोत्तरं ज्ञानोपस्थितावपि भ्रमरूपव्यवसायोपस्थि
त्यात्तदुपनीतभानेपि न तथा ग्रहणं नेतद्विषये शुक्त्यादौ रजतत्वादिमत्त्वग्रहणं व्यवसायासत्त्वे विषयाभावे

गदा० १२ 103

नच्चवसायस्यैवमानासंभवान्नद्विषयेऽजतत्वादिभानासंसक्तेः उपनीतभानसंपादकव्यवसायोपस्थितेरधिकांया
अभिधानं ननुशब्दगंधवधोग्यत्वान्नग्रहेपीतिमूलमसंगतंशब्दगंधादौतद्ग्रहपूर्वसन्निकर्षत्यत्वात्प्रकृतेच
व्यवसायपूर्वंतद्वृत्तिधर्मेतदघटितेंद्रियसन्निकर्षासत्वान्नदसत्वेचयोग्यतायाअकिंचित्करत्वादित्याशंकां
निरस्यतिस्वप्रकाशनयेइति स्वस्वधर्मस्वविषयग्राहित्वदिति तथाचयथातन्मतेविषयग्रहएवपूर्व
कालेतत्रसन्निकर्षापेक्षानतुस्वस्यस्वधर्मस्यवाग्रहेस्वोत्पादकसामग्र्याएवतद्ग्राहकत्वात् तथा अ
स्वप्रकाशमतेपिस्वधर्मग्रहेनसन्निकर्षापेक्षापितुविषयग्रहएवेतिभावः ततएवस्वसामग्रीबलाद्
वग्रहसिद्धेर्वग्रात्यस्ययोग्यतासिद्धस्तद्बलान्नविवादविषयग्रहनिर्वाहइत्यतोग्रहेपीति मूलग्रहो
पगमपरतयावर्णितं गुरुमतेव्यधिकरणप्रकारकत्वरूपभ्रमत्वस्यज्ञानधर्मत्वाभावात्सामर्थ्येवाऽ
प्रामाण्यमपिशृत्लीयादितिमूलमसंगतमतोव्याचष्टे अप्रामाण्यमिति अनवस्थयाप्रामाण्यंन

राम० १०३

नज्ञापितैवेत्यत्रेष्टापत्तिसंकां निरस्यतितथाचेतिप्रामाण्यस्यातोग्राह्यत्वेपरतोऽग्राह्यत्वेसतिग्राह्यत्वनू
पपरिशेषस्यहेतुत्वंनसंभवतिमीमांसकैरपिअनुमित्यादिग्राह्यत्वनूपस्यपरतोग्राह्यत्वस्यप्रामाण्ये
भ्युपगमादसिद्धेरतःपरिशेषंव्याचष्टेपरिशेषइति अन्यथोपपत्तिविरहः स्वतोग्रहंविनाग्रहानुपपत्तिः
साचतर्करूपापरमतेप्रमाणांतरंसंदिग्धलिंगस्यसंशापकतयालिंगंचनेसंशायकोमितिमूलासंगति
रतोव्याचष्टेलिंगमिति प्रकृतेलिंगसंशयादेवप्रामाण्यसंशयोभविष्यतीत्याशंकांनिरस्यतिसंचे
ति लिंगनिश्चयश्चेत्यर्थः भवतामस्त्येवेति प्रत्यक्षप्रमाणस्यतन्निश्चायकत्वादन्यथाज्ञानानुमितेर
योगादितिभावः प्रामाण्यसंशयस्यप्रामाण्यसंशयाप्रतिबंधकतयाप्रामाण्यज्ञानसामान्यस्यतत्संशा
यप्रतिबंधकत्वेदृष्टांतत्वासंभवात् ज्ञानवदित्यत्रज्ञानपदंनिश्चयपरतयाव्याचष्टे प्रामाण्यस्यज्ञानंनि
श्चयइतितन्निश्चायकत्वादित्यग्रिमतत्पदेनप्रामाण्यंपरामृश्यतइत्याविष्कर्तुंप्रामाण्यस्येतिविगृह्य

धृतं यत्तु प्रमाणज्ञानं निश्चय इति लिखने ज्ञानांतं समुदायस्य विषयाविशेषितनिश्चयार्थकत्वासंभवाद् संगतिः
प्रामाण्यज्ञानं प्रामाण्यनिश्चय इति व्याख्याने क्षराधिकं ज्ञानं निश्चय इति व्याख्याने ज्ञानस्येति ज्ञानपदव्या
ख्यानं वेदमिति शेषः का संभव इति प्रामाण्यस्य ज्ञानमिति व्याख्यातमिति तन्न तथा सति ज्ञानवन्निश्चयवदिति
व्याख्येपेक्षायानिर्वीजातायातात् मूले तत्सामग्र्यपि ज्ञानमानससामग्र्यपि प्रामाण्यस्य संशयप्रतिबंधि
कास्यान्नस्यास्तन्मतेतन्निश्चायकत्वात् प्रामाण्यनिश्चयसामग्रीत्वादित्यर्थः यन्निश्चयोपस्तसंशयप्रतिबं
धकत्वन्निश्चयसामग्र्या अपि तत्संशयप्रतिबंधकत्वनियमादिति भावः अन्यथेति मूलस्य तन्निश्चयसा
मग्र्यास्तत्संशयाप्रतिबंधकत्वे इत्यर्थकतायाम संगतिः विशेषपदस्य व्यावर्त्तकसामान्यपरत्वेन व्या
ख्येयतया एककोटिव्याप्यदर्शनोद्युत्पत्तिकाले संशयापत्तेरपि कोटिनिश्चयसामग्र्याः संशयाप्रतिबं
धकत्वापादकत्वलाभप्रसंगात् तत्र चस्यतद्बाधितत्वादतो यन्निश्चय इत्यादि वर्णितभावार्थे विपरीता

र्थकतयाऽत्र अन्यथेति व्याचष्टे अन्यथेति आनुमानिकादिविरोधिनिश्चयदशायामपि संशयस्यानिष्ट
त्वाद्दर्शनपदस्य न साक्षात्कारपरता संशयकाले च संशयापत्तियोगात् ज्ञानसामान्यपरतापि संभावती
ति तन्निश्चयसामान्यपरतया व्याचष्टे विशेषेति यावत्त्वैकधर्मदर्शनानन्तरक्षणोत्पत्तिप्रतिबंधकतयैव संश
यापत्तियोगात् कालपदमुत्पत्तिविशिष्टकालपरतया व्याचष्टे उत्पत्तीति विशेषपदस्य मिश्रव्याख्यातमे
ककोटिव्याप्यपरत्वेन सम्यक् व्याप्यदर्शनोत्पत्तिकाले संशयानुत्पादात् तद्विरोधेन कोटिनिश्चयसामग्र्याः
प्रतिबंधकत्वस्य प्रकृते तस्यासिद्धेः तत्पूर्वं कोटिनिश्चयसामग्र्या अभावात् प्रतिबंधकाभावस्य कार्यसह
भावेन हेतुतायाः सामग्रीप्रतिबंधकतावादिनानभ्युपगमात् अथापि व्याप्यदर्शनप्रतिबंधकतयैव त
दुत्पत्तिकाले संशयवारणसंभवात् सामग्रीप्रतिबंधकतायामितरामसिद्धेश्चेत् तु विशेषदर्शनस्य सा
मग्रीत्वेनैव प्रतिबंधकतानतु तत्त्वेनालोकसमवधानादिघटितसामग्र्या असंग्रहात् निर्णयसामग्री

गदा० १०५ 105

त्तस्य च निर्णयाव्यवहितप्राक्क्षणावेशिष्ट्यरूपस्य सर्वत्राननुगतत्वात् निर्णयसामग्र्यभावस्य कार्यसहभा
वेन हेतुत्वे कोटिस्मरणासत्त्वे चक्षुःसंयोगादिसमवधानद्वितीयक्षणाद्यप्रथमक्षणेपि संशयो न स्यादि
ति तु न दोष्यं तदानीं संशयानुत्पत्तेरिष्टत्वात् यदि च कदाचिच्चक्षुःसंयोगोत्पत्तिकाले संशयोत्पत्तिरनुभूयते
तदा चक्षुर्मनोयोगद्वयाभावेन न तदनंतरक्षणे निर्णय एव नोत्पद्यते अपि तु क्षणैकव्यवधानेनेति कल्पनात्
निर्णयत्वस्य संशयान्यत्वनिर्वाच्यतया संशयानुत्पादाधीनं तादृशप्रतिबंधकसमवधानं संशयानुत्पा
दप्रयोजकं भवितुमर्हतीति परस्पराश्रयादिदूषणं तु अथेत्यादिना मणिकृतैव शंकिष्यते कोटिभा
सकसन्निकर्षाद्यसत्त्वेपि व्याप्यदर्शनस्यानुमित्युत्पादकं तया निश्चयसामग्रीत्वं वस्तुतो विशेष
दर्शनकाले उपनायकज्ञानघटिता प्रत्यक्षात्मककोटिनिश्चयसामग्री नियतैव एतेन व्याप्तिमिवि गम० १०५
शिष्टवत्तानिश्चयस्यानुमितिसामग्रीत्वेपि ज्ञानद्वयादिरूपं पुरुषत्वव्याप्यं करादिकं करादिमांश्चा

यमितिज्ञानंनन्यायमतेपुरुषत्वनिश्चयसामग्रीतितस्यप्रतिवंधकत्वंस्यात्तच्चेणावश्यंकल्पनीयंतत्प्रति
वंधकतावच्छेदकनिश्चितव्याप्तिकधर्मवत्ताज्ञानत्वंव्याप्तिविशिष्टवत्ताज्ञानसाधारणमेवेतिविशेषद
र्शनस्यनसामग्रीत्वेनप्रतिवंधकतानचज्ञानद्वयादिकंनसंशयविरोधीतियुक्तश्चावच्छेदकधर्मद
र्शनस्यज्ञानद्वयादिरूपस्यव्याप्तिसर्गकज्ञानघटितस्यप्रतिवंधकतायामविवादेनव्याप्तिप्रकारके
ज्ञानघटितज्ञानद्वयादेस्तथात्वेविवादायोगात अथमतुज्ञानद्वयादिरूपविशेषदर्शनंदर्शित
विशिष्टधीसाधारणरूपेणस्वतःप्रतिवंधकत्वेथाप्यलोकसमवधानद्वारत्वोघभावघटितसामग्र्या
निर्णयसामग्रीत्वेनप्रतिवंधकतायाःक्लृप्तत्वात्तद्रूपाक्रांतविशिष्टज्ञानमेपिसामग्रीविधयापिप्रति
वंधकमेवेतिचेदस्त्वेवंतथापिविशेषदर्शनस्यस्वातःप्रतिवंधकतयैवतदुत्पत्तिकालेसंशयवारणा
संभवात्सामग्रीप्रतिवंधकतायांतदुपष्टंभकत्वानुपपत्तेरितिपरास्तंएवंघटादिप्रत्यक्षेच्छाविशि

ष्टतत्प्रत्यक्षत्वात्सामग्री सत्त्वे घटादिव्याप्यवत्ताज्ञानस्य सत्त्वे प्रकारे घटादिसंशयापत्तिरनुमितिसामग्र्यसत्त्वा
दित्यपि परास्तमिति तत्र चक्षुरालोकादिसमवधानादिपमितसामग्र्युत्तरकाले संशयस्यैककोटिनिश्चयाभावस्य
कार्यसहभावेन हेतुतयैव वारणासंभवात् तदुत्पत्तिकाले च संशयस्येष्टत्वात् विशेषदर्शनोत्पत्तिकाले सं
शयवारणाय तस्य तत्त्वेनैव प्रतिबंधकतायां लाघवेनौचित्यात् व्याप्यतावच्छेदकधर्मसंबंधादिभिन्न
नानाविधव्याप्तिविषयकज्ञानानां निश्चयसामग्रीत्वेनानुगम प्य लाघवादेकप्रतिबंधकत्वमिति चेन्न
षां केन रूपेण हेतुता न तावदननुगतेन तद्रूपे व्यभिचारात् न संशयविरोधित्वेनानुगतेन तथा सति नि
श्चयोत्पादकत्वेन संशयविरोधित्वेऽन्योन्याश्रयात् अव्यवहितपूर्वत्वादेरननुगतस्य दुर्वचत्वाच्च वि
शेषदर्शनकाले एकतरकोटिनिश्चयकाल इति प्राचीनव्याख्यानमपि न सानुउदक्षरत्वात् व्यावर्त्तक
मात्रस्यैव विशेषपदार्थत्वात् व्याप्यदर्शनाद्युत्पत्तिकालेऽपि संशयस्य तत्सामग्रीप्रतिबंधकतयैव

वारणीयत्वात्तत्सामग्र्यो अप्रतिबंधकत्वेन तदुत्पत्तिकाले संशयापत्तेरघदर्शने न्यूनता च स्यात् अतो
व्यावर्त्तकसामान्यपरतामेवाह विशेषश्चेति तद्भावादात्यादिना तदभावव्याप्यतदभावावच्छेदकध
र्मपरिग्रहः विशेषदर्शनाभावस्य व्यावर्त्तकधर्मदर्शनाभावस्य सामंतस्यैकोटिनिश्चयस्य व्यापदर्श
नादेश्चोत्पत्तिदशायां संशयवारणसंभवे स्वपूंकारणतावच्छेदकोपलक्षितकारणसत्तायाः स्वलाघ
वेन कार्योत्पत्तिप्रयोजकतायाः ज्ञायमानलिंगस्यानुमितिकरणतानिराकरणप्रस्तावे वक्ष्यमाणेन
यासंप्रदायसिद्धत्वादित्युक्तं तावता कार्यकालवृत्तित्वेन हेतुतायां काक्षतिरित्याकांक्षायामाह नचे
ति प्राक्काले कार्याव्यवहितप्राक्क्षणोत्पत्तिसंभवः कार्यकालवृत्तितद्रूपकारणतावच्छेदकविशिष्ट
सत्वसंभवः तथा च कदापि कार्यं नोत्पद्येतेति भावः अत्र च सर्वत्र जनकारणतावच्छेदकविशिष्टस्य प्रा
क्सत्त्वं कार्योत्पत्तौ तंत्रं विषयप्रतियोग्याद्यवच्छिन्नहेतुताकज्ञाननाशादीनां कारणतावच्छेदक

विषयाद्यसत्वदशायामपिकार्यकारित्वात् नकिंतुइंद्रियसंयुक्तसमवायाप्रामाण्यत्वाभावविशिष्टपरामर्शा
दिनप्रत्यक्षानुमित्यादिरूपकार्यजननएवाश्रयचक्षुःसंयोगादिविगमेपिरूपचाक्षुषादिप्रसंगस्यान्यथा
दुर्वारत्वात् एवंचकार्यकालसत्त्वविशिष्टकारणस्यप्राक्सत्तायाअनपेक्षणात्रोक्तदोषः नचकार्य
कालवृत्तित्वस्योपलक्षणतापिनसंभवति तथासतिमण्यादिरूपप्रतिबंधकसमवधानोत्पत्तिकालेदा
हाद्यापत्तेर्विनासामग्रीप्रतिबंधकतादुर्वारत्वात् कार्यकालवृत्तित्वोपलक्षितमण्याद्यभावस्यस्वसत्व
कालेएवसत्वेनमण्यसमवधानाद्युत्पत्तिप्राक्कालेपिसत्वादितिवाच्यं मण्याद्यभावरूपकारणस्यप्राक्काल
इवकार्यकालेपिसत्तायास्तदानीकार्योत्पत्तिप्रयोजकत्वात्तत्क्षणतत्पूर्वक्षणोभयावच्छिन्नमण्याद्यभा
वाधिकरणोत्तरक्षणेदाहादिरूपकार्यवादित्यवसामग्रीव्यापगमात् एवंसतिकार्यकालवृत्तित्वस्यकार
णतावच्छेदकनिवेशनमनुपयुक्तमितिचेन्न तत्कारणतावच्छेदकमपितुपूर्ववर्त्तित्वंतत्रकारणताशरी

रघटकमेव यदा यत्र कार्यमुत्पद्यते तत्र तस्मात्काले च कारणमिति विलक्षणव्यापकतायाः तत्र कारणता
पटकत्वात् यथा क्वचित्कार्यो व्यवहितपूर्वक्षणे कारणसत्वेपि कार्योत्पत्तौ व्यापकताघटितकारणता
क्षतेस्तादृशक्षणसत्वं कार्योत्पत्तावपेक्षितं तथा मरणादिसमवधानकाले दाहाद्युत्पत्तावपि निरुपेनि-
रुक्तव्यापकताघटितकारणताभंगो नेति कार्यकालसत्तापि मण्यभावादेर्दाहाद्युत्पत्तावपेक्षितेति
अस्तु वा उपलक्षणीभूतत्वात् अनन्तरक्षणावच्छिन्नाया अधिकरणतायास्तन्निरूपकत्वसंबंधेन क्षणवै
शिष्ट्यं मण्यभावादिकारणतायाः समवच्छेदकं मणिसमवधानोत्पत्तिप्राक्क्षणस्यानेतादृशसंबंधेन
वैशिष्ट्यं मण्यभावे तदधिकरणतायास्तदनन्तरक्षणानवच्छिन्नत्वात् देशान्तरनिष्ठतदधिकरणता
तत्क्षणानन्तरक्षणावच्छिन्नेति चेत् एवमपि देशान्तरनिष्ठाधिकरणतानिरूपकत्वविशिष्टस्य वैतेन सं
बंधेन क्षणविशिष्टस्याप्यधिकरणान्तदृश एवं न तु यदधिकरणे कार्यमायाघेतदृति न मणिसमवधान

देशे कार्यापत्तिरित्यालोच्योक्तमाशयादिति निश्चयजनकविशेषदर्शनोत्पत्तिकाले संशयापत्तिः प्रति
बंधकसामग्र्यभावस्य कार्यसहभावेन हेतुतयैव वारयितुं शक्यते विशेषदर्शनस्य स्वानंतर्येण प्रतिबंध
कत्वादिति मिश्रामूलाशयं व्याचक्षते नेत्युपाधिच प्रतिबंधकमात्रस्यैव सामग्र्या यदि प्रतिबंधिकात्तदाम
णिसामग्रीसमवधानकाले दाहानुपपत्तिस्तादृशाप्रतिबंधकाभावस्य कार्यकालेऽसत्त्वादिति पूर्वपक्षो
त्थाननूपप्रतिबंधकसामग्र्या एव प्रतिबंधकतानियमः न तु प्रतिबंधकांतरसामग्र्या अतो मणिसामग्र्य
भावो दाहे हेतुरेव निपतु मण्यभाव एव कार्यसहभावेन तथा तावाते वमणिसमवधीनोत्पत्तिकाले दा
ह वारणादिति मिश्रैः समाहितैः तत्समाधानमाक्षेप्तुं मणिसामग्र्यभावस्य दाहहेतुत्वं कुत्रचि
त्कार्यैकस्य चित्कार्यसहाभावेन हेतुत्वं चाभ्युपेत्यापि समाधास्यन् तं पूर्वपक्षमुपन्यस्यति यत्त्विति प्र
तिबंधकमात्रेति मात्रपदे कृत्स्नार्थकं पूर्वं वर्त्तितामात्रेणेति मात्रपदेन सहभावव्यवच्छेदः कार्य

सहभावेनहेतुतायाविचारसहकृत्वेमप्यभावस्यतथाहेतुतयैवमप्युत्पत्तिकालेदाहवारणसंभवान्नसा
मग्र्यभावस्यहेतुतायात्रप्रामाणिकत्वात्संभवादित्युक्तं पूर्वेनिगल्लभ्रमवेज्ञानादिरूपेत्तिजकनाशो
त्पत्त्यधिकरणविशिषेदर्शनद्वितीयक्षणेसंपाद्योजायतेतथाचोत्तेजकाभावविशिष्टप्रतिबंधकाभावस्य
कार्यकालेःसत्वात्पूर्वेवर्त्तितामात्रेणहेतुतावाच्येतिसामग्रीप्रतिबंधकत्वमावश्यकमेवेतिध्येयं
अथेत्यादिकांशंकांप्रकृतेसंगमयति निश्चयसामग्र्यभावेति प्रकृतइत्यादिःपदार्थमव्याख्यायै
वनिश्चयसामग्र्यभावसत्वंस्फुटीकर्त्तुंपर्यवसितार्थमाहविशेषदर्शनाद्यभावेति एककोटिव्या
प्यदर्शनकालेकोटिद्वयस्मरणेपिनिश्चयोत्पत्तेस्तदभावस्यकोट्यंतरोपस्थितौवैशिष्ट्यनिवेशः
नत्सामग्रीतितत्प्रदेनकोटिनिश्चयपरामर्शस्फुटीकरणापनिश्चयस्येत्यसमासप्रलिखनंनतत्सामग्री
नतदुपधानप्रयोजककारणसमुदायः अथनिश्चयंप्रतिविशेषदर्शनाभावसहकृतकोट्यंतरा

पस्थितेः प्रतिबंधकत्वे निश्चयसामग्र्याः संशयप्रतिबंधकत्वकल्पनं निर्युक्तिकं निश्चयसामग्रीदशायां त
त्सामग्रीघटकभूतायाः संशयजनकविशेषादर्शनसहितकोट्युपस्थितेः प्रतिबंधकत्वे निश्चयसाम
ग्र्याः संशयप्रतिबंधकत्वकल्पनं निर्युक्तिकं निश्चयसामग्रीदशायां तत्सामग्रीघटकभूतायाः विरहादे
व संशयापत्त्ययोगादिति चेन्मा भून्निश्चयसामग्री संशयप्रतिबंधिका तदपि मीमांसकानामनुमतमेव
तथा सति प्रामाण्यसंशयस्य निरंतरं निर्वाहात् एकदा संशयनिश्चययोरनुत्पादात् फलनियतकार
णत्वोमरूपायाः निश्चयसामग्र्यास्तादृशसंशयसामग्रीकालेऽसमवधानात् स्यरमपेक्ष्यतादृ
शसामग्र्याः समबलदुर्बलभावो किन्न संगच्छत इति प्रकृतनिश्चयसामग्रीपदार्थं व्याचष्टे निश्च
यसामग्रीतरेतिद्विंद्रियसन्निकर्षादीति तादृशसामग्री च संशयकालेऽस्त्वेवेति भावः तस्या
दौर्बल्यं च संशयसामग्रीदशायां निश्चयानुत्पादकत्वमेव न तु ज्ञानानुत्पादकत्वं तथापि तदानीं

संशयरूपतत्कोटिज्ञानजननादित्यवधेयं वक्ष्यमाणयुक्त्याऽशेषकारणरूपसंशयसामग्र्यानिश्चयात्मक
फलविरोधितारूपनिश्चयसामग्र्यवधिकबलत्वासंभवेन तत्रापि सामग्रीपदं प्रायुक्तासाधारणविपरी
तकोटिभासकसमुदायपरतयाव्याचष्टे संशयसामग्रीति तथाविधेति विशेषदर्शनाद्यभावविशि
ष्टेत्यर्थः व्यारव्याबीजमाहात्म्यादिति साधारणं तत्कोटिभानप्रयोजकं तेन कोट्युपस्थित्यादेरेव कोटि
निश्चयप्रतिबंधकशरीरप्रवेशलाभः मानाभावादिति यादृशकारणसत्वे इतरकारणसत्वेपि सामग्रीप्र
तिबध्यज्ञानं जायते तादृशकारणस्यैव फलोपधायतयेप्रतिबंधककारणसमुदायप्रवेशस्य प्रामाणिकत्वा
दिति भावः संशयसामग्र्यानिश्चयप्रतिबंधकत्वस्योक्तत्वात्तदुपरि विरुद्धारोपेत्यादिमूलं संगमयितुं
तादृशप्रतिबंधकताबीजस्य संशयत्वनिश्चयत्वयोः कार्यतावच्छेदकत्वस्य खंडनपरतां तस्याह संशय
त्वेति भवेदेवमिति निश्चयत्वावच्छिन्नं प्रति संशयसामग्र्याः प्रतिबंधकत्वं प्रामाणिकं स्यादित्यर्थः

गदा०
११०
110

अन्यथा निश्चयत्वावच्छिन्नस्य संशयदशायामायादकाभावेन तत्प्रतिबंधकताकल्पनवैयर्थ्यादिति भावः
निश्चयत्वस्य किंचित्कारणाकार्यतावच्छेदकत्वेपि न तद्रूपात्संशयकाले तदवच्छिन्नापत्तिर्विचारसहा
तत्र घटकतदभावाप्रकारकत्वे तदभावप्रकारकत्वप्रयोजकसामग्र्याभावस्य तदवच्छिन्ने हेतुभूतस्या
पि प्रतियोगिप्रयोजकाभावविधयापेक्षणादतः कदाचिदित्युक्तं यद्यपि संशयत्वस्य कार्यतानवच्छे
दकत्वेपि निश्चयत्वस्य कार्यतावच्छेदकत्वे तदवच्छिन्नं प्रतिविशेषादर्शनसहितकोट्यंतरोपस्थितिरू
पायाः संशयसामग्र्याः प्रतिबंधकत्वमावश्यकं शक्यकल्पनं च भवतीति निश्चयत्वमात्रस्य तथात्वखं
डनमुचितं न तु संशयत्वस्य तथापि दृष्टांतविधया निश्चयत्वस्य प्रयोजकसमाजाधानतया कार्यतानव
च्छेदकत्वे संशयत्वमपि कार्यतानवच्छेदकमास्तामिति प्रतिबंदिनिरासायैवान्तस्य तथात्वखंडनादि
त्यध्येयं यद्यपि प्रकृते निश्चयत्वस्य कार्यतावच्छेदकत्वनिराकरणं मूलेनास्त्येवेत्यसंगतिः तथापि

राम०
११०

स्वयं तत्पूरयिष्यतीत्यदोषः पर्य्येकधर्मिकविरुद्धोभयप्रकारकज्ञानत्वरूपसंशयत्वं सामग्रीसमाज
निर्व्वाह्यमपि जन्यतावच्छेदकं भवेत् तदा तत्रैकधर्मिकत्वं कोट्योर्विरुद्धत्वं तद्विषयताप्रकारता
त्वरूपविशेषंच परित्यज्योभयविषयकज्ञानत्वमपि तथा भवेत् एवमेकत्रेत्यत्र तद्विपरीतमुभयत्रेति
निवेशेोभयप्रकारकेत्यत्र तद्विपरीतमेकप्रकारकत्वं निवेश्य विरोधं परित्यज्योभयत्रैकप्रकारकज्ञा
नत्वं एवं विरोधस्थाने तद्विपरीतमविरोधं निक्षिप्य एकत्राविरुद्धोभयप्रकारकज्ञानत्वं च जन्यता
वच्छेदकं भवेत् इति प्रतिवादिसूचनाय तादृशधर्मत्रयस्य दृष्टान्ततयोपन्यासः प्रत्येकेति तत्तदभावा
दिप्रकारकत्वप्रयोजकतत्तत्कोटिविशिष्टउद्बुद्धसामग्र्याः संवलनाधीनत्वादित्यर्थः ननु साम
ग्रीसमाजादुभयप्रकारकज्ञानाभेदनिर्व्वाहेपि परस्परविरोधावगाहित्वघटितसंशयत्वानिर्व्वा
हः प्रत्येककोटिभासकसामग्र्यास्तत्प्रयोजकत्वात्तयोस्तत्प्रयोजकत्वकोटिद्वयसमुच्चयस्या

गदा०
१११
।।।

प्यतथात्वापत्तेरित्यतआह क्वचिदितितत्सामग्र्यधीनत्वाद्विरोधभासकसामग्र्यधीनत्वात्साचवि
रोधोपस्थितितदसंसर्गाग्रहरूपातदनुपस्थितिकालीनसंशये चासंसर्गाग्रहएवसंसर्गविधया
विरोधभासकःसंसर्गभानेसन्निकर्षस्याप्यहेतुतयाज्ञानसन्निकर्षविधयापिविरोधोपस्थित्यन
पेक्षणात्विरोधानुपस्थितिदशायांकोटिद्वयसमुच्चयएवजायतइतितुनयुक्तं अव्याप्यवृत्तिव
ज्ञानंविनाभावाभावसमुच्चयस्यानुभवविरुद्धत्वात्विरोधस्यकोट्योःसंबंधःनचैवमेककोट्यंशेऽ
परकोटेःप्रकारतापत्तिःअभावकोट्यंशेप्रतियोगितयाभावकोटेःप्रकारतायाःसर्वसम्मतत्वात्
तत्संसर्गएवविरोधस्याप्यंतर्भावात्विरोधविशिष्टसंयोगादिरेववा अधिकरणेकोटिसंबंधः
विभिन्नावच्छेदेनैकाधिकरणवृत्तित्वरूपाव्याप्यवृत्तित्वज्ञानस्यविरोधभानप्रतिबंधकत्वात्तयात गम०
दानींकोट्योःसमुच्चयःक्वचित्तुविरोधानुपस्थितिकालेविरोधाविषयकएवसंशयःविरोधस्य १११

सांसर्गिकविषयतायाश्चाप्रामाणिकत्वात् संशयत्वंच विरोधविषयकत्वाघटितमेवातो विरोधा
भानेपि न संशयत्वानुपपत्तिः नच संशयत्वशरीरे विरोधविषयकत्वाप्रवेशे समुच्चयस्य संशय
त्वप्रसंगः संशयत्वस्य विषयताविशेषरूपत्वात् नच समुच्चयविषयताव्यावृत्तविशेषपदार्थो
दुर्वचः भावाभावोभयप्रकारकत्वं च समुच्चयविषयतासाधारणमिति वाच्यं समुच्चये प्रकारभे
देन विषयताभेदात् विरुद्धोभयप्रकारकैकविषयकमपि प्रमाणं चैत्रादिवत्स्थाणौ वप्रतिबंधकं
संशयत्वस्य विरोधविषयतानियतत्वेपि विरोधाप्रकारके तत्संसर्गकज्ञाने अव्याप्यवृत्तित्वधि
यः पृथक्प्रतिबंधकतायाश्चावश्यकत्वात् तत्प्रकारकज्ञानत्वस्यैव तद्विपरीतज्ञानप्रतिबध्य
तावच्छेदकत्वात् तत्संसर्गकधियस्तु तद्रूपायानाक्रांतत्वादित्याहुः तन्नु दीधितिकृतोः संम
तं तेन संशयत्वस्यैकार्यतावच्छेदकत्वखंडनात् विषयताविशेषस्य समुच्चयव्यावृत्तस्य साम

गदा०
११२

श्रीसमाजानियम्यतयाऽव्याप्यवृत्तित्वज्ञानाभावजन्यतावच्छेदकतायाआवश्यकत्वात्तन्नचविरोधवि
षयतायाःसंशयघटकत्वस्यदीधितिकारसम्मतत्वेकथंचिदित्यसंगतमितिवाच्यं एकावच्छेदकाव
च्छेदेनभावाभावोभयवत्ताऽवगाहिसंशयेविरोधावगाहितायाअनियमात्तल्लिखनोपपत्तेः अव्या
प्यवृत्तित्वधीदशायामपिमूलावच्छिन्नोवृक्षःकपिसंयोगीनचेतिसंशयस्यानुभवसिद्धतयातस्य
विरोधविषयकत्वासंभवात् नचतत्रएकावच्छेदकावच्छेदेनैकत्राववर्त्तमानत्वरूपविरोधभानेबा
धकाभावःतादृशविरोधावगाहिनोपिविभिन्नावच्छेदेनसंयोगतदभावादिमत्त्वावगाहिनोज्ञान
स्यसमुच्चयतयासामान्यतएकाधिकरणावृत्तित्वरूपविरोधानवगाहिनिभावाभावोभयप्रकार
कज्ञानेएकावच्छेदकावच्छिन्नत्वावगाहितायाःसंशयत्वप्रयोजकत्वावश्यकत्वात् अवच्छेद
कघटितविरोधभानस्यानुपयुक्तत्वात्संसर्गविधयातद्विषयतायाःकल्पकाभावेनतत्प्रयोजक

राम०
११२

सामग्र्यान्तरप्यकल्पनात् ज्ञानसामग्रीतस्तदुपस्थितिदशायामेव प्रकारतयान ज्ञानं वस्तुतस्तु एका
वच्छिन्नत्वावगाहिन्यपि ज्ञाने विरोधस्य गुरुशरीरस्य संसर्गतया भानमप्रामाणिकं तादृशसंशये
ऽनवच्छिन्नाधारतायाः एवं संसर्गतया भानोपगमेन समुच्चयात्मकैकलक्षणोपपत्तेः संयोगतद
भावाद्यो एकत्र द्रव्यादौ वर्त्तमानत्वग्रहेपि गुणादौ तत्संशयस्यानुभविकतया तत्रानवच्छिन्ना
धारतायाः संसर्गतयैव समुच्चयत्वेलक्षणोपपत्तेर्न चैवं तत्राप्यनवच्छिन्नाधारताघटितविरोधभा
नमुपपत्तेतज्ज्ञाने बाधकाभावादिति वाच्यं अनवच्छिन्नाधारताघटितविरोधग्रहदशायामपि द्र
व्यविभिन्नावच्छेदेन संयोगतदभावयोः समुच्चायोत्पत्त्यातस्य संशयत्ववारणाय तादृशवि
रोधभानस्याप्यनवच्छिन्नाधारतासहितस्यैव संशयत्वप्रयोजकतायावाच्यतया विभिन्नाव
च्छेदेनैकाधिकरणावृत्तित्वरूपाव्याप्यावृत्तित्वग्रहदशायांभावसमुच्चयोत्पत्त्यातत्रानवच्छि

न्नाधारताभानासंभवेन तज्ज्ञानादेव संशयत्वनिर्वाहे सा च संसर्गतया विरोधभानस्याप्रामाणिकत्वात् एवं च
विरोधभानं भावाभावकोटिकसंशये क्वाचित्कसामग्रीवशात् क्वाचित्कमेव न तु नियतं नियतं तु भावद्वयको
टिकसंशयस्याप्रामाणिकत्वेतत्र ॥ विरोधस्यानवच्छिन्नत्वस्य वा भानेन संशयस्य न समुच्चयवैलक्षण्यं तद
धिकरणावृत्त्यन्यत्वादिरूपविरोधस्यानवच्छिन्नत्वस्य चाव्याप्यवृत्तित्वभ्रमदशायां समुच्चयेऽपि तज्ज्ञानात्त
स्मात्संशयत्वमव्याप्यवृत्तिधर्मानसत्त्वमाप्यजातिरवच्छेदकं च न स्यात् तत्तद्धर्मिविषयकत्वावच्छिन्नतत्तत्को
टिप्रकारकत्वमिति केचित् अधिकं हेत्वाभासे वक्ष्यामः निश्चयत्वस्य जन्यतावच्छेदकत्वं निराकरोति ए
वमिति उभयविषयकत्वेति । एकधर्मिकत्वविरुद्धत्वयोः प्रतियोगिकोटावनिवेशात्संशयत्वशून्य
ज्ञानत्वरूपनिश्चयत्वादस्याविशेषः एतद्दृष्टान्तकथनं च पूर्ववत्प्रतिवंदिसूचनाय ज्ञानत्वघटिताघटि
तेति ज्ञानत्वेन घटितमघटितं वा यत्संशयत्वं तच्छून्यत्वस्यार्थः घटितत्वोपादानं पदार्थानुसारेण निश्च

यत्वघटकसंशयत्वशरीरेज्ञानत्वनिवेशोनर्थकः ज्ञानत्वघटिततच्छून्यज्ञानत्वस्यतदघटिततवच्छून्य
ज्ञानत्वसमनियतत्वादित्याशयेनाघटितमितिप्रतन्नोपलक्षणंतद्धर्मि कतन्निश्चयत्वशरीरेतद्धर्मिणि
ता।तद्धितुद्धोभयप्रकारकत्वनिविष्टमतद्धर्मिणितत्प्रकारकत्वनूपसंशयत्वघटकदलस्यप्रवेशो
पिव्यर्थइतितद्धर्मिणितद्धितद्धप्रकारकत्वशून्यत्वमेवोपादेयंतद्धर्मिणितत्प्रकारकत्वंचाधिकंनि
वेश्यंह्रदोनवह्निमान्पर्वतश्चवह्निमानित्यादिबुद्धेर्बह्न्यादिनिश्चयत्वनिर्वाहायप्रतियोगिकोटौ
तद्धर्मिणीतितद्रूपितावच्छेदकविशिष्टइत्यर्थकंअतःपाषाणमयोनवह्निमान्पर्वतश्चवह्निमानि
त्यादिनिश्चयसंग्रहः समानविषयकत्वमात्रेणबाधादिबुद्धेःप्रतिबंधकत्वमतेतुपाषाणमयत्वादिना
पर्यंतेतदभावनिश्चयस्यापिपर्वतत्वादिनातत्रवह्न्यादिज्ञानविरोधित्वादुक्तज्ञानंननिश्चयोपितुसं
शयएवेतिसमानप्रकारकत्वेनविरोधितावादिनवीनमतेप्रवधर्मितावच्छेदकोतभावःतन्मतेचन

गदा० ११५ 115

धर्मिणोंतर्भावःसमानधर्मितावच्छेदकविभिन्नधर्मिकवुद्धेरपिसंशयत्वात् एवंतन्मतेधर्मितावच्छेदक
सामानाधिकरण्यमात्रेणाविच्छिन्नधर्मिणीवएकधर्मिणिकोटिद्वयावगाहिज्ञानमपिनिश्चयः तथा
विधकोटिनिश्चययोःपरस्परमविरोधित्वात् अतोवच्छेदकावच्छेदेनविरोधिप्रकारकत्वशून्यत्वमे
वनिवेश्यंधर्मितावच्छेदकसामानाधिकरण्यमात्रेणविरोधिनमवच्छेदकावच्छेदेनचतद्द्वयमवगाह
मानस्यतन्निश्चयत्ववारणायतद्धर्मितावच्छेदकविशिष्टेतद्विरुद्धप्रकारकत्वविशिष्टस्यतद्धर्मावच्छे
देनतत्प्रकारकत्वस्याप्यभावःपृथग्विवेशनीयः ग्रंथकृतःसंशयत्वघटकज्ञानत्वमात्रपरित्या
गोप्यतएवसंगच्छतेईदृशाभावप्रतियोगिकोटीकोटिद्वयप्रकारकत्वनिवेशात् यत्तुधर्मितावच्छे
दकावच्छेदेनविरोध्यवगाहित्वेनतदवच्छेदेनतद्द्वयावगाहिसंशयद्दति तत्सामानाधिकरण्येननतद्
द्विरोध्यवगाहित्वंचस्वहृतितद्द्वयावगाहित्वावच्छिन्नप्रतिबध्यतानिरूपिताप्रतिबंधकतावच्छे राम० ११५

दकत्वेनानुगमय्येकाभावएवतन्निश्चयत्वशरीरेनिवेश्यते संशयनिष्ठंविरोध्यवगाहित्वमपिसंशयप्रतिबं
धकतावच्छेदकघटकमेवसंशयनिश्चयसाधारणतद्विषयितायाएकातसंशयत्वाभावविशिष्टतादृश
विषयितायाःप्रतिबंधप्रयोजकत्वात्संशयेनसंशयप्रतिबंधइति तदसत्स्वत्वघटितत्वेनाननुगत
त्वात् संशयप्रतिबंधकतावच्छेदकनिश्चयत्वस्यात्माश्रयेणतद्रूपत्वासंभवाच्च॥ समानविषयकतामा
त्रेणविरोधितामतेचएकधर्मिविषयकंधर्मितावच्छेदकसामानाधिकरण्यमात्रेणकोटिद्वयावगा
हयितानंसंशयएवतन्मतेत्रवच्छेदकत्वागाहनस्यैवविपरीतज्ञानप्रतिबंधकतायामतंत्रत्वादित्यव
धेयं धर्मिविशेषांतर्भावस्यावश्यकतयाप्रकारभेदेनेवतद्भेदेनापिनिश्चयत्वभेदद्दृष्टएवसमानधर्मि
कस्यैवनिश्चयस्यप्रवृत्त्यादिजनकतयाविपरीतज्ञानादिविरोधितयावधर्मिभेदेननिश्चयकारणा
त्वादिभेदस्यावश्यकत्वान्नदवच्छेदकनिश्चयत्वस्यधर्मिविशेषनियंत्रिततायाअन्वेषणत्वाद्वत

गदा० त्रतत्रसमानविशेष्यतायाः प्रत्यासन्नित्वमतेच धर्मिविशेषणमंतर्भाव्य तत्प्रकारकत्वविरोधिप्रकारकत्वशून्य
११५ त्वमेव कारणतावच्छेदकं वाच्यं सप्रकारकत्वस्य च धर्मिविशेषणकतया ह्रदो न वह्निमान्पर्वतो वह्निमा
115 नित्यादिनिश्चयस्य पर्वताद्यंशावच्छेदेन वह्न्यभावादिप्रकारकत्वाभावविशिष्टस्य पर्वतादेर्विशेष्यतासं
बंधेन सत्वान्नानुपपत्तिः ह्रदो वह्निमात्रवा पर्वतो वह्निमानित्यादिनिश्चयस्य पर्वतत्वाद्यवच्छेदेन विरोधि
प्रकारकत्वाभाववत्तेपि ह्रदादौ तद्विशिष्टस्य विशेष्यतासंबंधेनासत्वात्तत्र विशेष्यतादृशकार्यजन
नप्रतिबंधप्रसंगः धर्मितावच्छेदकप्रत्यासन्निमते च तद्धर्मज्ञानत्वेनैव कारणत्वादिकं प्रत्यासन्निश्च
स्वनिष्ठविरोधिप्रकारकत्वाभाववत्त्वावच्छेदकतावच्छेदकत्वविशिष्टं धर्मितावच्छेदकत्वं पाषाणम
यो वह्निमात्र वा पर्वतो वह्निमानित्यादिनिश्चये पाषाणमयत्वावच्छिन्नपर्वताद्यवच्छेदेन वह्न्यभावा राम०
दिप्रकारकत्वसत्वेपि पर्वतत्वाद्यवच्छिन्नपर्वताद्यवच्छेदेन तत्प्रकारकत्वाभावो क्षत एवेत्यलम् ११५

धिकेन समुच्चयसाधारण्यापत्तकोट्योर्विरोधावगाहित्वाघटितसंशयत्वशून्यत्वं प्रवृत्त्यादिजनकताव
च्छेदके निवेशनीयं न तु विपरीतनिश्चयस्य प्रतिबंधकतायां तत्पर्यंतनिवेशः तत्र तद्भावसमुच्चयस्य तद्वत्ताज्ञाना
प्रतिबंधकत्वात् अन्यथा समुच्चयस्याप्यनुपपत्तेः न चैवं समुच्चयोत्तरसंशयापत्तिः समुच्चयजनकस्याव्या
प्यवृत्तित्वग्रहस्य भावाभावसामानाधिकरण्यावगाहित्वेन समुच्चयस्य च विरोधभानप्रतिबंधकत्वात् क
थंचिद्विरोधभानसंभवे समुच्चयवत्संशयस्यापीष्टत्वात् समुच्चयस्य समुच्चयसाधारणकोटिभानावि
रोधित्वे ध्रुवे विरोधभानविरोधिताया एव संशयविरोधितावीजत्वात् न च वस्तुगत्या यद्विरोधितत्प्रका
रकत्वशून्यत्वं न निश्चयत्वघटकं अयं स्थाणुः पुरुषश्चेति समुच्चयस्य पुरुषत्वाभावग्रहविरोधितानुपप
त्तेरिति गृह्यमाणविरोधनिरूपकतावच्छेदकावच्छिन्नाप्रकारकत्वमेव तथा च पुरुषत्ववांस्तदभाववांश्चे
ति समुच्चयस्यापि पुरुषत्वाभावग्रहविरोधित्वं दुर्वारमेवेति वाच्यं पुरुषत्वाभावत्वाद्यवच्छिन्नाप्रकारक

गदा०
११६
116

त्वस्यैव पुरुषत्वादिनिश्चयत्वघटकत्वोपगमात्स्थाणुर्वा पुरुषो वेति संशयोपि स्थाणुत्वपुरुषत्वाभावमा
दायकोटिचतुष्कावगाही अतस्तत्र पुरुषत्वाभावादिग्रहाविरोधिता यदि च स्थाणुत्वपुरुषत्वयोरभा
वानुपस्थितावपि परस्परसामानाधिकरण्यग्रहे भावद्वयमात्रकोटिकः संशयानुभवसिद्धः सामग्रीब
लसिद्धश्च न च तद्विरोधिधर्मवत्वग्राहस्याभावकोटिकसंशयभिन्नस्य तद्वत्ताधीप्रतिबंधकतया तद
भावस्य कार्यकालेऽसत्वान्न सामग्रीति वाच्यं परस्पराविरोधेन कोटिद्वयाभाने कोटिद्वयभानविरोधि
नोऽभावस्य कार्यकालेऽसत्तत्योभयभानस्यैव दुर्वारत्वात् युगपद्विरोधिकोटिद्वयभाने विरोधिधर्म
वत्वग्रहाभावस्य कार्यसहभावेन हेतुत्वासंभवादिति चेदस्तु पूर्ववर्तितामात्रेणैव तद्धेतुता विरोधि
नोरेकभाने तुल्यबलाया अपराभाने सामग्र्याः प्रतिबंधकत्वं वा सिद्धं न च शंखत्वतत्पीतत्वयोर्विरोधग्र
हदशायां दोषविशेषवशात्पीतत्वावगाहिनः शंखोयं पीत इति भ्रमस्य संशयत्वाभावात् भावद्व ॥ राम०
११६

यकोटिकत्वं न संशयत्वप्रयोजकमिति वाच्यं साक्षात्करोमीति प्रतीतिसाक्षिकविलक्षणविषयतान्य
कोटिद्वयविषयताया एव संशयत्वनिर्वाहकतया कोटिद्वये च पीतत्वाद्यंशे तादृशविषयतानियमेनोतादृ
शविषयताविरहादसंशयत्वादित्युच्यते तदा तादृशसंशयस्य तत्तत्कोटिविग्रहाप्रतिबंधकत्वोपपत्त
ये तत्तत्कोटिश्चयानिश्चतत्तद्विरहप्रतिबंधकतावच्छेदकनिश्चयत्वशरीरे तृस्यमानाविरोधधर्मप्रका
रकत्वंभावाभावसमुच्चयस्य तत्समुच्चयाविरोधित्वोपपत्तये च तृस्यमानाविरोधित्वाविशेषिततदभावाप्र
कारकत्वं वा गात्वाप्रवेशनीयमिति दिक् एकैककत्रूपेति तादृशनिश्चयत्वादीतोस्त्व घटकीभूताभावप्र
तियोगिविरोधिप्रकारकत्वादिप्रयोजकसामग्रीविरहसहिततत्प्रकारकधीसामग्रीनियम्यत्वादित्य
र्थः नीलानीलघटत्वादिकमिति संशयत्वस्य कार्यतानवच्छेदकत्वे नीलसामग्री घटसामग्रीसमाज
निर्वाह्यं नीलघटत्वादिकं निश्चयत्वस्यानथात्वे च नीलसामग्रीविरहकृतघटसामग्रीनिर्वाह्यम

गदा० ११७ नीलघटत्वंप्रसिद्धतरोदृष्टांतइत्यर्थः उभयारोपेत्यत्रारोपपदस्यभ्रमार्थकत्वासंभवादन्यथाव्याचष्टे आ
रोपइतिभ्रमार्थकत्वासंभववीजमाह सर्वत्रेति शिंशपादावाम्रत्वप्रसत्त्वाद्युभयकोटिकसंशयस्य
कोटिद्वयांशेएवारोपत्वात् सर्वत्रेत्युक्तंसंशयइतिशेषः लाक्षणिकेनारोपपदेनविशिष्टज्ञानाभिधा
नप्रयोजनंदर्शयति आरोपपदेतितुल्यवलत्ववोधनायेति वलवत्त्वालौकिकसंनिकर्षदूरत्वादि
दोषाभावादिघटितायाएककोटिभानकसामग्र्या अपरकोटिभानविरोधित्वंसूचयितुंतुल्यवल
तावोधनस्यावश्यकत्वादितिभावः आरोपस्यविशेष्यघटितसंनिकर्षशून्यविशेषणाकतयाप्रा
पशउपनीतभानत्वेनकोटिद्वयोपनीतभानलाभात्तत्सामग्र्याश्चतुल्यवलतयातल्लाभः एककोटि
भानसामग्र्या अपरकोटिभानविरोधित्वेसामग्रीसमाजात्संशयोनसंभवतीतितस्या अतथा राम०
त्वमाह मूलेनत्विकेतिसामग्रीप्रतिवंधः सामग्रीविघटनंत्वलवत्त्वाएककोटिभानसमग्र्यात्र ११७

117

परकोटिभानंप्रतिवध्यतएवेत्यतः पूरयतिदीधितौतुल्यवलयेति अप्रतिवंधकत्वेच अप्रतिवंधनूपस्याविरो
धस्यहेतुनाभिधानासंगतेरविरोधपदार्थंव्याचष्टे प्रतिवंधोपयिकेतिननुभवतुसामग्रीसमाजात्संश
यस्तावतानाप्रकृतेकिमायातंतथापिप्रामाण्याप्रामाण्योभयविशिष्टज्ञानसामग्र्यानिश्चयप्रतिवंधात्त
प्रामाण्यसंशयोनिराबाधएवेत्याकांक्षापांमूलेनचोभयारोपेति नचेत्पनंतरमेवंस्मृतीतिपूरणीयंवा
च्यं वक्तुंशक्यंअत्रकथंतानिहत्तयेआशयंप्रकाशयतिप्रत्येकारोपेति संशयोत्पत्तौकोटिद्वयभास
कसामग्रीसंवलनापेक्षायामपिसंशयत्वस्यकार्यतावच्छेदकत्वेउभयसामग्रीप्रत्येकारोपसामग्री
तोविलक्षणैवनिश्चयत्वस्यतथात्वेचतादृशसामग्र्यास्तदवच्छिन्नंप्रतिवंधकत्वंयुज्यतएवेतिशंकानि
रासायसंशयनिश्चयत्वयोःकार्यतावच्छेदकत्वमेवएवंसतिनास्तिउक्तयुक्तेरितिमूलस्यभावंव्याचष्टे
दीधितौउभयेति संशयत्वादेःकार्यतानवच्छेदकत्वेपिअधिकवलत्वमपुरस्कृत्यैककोटिज्ञान

सामग्रीत्र्यपरकोटिज्ञानंप्रतिबध्नीयादितिनप्रकृतेप्रामाण्यनिश्चयोभविष्यतीत्याशंकांनिराकर्त्तुमधिकब
लत्वपुरस्कारेणुक्तिंदर्शयति तुल्यबलयेतिसामग्रीद्वयसमाजात्मेशपदस्यत्रशंकेतमूलेनचेतिस
माधेन्नसमूहालंबनवदिति ज्ञानस्थलेसामग्रीभेदेनकार्यभेदप्रयोजकोपितुसामग्र्यारसंबलन
मेवतत्संबलनेतुकार्याभेदएवप्रयोजकमितिसमूहालंबनांतरवत्रत्राभिन्नकोटिद्वयविशिष्टज्ञान
रूपसंशयनिर्वाहादित्यर्थः संशयत्वनिश्चयत्वयोः कार्यतानवच्छेदकत्वेसंशयत्वावच्छिन्नंप्रत्यपि
निश्चयसामग्र्यभावस्यहेतुत्वासंभवात्कोटिद्वयभानसामग्रीसत्वेनिश्चयोपधायकसामग्र्याएव
दुर्घटत्वाच्च प्रामाण्यसंशयस्यप्रकृतेनानुपपत्तिरितिशंकानिराकरणपरतयातस्मादित्यादिमू
लंव्याचष्टेत्रैवमिति प्रकृतेऽप्रामाण्यभानेप्रामाण्यनिश्चयस्यैवासंभवान्निश्चयसामग्रीसत्वा
न्नतत्संशयइत्यसंगतमतः प्रामाण्यनिश्चयसामग्रीपदमधिकबलप्रामाण्यग्रहसामग्रीपरतया

व्याख्यास्यते अतोधिकबल सामग्री प्रतिबंधकत्वं। प्रकृत प्रामाण्यग्राहकसामग्र्या अधिकबलत्वं च प्र
थमं व्यवस्थापयति तुल्यबलाभ्यामित्यादिना व्यवसाये संदिग्धे तेइत्यंतेन तत्राधिकबलतायाः प्रतिबंधोप
पिकत्वया एककोटिभानसामग्र्या अपरकोटिभान प्रतिबंधकत्वेपिन संशयानुपपत्तिस्तुल्यबलसामग्रीभ्या
मेव संशयजननादिति पूर्वं दर्शयति तुल्यबलाभ्यां हीति सामग्रीभ्यामिति कर्तृपदं ज्ञानकरणमयादेये
ति ज्ञानकरणमेकदा एकं ज्ञानं जनयतीति नियमेनेत्यर्थः पीतत्वाभावादेरित्यत्र न ज्ञानस्य संभवइत्यनु
षज्यते नेनु कोटितावच्छेदकविशिष्टांशे साक्षात्तत्वग्रहप्रयोजकविषयिताशालिज्ञानसामग्री विपरी
तकोटिभानसामग्रीबलवत्या स्तां बहिर्विषयघटितप्रामाण्यग्रहसामग्री च न तथा बहिर्विषयांशे
मानसस्य तादृशविषयताविरहात् अतएवोष्मीनसौरभादिविशिष्टद्रव्यादिलौकिकचाक्षुषसा
मग्रीकालेपि सुरभिद्रव्यपात्रं वेत्यादिश्चाक्षुषसंशयइत्यत आह अधिकबलाच्चेति विषयनि

गदा० ११९ रूप्यत्वमर्यादोपबृंहिताज्ञापकसामग्रीविषयनिरूप्यं हीत्यादिपुक्तोपनीतविषयोपरागेणैवयोग्यविषयिताविं
शिष्टज्ञानादिलौकिकप्रत्यक्षसामग्री। तत्प्रकारकत्वादेः रजतत्वादिमद्विशेष्यकत्वावच्छिन्नत्वाविशेषितरज
119 तत्वादिप्रकारकत्वादेः। आदिना पुरोवर्त्तिविशेष्यकत्वपरिग्रहः इदमाया ततः अनुभवानुरोधेन तत्प्रकारक
त्वादिग्रहसामग्र्यास्तदभावग्रहप्रतिबंधकत्वे पि प्रामाण्यग्रहसामग्र्यास्तदभावग्रहप्रतिबंधकत्वानुपगमसं
संभवात अनुगतरूपेणाप्रतिबध्याप्रतिबंधकभावासंभवात अत एव धर्मिज्ञानस्य संशयहेतुत्वव्यवस्थापने
न प्रामाण्यनिश्चयप्रतिबंधान्न प्रामाण्यसंशय इत्यत्रैव मूलकृता निर्भरः कृतः मिथ्यास्तु प्रामाण्यनिश्चयसा
मग्रीप्रतिबंधेन प्रामाण्यसंशयानुपपत्तेरुक्तयुक्त्या असंगतेरारोपे संशयसाधारणरूपावच्छिन्नधर्मिज्ञानस्येह
तुतया धर्मिज्ञानविशेषादर्शनवदितकोटिद्वयनिश्चयसामग्रीसमाजात्संशयः प्रकृते च ज्ञानरूपधर्मिज्ञानस एम०
त्वे प्रामाण्यनिश्चयरूपविशेषदर्शनसत्वात्र संशय उपपद्यत इत्यर्थपरतया विनुद्धारोपे स्यादिमूलं व्याख्या ११९

तवं तस्तन्मते एककोटिभानसामग्र्या अपरकोटिभानं प्रति प्रतिबंधकतायां संशयानुपपत्त्या अरकल्पनेपि
उभयकोटिभानसामग्र्या एककोटिनिश्चयप्रतिबंधकतया कोटिद्वयनिश्चयसामग्रीसमाजे तेन संगच्छत इ
तिशंकापरतयानचेत्यादिमूलं व्याख्येयं उभयारोपसामग्र्यानातिरिक्ता किंतु सामग्रीद्वयं तत्र तत्कोटिभानसा
मग्र्यान तत्कोटिनिश्चयप्रतिबंधिका विरोध्यग्राहकत्वात् विरोधिकोटिग्राहकसामग्र्यास्तु तत्कोटिनिश्चयप्र
तिबंधकत्वेपि आरोपसामग्रीपदेन विरोधिग्राहकसामग्र्यभावातिरिक्तविश्चयासाधारणासमुदा
यस्य विवक्षितत्वान्न दोष इत्यर्थकतया प्रत्येकारोपे स्यादिमूलं व्याख्येयं   तस्मादित्यादिग्रंथश्च धर्मि
ज्ञानस्य संशयहेतुत्वात् ज्ञानग्रहपूर्वं तदभावेन प्रामाण्यनिश्चयस्यैव सामग्रीसत्वात्र ज्ञानग्रहस्तत्संश
यरूपो न वा तदुत्तरमपि संशयः धर्मिज्ञानसत्वेपि विशेषादर्शनविरहेणा तत्सामग्रीविरहादितिव्या
ख्येयः संशयत्वस्य कार्यतावच्छेदकत्वनिराकरणपरतया पूर्वमूलग्रंथं व्याख्यातवतो दीधितिकार

ग० दा०
१२०
120

स्यमतेधर्मिज्ञानंचेत्यादिनासंशयंप्रतिधर्मिज्ञानस्यहेतुताभिधानंनसंगच्छते तथासतिसंशयत्वस्यजन
न्यतावच्छेदकतयाऽवश्यकत्वात्सामान्यलक्षणाप्रत्यासत्तिजन्यज्ञानधर्मिविशेष्यकज्ञानेव्यभिचा
रेणासविशेष्यकबुद्धित्वमात्रस्यधर्मिज्ञानजन्यतावच्छेदकत्वासंभवात्संशयत्वस्यैवाप्रमात्वस्याप्या
र्थसमाजग्रस्ततयातस्याप्येतन्मतेधर्मिधीजन्यतानवच्छेदकतयातदवच्छिन्नाहेतुतापरतयापिन
मूलसंगतिर्वस्तुतःसाधारणादिधर्मवद्धर्मिज्ञानहेतुर्येवसंशयेधर्मिनियमस्यदर्शनीयतयासंश
यत्वस्यजन्यतावच्छेदकत्वमावश्यकंतन्नतदभावसहचरितधर्मवत्ताज्ञानत्वेनैवतस्यहेतुतावाच्य
तयैकैककोटिविशिष्टबुद्धित्वस्यतज्जन्यतावच्छेदकतायाव्यभिचारेणासंभवात्तत्कोटिसहच
रितधर्मवत्ताज्ञानत्वतदभावसहचरितधर्मवत्ताज्ञानत्वाभ्यांपृथक्कारणत्वेपिआरोपेसहचरित राम०
धर्मवत्ताज्ञानानपेक्षायामपि अबाधितकोटिविशिष्टबुद्धौतत्सहचरितधर्मवत्ताज्ञानानपेक्ष १२०

णान्तज्जन्यतावच्छेदककोटौसंशयत्वनिवेशनावश्यकत्वात् इत्यार्थसमाजग्रस्तधर्मस्यापिजन्य
तावच्छेदकत्वाभ्युपगमपरतयामूलं दीधितिकृद्व्याचष्टे अभ्युपेत्येति साधारणधर्मवज्ज्ञानस्यज
न्यतावच्छेदकगर्भसंशयत्वनिवेशेप्यसाधारणधर्मवज्ज्ञानादिजन्यसंशयेव्यभिचारान्तद्व्यव
हितोत्तरत्वस्यतज्जन्यतावच्छेदकतायाआवश्यकत्वात्संशयत्वनिवेशोनिर्युक्तिकइतिध्येयं धर्मि
ज्ञानहेतुतयाधर्मितावच्छेदकभानानियमाद्धर्मिज्ञानपदंधर्मितावच्छेदकविशिष्टधर्मिज्ञानप
रतयाव्याचष्टेधर्मितावच्छेदकेतितद्धर्मितावच्छेदकपुरस्कारेणधर्मिविषयकेसंशयेइंद्रियस
न्निकर्षादिमंतांतद्धर्माश्रयसकलधर्मिणांभानोपगमेधर्मितावच्छेदकप्रकारकज्ञानत्वेनैवहे
तुतावाच्यानतुधर्मिविषयत्वमप्यंतर्भावनीयमित्यवधेयं ननुधर्मितावच्छेदकविशिष्टधर्मिज्ञान
सामान्यहेतुतयासंशयेतद्भाननियमइतिनोपपद्यतेधर्मीन्द्रियसन्निकर्षादेरेवधर्मिभानेनि

गदा० १२१

121

यमोपपत्तेः तथानेकधर्मिष्विन्द्रियसन्निकर्षादिसत्त्वेपि कुत्रचिदेव धर्मिणि संशयः कुत्रचिन्नेति निय
मो न धर्मीन्द्रियसंनिकर्षादिना निर्वहतीति धर्मिज्ञानमेव तन्निर्वाहकमिति वाच्यं संशये धर्मिज्ञानहे
तुत्वेपि बहुषु धर्मिष्विन्द्रियसन्निकर्षादिसत्त्वे कस्यचिदेव धर्मिणो ज्ञानं कस्यचिन्नेत्यत्र नियामका
भावेन सर्वेषामेव सन्निकर्षादिशालिधर्मिणां ज्ञानस्यावर्जनीयतया संशये धर्मिभानविषमानि
र्वाहात् यदि चानुगततत्सन्निकर्षादिव्यक्तिघटितसामग्री संशयजनकज्ञाने धर्मिभाननियाम
मिकोपेयते तदा संशयस्य तत्तद्धर्मिविषयकतायामेव सा प्रयोजिकास्तु किमन्तरा धर्मिज्ञान
कल्पनया यदि तत्तद्धर्मिविषयकप्रत्यक्षत्वावच्छिन्नोत्पत्तावननुगततत्सन्निकर्षव्यक्तिघटित
सामग्रीणां प्रयोजकत्वं ध्रौव्ये पि तत्तद्धर्मिभानप्रयोजकसामग्रीत्वेनैव तत्तद्धर्मिकसंशयत्वाव राम० १२१
च्छिन्नं तत्तद्धर्मिकविशिष्टबुद्धित्वावच्छिन्नं वा प्रति हेतुत्वं कल्प्यतां तादृशानुगतरूपावच्छि

न्नकारणाघटितसामग्र्येव तत्तद्धर्मिकसंशयत्वावच्छिन्नप्रयोजकास्तु तत्तद्धर्मिभानप्रयोजकसा
मग्रीत्वापेक्षया तत्तद्धर्मिज्ञानत्वं लघिति चेत् भवत्येवं तथापि तेनैव रूपेण धर्मिज्ञानहेतुत्वे तत्तद्ध-
र्मिज्ञानसत्त्वे तत्तद्धर्मिभासकचक्षुःसंयोगादिविगमेऽपि तत्तद्धर्मिकसंशयापत्तिः न च तदा चाक्षुषा
दिसंशयस्य विशेष्यभासकलौकिकसन्निकर्षाभावेनानुत्पादेऽपि मानसस्तादृशसंशय दृष्यत
इति वाच्यं तदानीमन्यविषयकचाक्षुषादिसामग्रीसत्त्वे मानसोत्पादासंभवात् अत एव नि
श्चयेऽपि न विशेष्यज्ञानं हेतुरपि तु तत्सामग्र्येवेति कोट्युत्कटत्वं च न स्यादिति युक्त्यन्तरमवतारयि
तुमिच्छुः पूर्वोक्तयुक्तावुपवर्णितानुशयबीजभूतामनुपपत्तिं स्वयं पूर्वयुक्तावेव निर्भरस्य वक्तव्यत
या इष्टं तु साधारणादिधर्मवद्धर्मिज्ञानत्वप्रकारेणास्य संशये धर्मिभाननियामकत्वमित्येतत्प्रदर्श
नपरतया अन्यथेत्यादिमूलं व्याचष्टे। अन्यथेति धर्मिणा संशयो भवेदित्यन्तं संशये धर्मिनियमा

नस्यादित्यस्यव्याख्यासाधारणादिधर्मवत्त्वेनधर्मिणोज्ञानमपिइंद्रियसन्निकर्षरूपधर्मिभासकसामग्री
सहकारेणैवसंशयजनकमन्यथातिप्रसंगात्तथाचतादृशसामग्र्यैवान्यथासिद्धिरित्याशंकामपनेतु
माह इंद्रियसन्निकर्षादिशालिनीति इंद्रियसन्निकर्षबलादगृह्यमाणा इत्यर्थः आदिपदादालोक
संयोगदूरत्वादिदोषाभावयोग्यतानांपरिग्रहः अगृह्यमाणेति अगृह्यमाणाः समानादिः कोटिद्व
यसहचरितोधर्मोयत्रसतादृशधर्मातस्मिन्नित्यर्थः आदिपदादसाधारणधर्मपरिग्रहः संशयोभवे
दिति अत्रेष्टापत्तिरनुभवविरोधान्नसंभवतीतिभावः ननुसमानादिधर्मविशिष्टधर्मिज्ञानजन्यतया
अभिमतसंशयेसमानादिधर्मविशिष्टस्यधर्मिणोभानोपगमात्तादृशधर्मिभासकसामग्र्याएवसं
शयेधर्मिभाननियामकत्वमस्तुकिंतादृशधर्मिज्ञानहेतुतयेतिशंकांनिरस्यति नचेद्धेतोरेवेति
ज्ञानस्यसामग्रीस्यसमासत्लिखनमग्रिमतत्पदाभ्यांज्ञानस्यपरामर्शस्फुटीकर्तुंहेतुरिति। आ

स्तासंशयइतिशेषः समानादिधर्मवत्ताविषयक एव नियमत संशयइत्याशयेन तद्ग्राहकसामग्री हेतुतोक्तिः
अनुमित्यादौ च न व्याप्यवत्तादिज्ञानसामाग्र्या हेतुता संभवति प्रत्यक्षादिनानुमितेरयोगपद्याद्व्याप्यवत्ताप्रत्य
क्षादिसामग्र्या अनुमितिहेतुत्वायोगात् तद्विषयकानुमितिसामग्र्याश्चान्यस्या अज्ञातत्वादिति भावः
अननुगमादिति यद्यप्यननुगतानामपि साधारणधर्मादिभासकसामग्रीणां संशयहेतुत्वं ह्नसंम
शयेपि तज्ज्ञानोपगमात् तथापि तादृशसामग्रीणां भूयसीनां संशयोपधानप्रयोजकत्वकल्पने गौरवा
त्तादृशधर्मवत्ताज्ञानस्य हेतुतामुपेत्य न तद्घटितानुगतसामग्र्यास्तथात्वकल्पने लाघवं धर्मिज्ञानहेतु
त्वेपि यथा धर्मिभासकसामग्र्या अपेक्षा न तथा साधारणादिधर्मविशिष्टधर्मिज्ञानहेतुत्वेन तद्विशिष्ट
धर्मिभासकसामग्र्याऽवश्यकी धर्मिभासकसामग्रीसामान्यापेक्षयेवानतिप्रसंगादिति भावः ननु

गदा० १२३ 123

समानादिधर्मवत्ताभासकसामग्रीणानानात्वेपि तद्वत्ताज्ञानोत्पत्तिप्रयोजकतावच्छेदकविशिष्टत्वेनानुगम
य्यतासां कारणत्वं कल्पितात्तदवच्छिन्नघटितानुगतसामग्र्याः संशयोपधानप्रयोजकत्वमुपगंतव्यमि
त्याशंकां निरस्यति· तत्सामग्रीत्वेनेति तत्त्वेनैव तादृशधर्मवत्ताज्ञानत्वेनैव न च तथा सति धर्मिभासक
सामग्रीत्वेनापि हेतुत्वांतरं वाच्यं तदपेक्षया समानादिधर्मवद्धर्मिज्ञानसामग्रीत्वेनैव हेतुत्वकल्पं
नयुक्तमिति वाच्यं निश्चयसाधारणतद्धर्मिकविशिष्टबुद्धौ तद्धर्मिभासकसामग्रीत्वेन हेतुतायाः क्लृप्त
त्वात् धर्मिज्ञानस्य संशयहेतुत्वव्यवस्थितौ प्रामाण्यसंशयो नोपपद्यत इति दर्शयति तथाचेति नेन
प्रामाण्यनिश्चयेन तत्र व्यवसायेन प्रामाण्यसंशय इत्यग्रिमेण संबंधः कोट्युल्लेखत्वनियामकतयाध रघु० १२३
र्मिज्ञानहेतुताया विचारासह त्वात्पूर्वमुक्तावेव निर्भर इत्याह तत्रान्वाचयइति विचारासहत्वमेवदर्शय

ति तथा हीति तन्नियामकं संशयस्य तद्धर्मिविशेषणतापन्नतत्कोट्यंशे उत्कटत्वनियामकं तत्कोटीति
तत्कोटिसहचरितत्वविशिष्टे भूयोमिधर्मे विशिष्टस्य धर्मिणो ज्ञानं कारणमित्यर्थः भूयस्त्वं च विपरी
तकोटिसहचरितत्वेन गृह्यमाणधर्मापेक्षयाऽऽधिक्यं भूयस्त्वस्थाने क्वचिद्धीनुतत्सहचाराद्भूयोधर्म
दर्शनादपि उत्कटतत्संशयस्य क्वचिदुत्पत्तेस्तादृशस्यापि वैकल्पिकहेतुतामाह भूय इति उत्कटसं
शये तादृशधर्मिज्ञानविशेषहेतुत्वेपि प्रकृते धर्मिज्ञानं विनानुत्कटप्रामाण्यसंशयो भविष्यतीति शंका
निरासायाह तद्वत्त्वाच्चेति यद्विशेषयोरित्यादिनियमादिति शेषः तत्र उत्कटत्वं तथा जातिः संशयत्वं
तद्व्याप्यमुत्कटत्वं च मानसत्वव्याप्यमेव तथा च न चाक्षुषत्वादिवासंकर इत्यत आह आंशिकत्वाच्चे
ति मिश्रस्य आंशिकत्वस्य जातिबाधकतामनादृत्य व्याप्यवृत्तिः संशयजातिरित्युक्तं तामाह इयत्तादृ
शधर्मविषयकत्वमुपाधिर्वेत्यभिहितं दीधितिकारस्य जातेर्व्याप्यवृत्तितानियमस्यासिद्धांतसिद्ध

तयाउपाधिनैवव्यवहाराद्युपपन्नावुत्कटत्वजातेरप्रामाणिकतयाचाव्याप्यवृत्तिताहृशजातिमवलंव्यसिद्धां
तप्रणयनं प्रमात्वजातिंनिराकरिष्यतोमूलकृतोनुचितमित्याशयेनाप्रामाणिकतयाजातिपक्षंनिराकृत्यउपाधि
पक्षं दूषयितुंताहृशोपाधिंनिर्वक्ति परं त्विति प्रकृतधर्मिणियत्र ताहृशधर्मोनिरूप्यते तत्रस्वातंत्र्येणाधर्म्य
तरविशेषणतयावाताहृशधर्मभानेपिनधर्मिणिउत्कटतत्कोटिसंशयतेतिताहृशधर्मप्रकारेणप्रकृ
तधर्मिविषयतापर्यंतमुक्तं तदेव ताहृशधर्मिविषयकत्वमेवमनन्तताहृशधर्मिविषयकत्वावच्छिन्ने
नियामकं कारणतावच्छेदकं जनकत्वेनाभिमतेधर्मिज्ञानइवसंशयेपिताहृशधर्मविशिष्टधर्मिवि
षयकत्वस्यसामग्र्यंतरादेवनिर्वाहेणताहृशरूपेणकार्यकारणभावेमानाभावादितिभावः इदंतुत
त्वं अत्रेदंसंभावयामीत्यनुगतप्रतीतिसाक्षिकंसंभावनात्वमव्याप्यवृत्तिजातिर्विषयताविशेषोवान
तत्कोपाधिस्तस्यकश्चिद्रूपः तत्कोटिसहचरितधर्मविशिष्टधर्मिविषयकत्वरूपतयाकश्चिच्चतत्को

टि सहचारितभूयोधर्मविशिष्टधर्मिविषयकत्वरूपतया भूयस्त्वस्य च यथायोगं द्वित्वत्रित्वचतुष्ट्वादि-
रूपतयाऽननुगमात् नियामकं च तस्याऽगत्या अननुगतमेवोपेयम् इति । मूले विशेषदर्शनेऽपीति शं-
खादावपीतत्वादिनिश्चयेऽपूर्वं सत्यपीत्यर्थः । तद्दूदत्रापीति । यथा तत्र पीतत्वादिभ्रमे सत्यपि पूर्वो-
त्पन्नाऽपीतत्वादिनिश्चयात् तत्प्रकारिकाप्रवृत्तिर्जायते तथा रजतादिज्ञानेऽनभ्यासदशापन्नेऽपि प्रा-
माण्यग्रहस्वीकारे तदुत्तरं कथंचिदप्रामाण्यसंशयोपपादनेऽपि निश्चितप्रामाण्यकतया नाभ्यास-
दशापन्नज्ञानस्यापि प्रवर्त्तकता स्यादित्यर्थः । अप्रामाण्यज्ञानानास्कंदितज्ञानप्रवर्त्तकत्वे नायं दोष
तोऽदूषणान्तरमाह साक्षात्कारीति । अनेन ग्रंथेन विशेषदर्शनदशायां पीतत्वादिभ्रमोपपादनं प्रामाण्य-
संशयोपपत्तौ सत्यां स्वतः प्रामाण्यग्रहेऽदूषणमतो दोषाधीनत्वस्य तदनुपपादकत्वदर्शनाय दोषवशो-
द्यथापीतत्वादिभ्रम इति दृष्टान्तदूषणमिदमित्याह सत्यपीति । यत्र प्रथमं दोषासत्त्वात् शंखे न पीतद्र-

गदा० १२५

125

तिचाक्षुषंदोषसमवधानंचतत्रतादृशदोषवशात्पीतत्वभ्रमोयथेति यद्यथपीतःशंखइत्यादेरर्थस्तदातदु
परिसाक्षात्कारीत्यादिदूषणासंगतिःसाक्षात्कारिविपरीतनिश्चयस्यैवतत्रसत्वेनदोषाधीनतयैवतद्दुप
पत्तेरित्यानुमानिकविपरीतज्ञानदशापरएवासौग्रंथः समानेंद्रियजन्यलौकिकापीतत्वादिनिश्चयस्यले
दोषसमवधानेपितादृशनिश्चयनाशएवपीतत्वादिभ्रमोत्पत्तेः अन्यथासमानेंद्रियजन्यतासंयुक्तविशे
षितायाएवोच्छेदात्तद्दोषविशेषाजन्यपीतत्वाद्यारोपेविपरीतनिश्चयमात्रस्यैवप्रतिबंधकत्वादित्याविध
र्नुमानुमानिकइत्युक्तंआनुमानिकविपरीतनिश्चयस्योक्तभ्रमाविरोधितालाभायसाक्षात्कारीत्यनेनत
स्यैवकारंदर्शयति साक्षात्कार्यैवेति उभयत्रसाक्षात्कारित्वंसाक्षात्त्वग्रहयोग्यत्वं अतःसाक्षात्कारि
त्वजातेःपित्ताद्यजन्यपीतत्वाद्यारोपात्मकपीतत्वाद्युपनीतभानसाधारणेपिनक्षतिः।साक्षात्का
र्यीयशंखत्वादिदर्शनेनपीतत्वाद्यारोपविरोधातिविशेषदर्शनपदंग्राह्याभावनिश्चयपरतयाव्या गदा० १२५

चेद्विपरीतनिश्चयइतिएवकारव्यावच्छेद्यंस्पष्टयति नत्वानुमानिकादिरितिविपरीतनिश्चयइत्यत्रुपजन्यते
असाक्षात्कारिविपरीतनिश्चयेसाक्षात्कारिभ्रमविरोधित्वाभावःपूरितेवकारलभ्यार्थएवतथा दर्शना
दितिमूलस्यतथापदेनपरामृष्टः।भ्रमविशेषनूपपत्तानप्रतिबंधकतायांसाक्षात्कारित्वस्यप्रयोजकत्वा
भिधानात् संशयनूपपत्तानस्यप्रतिबंधकतायांतस्याप्रयोजकत्वंलभ्यतेविशेषविधेःशेषनिषेधपर
तायाऔत्सर्गिकत्वादितिविपरीतनिश्चयसामान्यस्यैवसंशयप्रतिबंधकतालाभाइतिस्फुटयति
संशयेत्विति तन्निश्चये।विपरीतनिश्चये०तस्यसंशयस्यअनुत्पादात् नचप्रकृतेप्रामाण्यस्यतन्मते
साक्षात्कारिनिश्चयस्यैवसत्वात्साक्षात्कारित्वस्यसंशयप्रतिबंधकतायांतंत्रत्वेपिसंशयानुपपत्ति
सत्वान्नस्यात्तथात्वस्यातंत्रताप्रतिपादनंप्रकृतानुपयोगीतिप्रकृतोपयोगितयातदभिधानासंग
तिरितिवाच्यं अनुव्यवसायस्यप्रामाण्यघटकज्ञानधर्मप्रकारिताघंशेलौकिकत्वेपितद्दूष्टकवहि

गदा॰ १२६
126

विषयांशेऽलौकिकत्वमिति पित्तादिदोषाप्रतिबध्यस्य शुक्लत्वाद्यंशे उपनीयमानात्मकस्य तूपादिलौकि
कग्रहस्य सत्त्वे शंखो न श्वेतः शंख इत्यादि साक्षात्कारिभ्रमोत्पत्त्या साक्षात्कारिभ्रमप्रतिबंधप्रकारतावच्छेदकांशे लौ
किकत्वापेक्षावत्त्वांशे प्रतिबंधेऽपि तद्रूपेक्षायां प्रकृते संशयोपपत्तिसंभवात्तत्र तदनपेक्षायुक्तपादनस्याव
श्यकत्वात्पीतत्वादिभ्रमस्थलप्रकृतस्थलयोरेतावता विशेषलाभेन प्रकृतप्रामाण्यसंशयानुपपत्ति
तादवस्थ्यपरतामुक्तग्रंथस्य स्फुटयति तथा चेति प्रतिबंधकविरहादिति न च विपरीतनिश्चयसामान्याप्र
तिबध्यत्वं पीतत्वभ्रमस्य साक्षात्त्वग्रहप्रतिबंधकाभावस्तत्समवधानाधीन एवेति प्रामाण्यसंशयस्थले
पि दोषसमवधानात्प्रतिबंधकाभावनिर्वाहः संभवतीत्यविशेष इति वाच्यं संशयेऽक्कचिदपि साक्षात्त्वा
ग्रहेण संशयजनकदोषस्य साक्षात्कारित्वग्रहाप्रयोजकतया दोषजन्यत्वेपि तस्य तद्योग्यत्वे न वि
शेषात् विशेषो वक्ष्यत इति साक्षात्कारिभ्रमप्रतिबंधकतायां साक्षात्कारित्वमात्रं न तंत्रं अपितु समा

राम॰ १२६

नेंद्रियजन्यत्वसहितमतस्त्वचाऽरगत्वाभावादिग्रहेपिदोषविशेषाद्दैशादावुरगत्वादेश्चाक्षुषाद्यारोपइ
तिवक्ष्यतइत्यर्थः विपरीतनिश्चयसामान्यपत्रप्रतिबंधकंतत्रतदभावव्याप्यदर्शनादिकमपियथानुमि
त्यादावितिनियमाद्विपरीतनिश्चयसामान्यस्यसंशयप्रतिबंधकताभिधानेनभ्रमत्वसंशयेपिप्रामा
ण्यनिश्चयस्यप्रतिबंधकत्वलाभात्प्रमात्वनिश्चयेनप्रतिबंधात्तदभावसंशयोमाभूद्भ्रमत्वसंशये
बाधकविरहेणाततएवविषयसंशयादिर्भविष्यतीतिशंकायात्रेनवकाशइत्यवधेयं अतएवा
त्रभ्रमत्वसंशयेप्रमात्वग्रहप्रतिबंधकत्वस्यालाभेभ्रमत्वसंशयश्चतज्ज्ञानाज्ज्ञानाभ्यांनसंभवती
त्युक्तत्वादित्यग्रिममूलासंगतिरित्यपिनिरस्तं आलोककारास्तुविशेषदर्शनेमितिविशेषस
विपरीतस्यैवदर्शनमित्यर्थकं एवंचभ्रमप्रतिबंधकतायांसाक्षात्कारित्वस्यैवग्राह्याभावावगा
हित्वस्याप्यपेक्षावोधनात्संशयप्रतिबंधकतायांग्राह्याभावावगाहित्वानपेक्षायांत्रपितुक्त

गदा० १२७

127

व्युत्पन्निवत्वेनलाभात्प्रमात्वनिश्चयस्यभ्रमत्वसंशयप्रतिबंधकता लाभइतिप्राहुः तन्नुसंशयस्यसाक्षा
त्वग्रहायोग्यत्वेननविपरीतनिश्चयसामान्यप्रतिबध्यतादोषविशेषजभ्रमलौकिकसन्निकर्ष
जज्ञानसाधारणतोग्यतायाश्चानुगतायादुर्वचत्वात् नापिसंशयत्वेन। अनुमित्याद्यग्रहात्
